Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 2 | ISSN : 2582-0095

# तत्पुरुषसमासलक्षणं तद्भेदाश्च

कैलाश चन्द्र बुनकर
प्राचार्य, राजकीय लक्ष्मीनाथ शास्त्री संस्कृत, महाविद्यालय, चीथवाड़ी, जयपुर।

**Article Info**
Volume 5, Issue 2
Page Number : 85-130
**Publication Issue :**
March-April-2022
**Article History**
Accepted : 02 March 2022
Published : 20 March 2022

**शोधसारांश**:- काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- अमैवेति पूर्वयोगेऽनुवृत्तम्, तेनान्यत्र न प्राप्नोतीति वचनमारभ्यते। क्त्वाप्रत्ययेन सह तृतीयाप्रभृतीन्युपपदानि अन्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति। उच्चैः कृत्य। उच्चैः कृत्वा । "अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ" इति क्त्वाप्रत्ययः। समासपक्षे ल्यबेव। तृतीयाप्रभृतीनीत्येव - अलं कृत्वा। खलुकृत्वा। यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृततया सूत्रस्यार्थं व्याख्याति, तस्यानुकरणमेव करोति काशिकाकारः। विषयप्रतिपादने द्वयोर्ग्रन्थयोर्मध्ये कोऽपि भेदः नास्ति।

**मुख्यशब्दः**:-समासः काशि का तत्पुरुषसमासः सूत्रम् अव्ययः व्याकरणम्।

तत्पुरुषशब्दस्य द्विविधा व्युत्पत्तिः। तस्य पुरुषः तत्पुरुषः। स चासौ पुरुषःतत्पुरुषः। अनया व्युत्पत्त्या तत्पुरुषसमासस्य भेदद्वयं कल्पयते। व्यधिकरणतत्पुरुषःसमानाधिकरणतत्पुरुषश्च। विरुद्धविभक्तिकयोः पदयोः समासः व्यधिकरणतत्पुरुषःविरुद्धम् अधिकरणं ययोः स व्यधिकरणः इति व्युत्पत्तेः। यथा – राज्ञः पुरुषःराजपुरुषः।

समानम् एकम् अधिकरणं ययोः पदयोः स समासनाधिकरणः। यथा – नीलंच तत् उत्पलं नीलोत्पलम्।

तत्पुरुषसमासे प्रायः उत्तरपदार्थस्य प्राधान्यं भवति। अतः सिद्धान्तकौमुद्यांउक्तम् – प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः। अत एव राजपुरुषम् आनय इति वाक्ये पुरुषपदार्थस्य एव आनयनं भवति, न तु राजपदार्थस्य। लक्षणे प्रायः पदस्य ग्रहणेन क्वचित् तत्पुरुषसमासे उत्तरपदार्थस्यापि प्राधान्यं दृश्यते । यथा– अर्धपिप्पली इत्यादौ।

तत्तपुरुषसमासस्य सिद्धान्तलक्षणं तत्पुरुषाधिकारपठितत्वं तत्पुरुषत्वम्। अतः सिद्धान्तकौमुद्यां उक्तम् – "तत्पुरुषः[1] – समासप्रकरणे इदं द्वाविंशतितमं सूत्रमस्ति । शब्दकौस्तुभकारः सूत्रस्यार्थं करोति – अधिकारोऽयं प्राग्बहुब्रीहे ।।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– तत्पुरुष इति सञ्ज्ञाऽधिक्रियते प्राग्बहुब्रीहेः, यानित ऊर्ध्वमनुक्रमिष्यामस्तत्पुरुषसञ्ज्ञास्ते वेदितव्याः। पूर्वाचार्यसञ्ज्ञा चेयं महती, तदङ्गीकरणमुपाधेरपि तदीयस्य परिग्रहार्थम्- उत्तरपदार्थप्रधानस्तत्पुरुषः। तत्पुरुषप्रदेशाः– “तत्पुरुषे कृति बहुलम्" इत्येवमादयः। यत्रविषयेऽस्मिन् शब्दकौस्तुभकारः सामान्यरूपेणार्थं विवृणोति तस्य काशिकाकारः विस्तृतरूपेणार्थंव्याख्याति।

विशेषः – उत्तरपदार्थप्रधानस्तत्पुरुषसमासः भवति । अस्य निर्वचनं षड्धा क्रियते: –

(क) सामान्यः तत्पुरुषः।
(ख) नञ् तत्पुरुषः।
(ग) कर्मधारयः। कर्मधारयभेदो द्विगु भवति ।
(घ) प्रादितत्पुरुषः।
(ङ) गति तत्पुरुषः।
(च) उपपद तत्पुरुषः।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

"द्विगुश्च"[2] – समासप्रकरणे इदं त्रयोविंशतितमं सूत्रं वर्तते । शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति – द्विगुरपि तत्पुरुषसञ: स्यात्। संख्यापूर्वो द्विगुश्चेति चकारपाठमात्रेण सञ्ज्ञासमावेशसिद्धेरिदं सूत्रं व्यर्थम्। द्विगोस्ततपुरुषत्वे टजचौ प्रयोजनम्। पञ्चराजम्। "राजाहस्सखिभ्यष्टच्[3] इति टच् । काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– द्विगुश्च समास: तत्पुरुषसञ्ज्ञो भवति। द्विगोस्तत्पुरुषत्वे समासान्ता: प्रयोजनम्। पञ्चराजम्। दशराजम्। द्वग्रह:। त्र्यह:। पञ्चगवम्। दशगवम्।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृतरूपेणार्थं विवृणोति, तस्य काशिकाकार: प्रतिपदं व्याख्याति। अत्र भट्टोजिदीक्षित: सूत्रस्यास्य प्रत्याख्यानमकरोति। स: कथयति यत् अत्र चकारपाठस्य आवश्यकता नास्ति। चकारपाटेन "द्विगुश्च" सूत्रमिदं दीर्घं भूत्वा व्यर्थं भवति।

व्यधिकरणतत्पुरुष: –द्वितीया–तृतीया–चतुर्थी–पंचमी–षष्ठी–सप्तमी तत्पुरुषभेदेन व्यधिकरणतत्पुरुष: अनेकविध:। तत्र द्वितीयातत्तपुरुषस्य इदं सूत्रम्। "द्वितीयाश्रितातीतपतिंगतात्यस्तप्राप्तापन्नै:[4] –

समासप्रकरणे इदं चतुर्विंशतितमं सूत्रं विद्यते। शब्दकौस्तुभकार:भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति – द्वितीयान्तं श्रितादिप्रकृतिकै: सुबन्तै: सहसमस्यते स तत्पुरुष:। कृष्णं श्रित: कृष्णश्रित:। दु:खमतीतो दु:खातीत:। कूपपतित:।ग्रामगत:। तुहिनात्यस्त:। सुखप्राप्त:। सुखापन्न:। इह श्रितादिषु गत्यर्थत्वात्कर्तरि क्त:।अत्यासो व्यतिक्रमो गतिविशेष एव। प्राप्तिरपीह गतिरेव न तु फलम्। एवमापत्तिरपि।यद्वा, श्रित इत्यादावादिकर्मणि क्त:। गमिगाम्यादीनामुपसंख्यानम् । ग्रामं गमी ग्रामगमी।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– सुप् सुपेति वर्त्तते, तस्यविशेषणमेतद् द्वितीया। द्वितीयान्तं सुबन्तं श्रितादिभि: सह समस्यते, तत्पुरुषश्च समासोभवति। कष्टं श्रित: कष्टश्रित:। नरकश्रित:। अतीत– कान्तारमतीत: कान्तारातीत:।नरकपतित:। ग्रामगम:। तरङ्गानत्यस्त: तरङ्गात्यस्त:, तुहिनात्यस्त:। सुखप्राप्त:।सुखापन्न:।

"श्रितादिषु गमिगाम्यादीनामुपसंख्यानम्'। ग्रामं गमी ग्रामगमी ग्रामं ग्रामीग्रामगामी। ओदनं बुभुक्षु: ओदनबुभुक्षु:। यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृतरूपेण अर्थं विवृणोति, तस्य काशिकाकार: विस्तृततया अर्थं विविच्य प्रतिपदंव्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति।

"स्वयं क्तेन[5] –समासप्रकरणे इदं पञ्चविंशतितमं सूत्रं वर्तते। शब्दकौस्तुभकार: सूत्रस्यास्यार्थं करोति – स्वयमित्येतत्सुबन्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते स तत्पुरुष:। ऐकपद्यं समासप्रयोजनम्। तेन "आम एकान्तरम्"[6] इति निघातनिषेध: स्वायंकृतिरिति तद्धितश्च सिध्यति। द्वितीयाग्रहणं तूत्तरार्थतयाऽनुवृत्तमपि नेह सम्बध्यते, स्वयमित्यस्यात्मनेत्यर्थकस्य कर्थकतया द्वितीयान्तत्वानुपपत्ते:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– स्वयमेतदव्ययमात्मनेत्यस्यार्थे वर्तते। तस्य द्वितीयया सम्बन्धोऽनुपपन्न इति द्वितीयाग्रहणमुत्तरार्थमनुवर्तते। स्वयमित्येतत्सुबन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। स्वयन्धौतौ पादौ । स्वयंविलीनमाज्यम् । ऐकपद्यमैक स्वर्यं च समासत्वाद्भवति।

यत्रविषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृतरूपेणार्थं विवृणोति, तस्य काशिकाकार: विस्तृतरूपेणार्थं विविच्य सोदाहरणं प्रतिपदं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति।

"खट्वा क्षेपे'"[7] – समासप्रकरणे इदं षड्विंशतितमं सूत्रमस्ति । शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति – खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते निन्दायाम्। खट्वारूढो जाल्म:। वेदं व्रतानि च समाप्य समावृतेन हिखटवाऽऽरोढव्या। ब्रह्मचर्य एव भूमिशयना)ऽपि य: खट्वामारोहति स जाल्म:।रूढश्चायम्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– खटवाशब्दो द्वितीयान्त:क्तान्तेन सह क्षेपे गम्यमाने समस्यते, तत्पुरुषश्च समासो भवति। क्षेपो निन्दा, स च समासार्थ एव, तेन विभाषाधिकारेऽपि नित्यसमास एवायम्, नहि वाक्येन क्षेपो गम्यते। खट्वारोहणं चेह विमार्गप्रस्थानस्योपलक्षणम्। सर्व एवाविनीत: खटवारूढ इत्युच्यते । क्षेप इति किम्? खटवामारूढ:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृतरूपेणार्थं विवृणोति, तस्य काशिकाकारस्तु अनुकरणमेव करोति। अत्र नास्ति कोऽपि भेद:।

"सामि''[8] -समासप्रकरणे इदं सप्तविंशतितमं सूत्रं विद्यते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति - सामीत्येतदव्ययमर्द्धशब्दपर्याय:। तस्यासत्ववाचित्वाद् द्वितीयया नास्ति सम्बन्ध:। तत्सुबन्तं क्तान्तेन वा समस्यते स तत्पुरुष:। सामिकृतम्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- सामीत्येतदव्ययमर्द्धशब्दपर्याय:, तस्यासत्त्ववाचित्वात् द्वितीयया नास्ति सम्बन्ध:। तत् सुबन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। सामिकृतम्। सामिपीतम्। सामिभुक्तम्। ऐकपद्यमैकस्वर्यं च समासत्वाद्भवति।

अत्र विषयेऽस्मिन् उभयोर्ग्रन्थयोर्मध्ये कोऽपि भेद: नास्ति। भट्टोजिदीक्षितेन अस्य सूत्रस्य वृत्तौ 'वा' इति शब्द: प्रयुक्त:, तस्य काशिकायां नोल्लेख: । 'सामि' शब्द: 'जुगुप्सा' इत्यर्थेऽपि प्रयुज्यते।

"काला:[9] - समासप्रकरणे इदम् अष्टाविंशतितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति - कालवाचिनो द्वितीयान्ता: क्तेन सह प्राग्वत् । अनत्यन्तसंयोगार्थं वचनम्। मासप्रमित:। प्रतिपच्चन्द्र:। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- द्वितीया, क्तेनेति च वर्त्तते। कालवाचिन: शब्दा: द्वितीयान्ता:क्तान्तेन सह समस्यन्ते विभाषा, तत्पुरुषश्च समासो भवति। अनत्यन्तसंयोगार्थं वचनम् । काला इति न स्वरूपविधि:। षण्मुहूत्तश्चिराचरा:। ते कदाचिदहर्गच्छन्ति कदाचिद्रात्रिम्। अहरतिसृता मुहूर्ता: अहस्संक्रान्ता:। रात्र्यतिसृता-मुहूर्ता: रात्रिसंक्रान्ता:। मासप्रमितश्चन्द्रमा:। मासं प्रमातुमारब्ध: प्रतिपच्चन्द्रमा इत्यर्थ:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: सूत्रस्यार्थं विस्तृतरूपेण विवृणोति, तस्य काशिकाकार: विस्तृततया प्रतिपदम् अर्थं विविच्य व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति।

"अत्यन्तसंयोगे च’[10] .समासप्रकरणे इदं नवविंशतितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित:सूत्रस्यास्यार्थं करोति - उक्तान्तार्थं वचनम्। कालवाचिन: शब्दा: द्वितीयान्ता:अत्यन्तसंयागे सुपा सह प्राग्वत्। मुहूर्तं सुखं मुहूर्तसुखम्। मुहूर्तव्यापात्यथ: । "कालाध्वनोरत्यन्तसंयागे"[12] इति द्वितीया। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह-काला इति वर्तते, क्तेनेति निवृत्तम्। अत्यन्तसंयोग: कृत्स्नसंयोग:, कालस्य स्वेन सम्बन्धिना व्याप्ति:। कालवाचिन: शब्दा: द्वितीयान्ता अत्यन्तसंयोगे गम्यमाने सुपा सह समस्यन्ते विभाषा, तत्पुरुषश्च समासो भवति। मुहूर्तं सुखम् मुहूर्तसुखम्। सर्वरात्रकल्याणी। सर्वरात्रशोभना।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृतरूपेणार्थं विवृणोति तस्यैवानुकरणं करोति काशिकाकार:। अत्र वृत्तौ काशिकाकार: प्रतिपदस्य समानार्थीशब्दं कथयित्वा तस्यार्थं प्रतिपादयति, शब्दकौस्तुभे तु वृत्तिमात्रमेव वर्त्तते, वृत्तिमध्ये प्रयुक्तशब्दानां सरलीकरणं तत्र न कृतमस्ति । येन सूत्रार्थावगमने काशिका सरला भवति।

तृतीयातत्पुरुष: तृतीयातत्पुरषे एकं तृतीयान्तं पदं द्वितीयम् प्रथमान्तं पदं च भवति । तथा च सूत्रम् -"तृतीया तत्कृतार्थेन गुणवचनेन"[13] - समासप्रकरणे इदं त्रिंशत्तमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति - तत्कृतेति पृथक् लुप्ततृतीयाकम्। तृतीयान्तं तृतीयान्तार्थ कृतगुणवचनेन अर्थशब्देन च सह समस्यते स तत्पुरुष:। तच्छब्देन तृतीयान्तपरामर्शिना तदर्थो लक्ष्यते। तदर्थकृतत्वं च गुणवचनस्यार्थद्वारकं विशेषणम्। तथा च तृतीयान्तार्थकृतो यो गुणस्तद्ववचनेति फलितोऽर्थ:। शङ्कलया खण्ड:, शंकुलाखण्ड:। किरिणा काण: किरिकाण:। धान्येनार्थो धान्यार्थ:। तत् कृतेनेति किम्? अक्ष्णा काण:। किञ्च यत्र शङ्कुलाखण्डादौ पूर्वोत्तरपदार्थयो: क्रियाकारकभाव: सम्बन्धस्तत्र चरितार्थं वचनम्। यथा 'दध्ना भुङ्क्ते पटु:' इत्यादौ न भवति, असामर्थ्यात्। गुणवचनेनेति किम्? गोभिर्वपावान्। गोसम्बन्धिदध्यादिभोजनाद्देवदत्तस्य वपावत्त्वं पविरत्वमित्यस्ति तत्कृतत्वं न त्वसौ गुणवचन:। वचनग्रहणं किम्? यावता अर्थेन समासासम्भवात्तद्वाची ग्रहीष्यते। अत्राहु:, गुणमुक्तवान् गुणवचन:। गुणमुक्तवता सम्प्रति गुणोपसर्जनद्रव्य वाचिनेत्यर्थ: तेन 'घृतेन 'पाटवम्' इति गुणमात्रनिष्ठेन न भवतीति। गुणश्चात्र "सत्त्वे निविशतेऽपैति" इति वक्ष्यमाणो गृह्यते।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- सुप् सुपेति वर्त्तते, तस्य विशेषणमेतत् तृतीया। तृतीयान्तं सुबन्तं गुणवचनेनाऽर्थशब्देन च सह समस्यते तत्पुरुषश्च समासो भवति। कीदृशेन गुणवचनेन? तत्कृतेन, तदर्थकृतेन, तृतीयान्तार्थकृतेनेति यावत् । शङ्कुलया खण्ड: शङ्कुलाखण्ड:। किरिकाण:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृततरूपेणार्थं विवृणोति, तस्य काशिकाकार: विस्तृततया अर्थं विविच्य प्रतिपदं व्याख्याति। येन सूत्रार्थावगमनेसौकर्यं भवति।

"पूर्वसदृशसमोनार्थकलहनिपुणमिश्रशुद्धणै:''[14]

समासप्रकरणे इदं एकत्रिंशत्तमंसूत्रमस्ति। शब्दकौस्तुभकार: सूत्रस्यार्थं करोति – एतै: सह तृतीयान्तं प्राग्वत्। अस्मादेव वचनात्पूर्वादियोगे तृतीया हेतौ वा द्रष्टव्या।

मासेन पूर्व: मासपूर्व:। मात्रा सदृश: मातृसदृश:। मातृसम:। इह समसदृशाभ्यां योगे "तुल्यार्थैरतुलोपमाभ्यांतृतीयाऽन्यतरस्याम्''[15] इति तृतीया। स्यादेतत् । तुल्यार्थयोगे पक्षे षष्ठ्यप्यस्ति । तत: षष्ठीसमासेनैव सिद्धे किमिह सदृशग्रहणेन। न च "तत्पुरुषे तुल्यार्थ तृतीया'[16] इति, पूर्वपदप्रकृतिस्वरार्थं तत् "सदृशप्रतिरूपयो: सादृश्ये'[17] इति तत् सिद्धे:। न च तत्र सदृशग्रहणमेव मास्त्विति वाच्यम्, षष्ठीसमासपक्षे अन्तोदात्तत्वं वारयितुं तत्स्वीकारावश्यम्भावात् । न चानभिधानात्पषष्ठीसमास एव मास्त्विति वाच्यम्, दास्या: सदृश इति रूपासिद्धिप्रसङ्गात्। ऊनार्थे– माषोनं कार्षापणम्। माषविकलम्।पूर्वसूत्रे अर्थशब्देन समासस्य साधित्वादिह अर्थग्रहणमभिधेयनिद्देशार्थम्। तच्चऊनशब्देनैव सम्बध्यते न तु पूर्वादिभि:।

अत एव समसदृशौ पृथगुपात्तौ। वाक्कलह:, आचानिपुण:। गुडमिश्र: ।आचारशूक्ष्ण:। मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम्। गुडसंमिश्रा धाना: ।अवस्योपसंख्यानम्। मासेनावरो मासावर:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह–पूर्व, सदृश, सम, ऊनार्थ, कलह, निपुण, मिश्र, शूक्ष्ण, एतै: सह तृतीयान्तं समस्यते, तत्पुरुषश्च समासो भवति ।अस्मादेव वचनात् पूर्वादिभिर्योगे तृतीया भवति, हेतौ वा द्रष्टव्या।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृततरूपेणार्थं विवृणोति, प्रतिशङ्काया:समाधानं करोति, तस्य काशिकाकार: विस्तृततया अर्थं विविच्य प्रतिपदं व्याख्याति ।येन सूत्रार्थावगमने सौकर्यं भवति।

"कर्तृकरणे कृता बहुलम्[18]

समासप्रकरणे इदं द्वित्रिंशत्तमं सूत्रं वर्तते । शब्दकौस्तुभकार: सूत्रस्यार्थं करोतिकर्तरि करणे च तृतीया कृदन्तेन सह बहुलं प्राग्वत्। हरिणा त्रातो हरित्रात: नखैर्भिन्न: नखभिन्न:। कृद्ग्रहणे , गतिपूर्वस्यापि ग्रहणान्नखनिर्भिन्न:। कर्तृकरणे किम्?भिक्षाभिरुषित: हेतावियं तृतीया। बहुलग्रहणाच्छतृशानच् क्तवतुप्रभृतिभिर्न। हस्तेनकुर्वन भुञ्जान:, कृतवान्वा। क्वचित् विभक्त्यन्तरमपि समस्यते बहुलग्रहणादेव।पादहारक:। ह्रियते इति हारक:। बाहुलकात्कर्मणि ण्वुल्। गलेचोपक:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– तृतीयेति वर्त्तते । कर्तरि करणेच या तृतीया तदन्तं कृदन्तेन सह समस्यते बहलम. तत्पुरुषश्च समासो भवति[19] ।

सर्वोपाधिव्यभिचारार्थं बहुलग्रहणम्। कर्तरि – अहिना हत: अहिहत:। करणेनखैर्निभिन्न: नखनिर्भिन्न:, परशुच्छिन्न:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार:, भट्टोजिदीक्षित: विस्तृतरूपणाथविवृणोति, तस्यैव काशिकाकार: अनुकरणं करोति।

विशेष: – बहुलम् – बहून् अर्थात् लातीति बहुलम् । अस्मिन् विषये कथितमस्ति –

"क्वचित्प्रवृत्ति:क्वचिदप्रवृत्ति:, क्वचित्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य, चतुर्विधं बाहुलकं वदन्ति।।"

"कृत्यैरधिकार्थवचने'[20]

समासप्रकरणे इदं त्रयस्त्रिंशत्तमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति – स्तुतिनिन्दाफलकमर्थवादवचनमधिकारार्थवचनम्। तत्र कर्तरि करणे च तृतीया कृत्यै: सह प्राग्वत्। पूर्वसूत्रस्यैव प्रपञ्चोऽयम्। काकपेया नदी। शक्यार्थे कृत्य:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह (1) स्तुतिनिन्दाप्रयुक्तमध्यारोपितार्थवचनमधिकार्थवचनम्। कर्तृकरणयोर्या तृतीया तदन्तं सुबन्तं कृत्यै:सह समस्यतेऽधिकार्थवचने गम्यमाने विभाषा. तत्यासमासो भवति। कला––काकपेया नदी, श्वलेहा: कूप:।

करणम्- वाष्पच्छेद्यानि तृणानि, कण्टकसचेय ओदनः। पूर्वस्यैवायं प्रपतः। (कृत्यग्रहणे यण्ण्यतोहण कर्तव्यम्) इह मा भूत् -काकैः पातव्या इति।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः लघुरूपेणार्थं करोति, तस्य काशिकाकारः विस्तृतरूपेणार्थं कृत्वा प्रतिपदं व्याख्याति । शब्दकौस्तुभकारः कृत्यसम्बन्धे निर्देशं न ददाति, काशिकाकारस्तु कथयति यत् कृत्यग्रहणे केवलं यण, ण्यत्, प्रत्यययोर्गदणंकर्तव्यमिति। विशेषः - 1. स्तुतिनिन्दाप्रयुक्तमिति- स्तुत्या निन्दया वा यत्प्रयुक्तं प्रवर्तित तत्स्तुतिनिन्दाप्रयुक्तम्। तदर्थमुच्चारितमित्यर्थः। अध्यारोपितार्थवचनमितिअध्यारोपितोऽर्थोऽसन्नेव बुद्ध्या समारोपितः, तस्य वचनमिति।

“अन्नेन व्यञ्जनम्’[21]

समासप्रकरणे इदं चतुर्विंशतितमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति - संस्कारद्रव्यं संस्कार्येण सह प्राग्वत्। दधना उपसिक्त ओदनो दध्योदनः। इह वृत्तावुपसेकक्रियाऽन्तर्भवति स्वभावात्। अतो नासमर्थ्यम्। न च कारकाणां परस्परमसम्बन्धेऽपि वचनसामर्थ्यादिसमर्थसमास एवात्रास्तु इति वाच्यम्। किन्दध्ना? ओदनो भुज्यताम् इत्यादावतिप्रसङ्गात्। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- तृतीयेति वर्त्तते। व्यञ्जनवाचि तृतीयान्तमन्नवाचिना सुबन्तेन सहसमस्यते विभाषा, तत्पुरुषश्च समासो भवति। संस्कार्यमन्नम्, संस्कारकं व्यञ्जनम्। दध्ना उपसिक्त ओदनः दध्योदनः। क्षीरौदनः । वत्तौ क्रियाया अन्तर्भावादन्नव्यञ्जनयोः सामर्थ्यम्।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः लघुरूपेण सूत्रस्यार्थं विवृणोति, तस्य काशिकाकारः विस्तृतरूपेणार्थं करोति प्रतिपदं व्याख्याति च, येन सूत्रार्थावगमनेसौकर्यं भवति।

"भक्ष्येण मिश्रीकरणम्’’[22]

समासप्रकरणे इदं पञ्चविंशतितमं सूत्रं विद्यते। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यार्थं करोति- खरविशदमभ्यवहार्यं भक्ष्यम्। खरं कठिनम्। विशदं विभक्तावयवम्। भक्ष्येण सह मिश्रीकरणं प्राग्वत् । गुडेन मिश्रा धाना गुडधानाः। इह वृत्तौ मिश्रणक्रियान्तर्भावो बोध्यः। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- मिश्रीकरणवाचि तृतीयान्तं भक्ष्यवाचिना सुबन्तेन समस्यते, तत्पुरुषश्च समासो भवति। खरविशदमभ्यवहार्य भक्ष्यम्, तस्य संस्कारकं मिश्रीकरणम्। गुडेन मिश्रा धानाः गुडधानाः। गुडपृथुकाः। वृत्तौ क्रियाया अन्तर्भावात्पूर्वोत्तरपदयोः सामर्थ्यम्।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः लघुरूपेणार्थं विवृणोति, तस्य काशिकाकारः विस्तृतरूपेणार्थं व्याख्याति, प्रतिपदं व्याख्याति च। अत्र विषयस्य स्पष्टीकरणार्थं एकमन्यम् उदाहरणमपि दत्तमस्ति।

चतुर्थीतत्पुरुषः -

चतुर्थीतत्पुरुषे एकं पदं चतुर्थीविभक्त्यन्तं द्वितीयं पदं प्रथमान्तम् । यथा च सूत्रम् -

"चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः[23]

समासप्रकरणे इदं षड्विंशतितमं सूत्रमस्ति । शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति- चतुर्थ्यन्तार्थाय यत्तद्वाचिना अर्थशब्दादिभिश्च चतुर्थ्यन्तं समस्यते स तत्पुरुषः। यूपाय दारु यूपदारू। कुण्डलहिरण्यम्। नेह रन्धाय स्थाली। कथं तर्हि अश्वघासः, हस्तिविधेजिविधा? अत्र विशेषः अत्र भाष्यम् - अश्वघासादयः षष्ठीसमासा इति। स्यादेतत्। चतुर्थीसमास एव तस्तु। न चैवं "चतुर्थी तदर्थ"[24] इति पूर्वपदप्रकृतिस्वरप्रसङ्गः। प्रकृतिविकारभावे एतत्प्रवृत्तेः। अन्यथा 'गोरक्षितम्' इत्यत्र 'चतुर्थीतदर्थ'[25] इत्येव सिद्धे “क्ते च"[26] इति व्यर्थं स्यात्। न च हीनार्थं तत् ‘गोहितम्’ इत्यत्र तादर्थ्याभावादिति वाच्यम् हिते चेति वक्तव्ये "क्ते च" इति सामान्यवचनस्य ज्ञापकत्वात्। 'रन्धनाय स्थाली' इत्यादौ तु षष्ठीसमासइष्टः तर्हि चतुर्थीसमास एवेष्यतां यथा गोग्रासः, लीलाम्बुजं, क्रीडासरः, वासभवनं, नाट्यशालेति।

अत्राहुः। हितशब्देन तावत् षष्ठीसमासो न सम्भवति, तद्योगे चतुर्थ्या नित्यत्वादिति चतुर्थीसमास एव वक्तव्यः। एवञ्च 'गोरक्षितम्' इत्यत्र न स्यात्, चतुर्थ्या असम्भवात् । षष्ठीतदर्थ इत्यस्य चाप्रसङ्गः, प्रकृतिविकृतिभावात्। अतो रक्षितेनापिचतुर्थीसमास एव

विधेय:। अर्थशब्देनापि योगे तादर्थ्यसम्बन्धस्य नियमेन प्रतीयमानत्वाच्चतुर्थ्या भवितव्यमिति तेनापि चतुर्थीसमास एव वक्तव्य:। यथा बलिसुखग्रहणमपि कर्त्तव्यम्।

अत्रेदं वक्तव्यं तादर्थ्यस्य भानं द्विधा- सम्बन्धत्वेन तद्व्याप्य तादर्थ्यत्वाख्यविशेषरूपेण चेति। तच्चाश्वानां घासोऽश्वेभ्यो घास इति वाक्ये तावद् व्यवस्थितम्। तत्राद्ये समास:, द्वितीये तु नेष्यत इति भाष्यवार्तिकादिप्रामाण्येन निर्णीयते।

अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्। द्विजायायं द्विजार्थ: सूप:। द्विजार्था यवागू:। द्विजार्थं पय:। तत्र नित्यत्वं न्यायसिद्धम्। चतुर्थ्या तादर्थ्यस्योक्तत्वादर्थशब्देन विग्रहो न भविष्यति परवल्लिङ्गतां बाधितुं विशेष्यलिङ्गतामात्रं वाच्यम्।

"चतुर्थीतदर्थ'' इति योगो विभज्यते । तत: "अर्थ:' इत्यनेनांशेन तदर्थवाचिन उत्तरपदस्यार्थादिशो विधीयते। स च वैकल्पिक:, महाविभाषाधिकारात्। तेन यूपार्थं दारु, यूपदारु इत्युभयं भवति।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- सुप् सुपेति वर्त्तते, तस्य विशेषणमेतच्चतुर्थी। तदिति सर्वनाम्ना चतुर्थ्यन्तस्यार्थ: परामृश्यते। तस्मै इदं तदर्थम्। तदर्थ, अर्थ, बलि, हित, सुख, रक्षित, इत्येतै: सह चतुर्थ्यन्तं समस्यते तत्पुरुषश्च समासो भवति। तदर्थेन प्रकृतिविकारभावे समासोऽयमिष्यते। यूपाय दारु यूपदारु। कुण्डलाय हिरण्यम् कुण्डलहिरण्यम्। इह न भवति- रन्धनाय स्थाली, अवहननायोलखमिति। चतुर्थी चास्मादेव ज्ञापकात्तादर्थ्य भवति। (अर्थेननित्यसमासवचनं सर्वलिङ्गता च वक्तव्या) ब्राह्मणार्थं पय:। ब्राह्मणार्था यवागू: ।बलि-कुबेराय बलि: कुबेरबलि:। महाराजबलि:। हित-गोहितम्, अश्वहितम्। सुखगोसुखम्, अश्वसुखम् । रक्षित्-गोरक्षितम्, अश्वरक्षितम्।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृतरूपेणार्थं व्याख्याति, सूत्रे प्रयुक्तं प्रतिशब्दं स्पष्टीकरोति, तस्य काशिकाकार: अनुकरणं कृत्वा साररूपेणार्थं विवृणोति येन सूत्रार्थावगमने सौकर्यं भवति । शब्दकौस्तुभे यत् किञ्चिदपि लिखितमस्ति, तस्य लघुरूपेण सरलार्थमस्ति काशिकायाम्। विषयदृष्ट्या द्वयो:ग्रन्थयोर्मध्ये नास्ति कोऽपि भेद:।

पञ्चमीतत्पुरुष: -

पञ्चमीतत्पुरुषसमासे एकं पञ्चम्यन्तं पदं द्वितीयम् प्रथमान्तं पदम्। तथा च - सूत्रम् -

"पञ्चमी भयेन[27]

समासप्रकरणे इदं सप्तत्रिंशत्तमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति- पञ्चम्यन्तं भयप्रकृतिकेन सुबन्तेन सह प्राग्वत्। चौरभयम्। भयभीतभीतिभीभिरिति वाच्यम्। वृकभीत:। नेह-वुकेभ्यस्त्रास:। पूर्वस्यैव बहुलग्रहणस्यायम्प्रपञ्च:। तेन ग्रामनिर्गतो धर्मजुगुप्सुरित्यादि सिद्धम्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- सुप् सुपेति वर्त्तते, तस्य विशेषणमेतत् पञ्चमी। पञ्चम्यन्तं सुबन्तं भयशब्देन सुबन्तेन सह समस्यते विभाषा,तत्पुरुषश्च समासो भवति। वृकेभ्य: भयम् वृकभयम्। चौरभयम् । दस्युभयम् । यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृतरूपेणार्थं व्याख्याति, तस्य अक्षरश: अनुकरणं काशिकाकार: विधाति ।

विशेष: - प्रकृतसूत्रस्य योगविभागो क्रियते- पञ्चमी । भयेन ।

तदा अस्यार्थमेवमेव भवति

(क) पञ्चमी - पञ्चम्यन्तं सुबन्तं समर्थसुबन्तेन सह समस्यते, तत्पुरुषश्च समासोभवति । यथा - कण्ठच्युत:।

(ख) भयेन - पञ्चम्यन्तं सुबन्तं भयप्रकृतिकेन सुबन्तेन सह समस्यते,तत्पुरुषश्च समासो भवति।

योगविभागेन 'अधर्मजुगुप्सु:' 'भोगोपरत:' इत्यादिषु समासो भवति।

"अपेतापोढमुक्तपतितपत्रस्तैरल्पश:''[28]

समासप्रकरणे इदं अष्टात्रिंशत्तमं सूत्रं वर्तते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति- एतै: सह अल्पं पञ्चम्यन्तं समस्यते स तत्पुरुष:। सुखापेत:। कल्पनापोढ:। चक्रमुक्त:। स्वर्गपतित:। तरङ्गापत्रस्त:। अल्पशब्द इत्युक्ते नेंहप्रासादात्पतित:। बहुलग्रहणस्यैवायं प्रपञ्च:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- अपेत, अपोढ, मुक्त, पतित. अपत्रस्त, इत्येतै: सह पञ्चम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति। कल्पनापोढ:। अल्पश इति समासस्याल्पविषयतामाचष्टे। अल्पा पञ्चमी समस्यते न सर्वा।

प्रासादात्पतित:, भोजनादपत्रस्त इत्येवामादौ न भवति। "कर्तृकरणे कृताबहुलम्" इत्यस्यैवायं प्रपञ्च:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृतरूपेणार्थं करोति, तस्य काशिकाकारस्तु विस्तृतरूपेणार्थं विवेचयन् व्याख्याति। येन सूत्रार्थावगमने सौकर्यं भवति।

"स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन''[29]

समासप्रकरणे इदं एकोनचत्वारिंशत्तमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति - एतानि क्तेन सह प्राग्वत्। स्तोकान्मुक्त:। अल्पान्मुक्त:। अन्तिकादागत:। अभ्याशादागत:। दूरादागत:। कृच्छ्रान्मुक्त:। "पञ्चम्या: स्तोकादिभ्य:[30] इत्यलुक्। पर: शतशब्दस्तु "नाज्झलौ''[31] इत्यत्र व्युत्पादित:। एवं पर: सहस्त्रोऽपि।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- स्तोक, अन्तिक, दूर, इत्येवमर्था: शब्दा: कृच्छ्रशब्दश्च पञ्चम्यन्ता: क्तान्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति। स्तोकान्मुक्त:। अन्तिकादागत:। अभ्याशादागत:। दूरादागत:, विप्रकृष्टादागत:। कृच्छ्रान्मुक्त:, कृच्छ्राल्लब्ध:। "पञ्चम्या: स्तोकादिभ्य:' इत्यलुक्। (शतसहस्त्रौ परेणेति वक्तव्यम्) शतात्परे परश्शता:। सहस्त्रात्परे परस्सहस्त्रा:। राजदन्तादित्वात् परनिपात:। निपातनात्सुडागम:। यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृतरूपेणार्थंविवृणोति, तस्य काशिकाकार:, विस्तृततया अर्थं विविच्य प्रतिपदं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति। द्वयोर्ग्रन्थयोर्मध्ये एष: भेदोऽस्ति यत् काशिकाकार: काशिकायां वार्तिकस्यापि उल्लेखं विधाति तद्यथा- (शतसहस्त्रौ परेणेति वक्तव्यम्) ।

षष्ठीतत्पुरुष: -

षष्ठीतत्पुरुषे एकं षष्ठयन्तं पदं द्वितीयम् प्रथमान्तं पदं भवति । तत्र सूत्रम् -

षष्ठी

षष्ठयन्तं पदं समर्थन सह समस्येते इति सूत्रार्थ:। राज्ञ: पुरुष: राजपुरुष: इति ।

अर्धं नपुंसकम् -

षष्ठयन्तं पदं अर्धं इति पदे सह समस्यते । पिपल्या: अर्धं अर्धपिप्पली इति: ।

पूर्वापराधरोत्तरमेकदेशिनैकाधिकारणे -

अवयववाचिन: पूर्वादय: अवयवविना षष्ठ्यन्तेन सह समस्यते इति सूत्रार्थ:। कायस्य पूर्व: पूर्वकाय: इति।

सप्तमीतत्पुरुष: -

सप्तमीतत्पुरुषे एकं सप्तम्यन्तं पदं द्वितीयं च प्रथमान्तं पदं भवति । तथा च सूत्रम् -

"सप्तमी शौण्डै:[32]

समासप्रकरणे इदं चत्वारिंशत्तमं सूत्रमस्ति । शब्दकौस्तुभकार: अस्य सूत्रस्यार्थं विवेचयन्नाह सप्तम्यन्तं शौण्डादिभिस्सह प्राग्वत्। अक्षशौण्ड:। बहुवचननिर्देशादाद्यर्थावगति:। ननु अर्थनिर्देशार्थं बहुवचनम्। तेन समासार्थं वा बहुवचनं किन्न स्यादिति चेत्? न, गणपाठवैयर्थ्यांपत्ते:। स्यादेतत्। कारकाणां क्रिययैव सम्बन्ध इति तावास्थितम्। तदिह "अक्षशौण्ड:'' इत्यादौ सप्तम्यर्थ: क्वान्वेतु, क्रियाया अश्रवणात्? सत्यम्, प्रसक्तिरूपा क्रिया वृत्ताविहान्तर्भवति तदद्वारकमेव च सामर्थ्य यथा दध्योदनगुडधानादिषु । अन्त: शब्दोऽत्र पठ्यते । तद्योगे अवयविन आधारत्व विवक्षायां सप्तमी। यथा वृक्षेशाखेति। वनेऽन्तर्वनान्त:।

अस्य वैकल्पिकत्वापक्षेऽव्ययीभाव:। अन्तर्वणम्। अत्रेदं वक्तव्यं, नायं विभक्त्यर्थेऽव्ययीभावस्य विषय:, विभक्त्यर्थमात्रवृत्तेरव्ययस्य स इत्युक्तत्वात् । काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- सप्तम्यन्तं शौण्डादिभि: सह समस्यन्ते, तत्पुरुषश्च समासो भवति। अक्षेषु शौण्डोऽक्षशौण्ड:। अक्षधूर्त:। अक्षकितव:। शौण्ड। धूर्त। कितव। व्याड। प्रवीण। संवीत। अन्तर्। अन्तश्शब्दस्त्वत्राधिकरणप्रधान एव पठ्यते। अधिपटु। पण्डित। कुशल। चपल। निपुण (1)। वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादक्षादिषु अधिकरणे सप्तमी।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं विस्तृणरूपेण विवृणोति, तस्य काशिकाकार: विस्तृततया अर्थं विविच्य प्रतिपदं व्याख्याति। काशिकाकार: शौण्डादीनां शब्दानाम् उल्लेखं करोति, तत्तु शब्दकौस्तुभे न प्राप्यते। येनसूत्रार्थावगमने सौकर्यं भवति।

विशेष: - (1) संव्याड, मन्थ, समीर एते शब्दा अपि क्वचिद् दृश्यन्ते।

"सिद्धशुष्कपक्वबन्धैश्च[33]

समासप्रकरणे इदं एकचत्वारिंशत्तमं सूत्रमस्ति। शब्दकौस्तुभकार:भट्टोजिदीक्षित:: सूत्रस्यास्यार्थं करोति - एतै: सप्तमी प्राग्वत्। साङ्काश्यसिद्ध:।काम्पिल्यासिद्ध:। आतपशुष्क:। स्थालीपक्व:। चक्रबन्ध:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- सप्तमीति वर्तते। सिद्ध, शुष्क,पक्व, बन्ध, इत्येतै: सह सप्तम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति। (1) सांकाश्यसिद्ध:। काम्पिल्यसिद्ध:। शुष्क-आतपशुष्क:, छायाशुष्क:। पक्वस्थालीपक्व:, कुम्भीपक्व:। बन्ध:-चक्रबन्ध:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: सूक्ष्मरूपेणार्थं करोति। तस्य काशिकाकारस्तु विस्तृततया अर्थं विवृणोति, काशिकायामुदाहरणानां संख्या अधिका वर्तते । येन सूत्रार्थागवमने सौकर्यं भवति ।

"ध्वाक्षेण क्षेपे"[34]

समासप्रकरणे इदं द्वाचतुर्विंशतित्तमं सूत्रं वर्तते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति:-ध्वङ्क्षवाचिना सह सप्तम्यन्तं प्राग्वन्निन्दायाम्। तीर्थे वाङ्क्ष इव तीर्थध्वाङ्क्ष:। तीर्थकाक:। क्षेपे किम्? ध्वाङ्क्षस्तिष्ठति।

काशिकाकारस्तु अस्य सूत्रस्यार्थं करोति-ध्वङ्क्षणेत्यर्थग्रहणम्। ध्वाङ्क्षवाचिना सह सप्तम्यन्तं सुबन्तं समस्यते तत्पुरुषश्च समासो भवति क्षेपेगम्यमाने।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृतरूपेणार्थं विवृणोति, तस्य काशिकाकारस्तु विस्तृततया अर्थं विविच्य प्रतिपदं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति। काशिकाकारस्तु भाष्योक्तम् सर्वं पक्षम् उपस्थाय प्रतिपदम् अर्थं विवृणोति।

"कृत्यैर्ऋणे'[35]

समासप्रकरणे इदं त्रयश्चत्वारिंशत्तमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति - सप्तम्यन्तं कृत्प्रत्ययान्तै: सह प्राग्वदावश्यके। ऋणग्रहणमावश्यकोपलक्षणार्थम् । यत्प्रत्ययान्तेनैवेष्यते, अल्पश इत्यनुवृत्ते:। कृत्यैरिति बहुवचनं तु प्रकृतिभेदाभिप्रायम् । मासे देयमृणम्। पूर्वाह्णे गेयं साम। "तत्पुरुषे कृति बहुलम्"[36] इत्यलुक्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह-सप्तमीति वर्तते । कृत्यप्रत्ययान्तै सह सप्तम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति ऋणे गम्यमाने। यत्प्रत्ययेनवेष्यते। मासे देयमृणं मासदेयम्। संवत्सरदेयम्। व्यहदेयम्। ऋणग्रहणं नियोगोपलक्षणार्थम्, तेनेहापि समासो भवति - पूर्वाह्णे गेयं साम, प्रातरध्येयोऽनुवाक:। ऋण इति किम्?

मासे देया भिक्षा । यत्र विषयेऽस्मिन् शब्दकौस्तुभकार : भट्टोजिदीक्षित: विस्तृतरूपेणार्थं विवृणोति, तस्य काशिकाकारो विस्तृततया अर्थं विविच्य प्रतिपदं व्याख्याति तथा शब्दकौस्तुभापेक्षया अधिकोदाहरणानाम् उल्लेखं करोति, येन सूत्रार्थवगमने सौकर्य भवति।

विशेष: - 'मासदेयम्' तथा 'मासेदेयम्' अत्र प्रयोगद्वयं शुद्धमस्ति। 'मासेदेयम्' इत्यत्र "तत्पुरुषे कृति बहुलम्" इत्यलुक्।

"संज्ञायाम्''[37]

समासप्रकरणे इदं चतुश्चत्वारिंशत्तमं सूत्रं विद्यते। शब्दकौस्तुभकारो भट्टोजिदीक्षित: सूत्रस्यार्थं करोति - सप्तम्यन्तं सुपा प्राग्वत्संज्ञायाम्। नित्यसमासोऽयम्, वाक्येन संज्ञानवगमात्। अरण्येतिलका:। अरण्येमाषा:। वनेकसेरुका:। "हलदन्तात्सप्तम्या: संज्ञायाम्''[38] इत्यलुक्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं - विवेचयन्नाह - संज्ञायां विषये सप्तम्यन्तं सुपा सह समस्यते, तत्पुरुषश्च समासो भवति। संज्ञा समुदायोपाधि:। तेन नित्यसमास एवायम्, नहि वाक्येन संज्ञा गम्यते। अरण्येतिलका:। अरण्येमाषा:। वनेकिंशुका:। वनेबिल्वका:। कूपेपिशाचका:। "हलदन्तात् सप्तम्या: संज्ञायाम्' इत्यलुक् ।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारो विस्तृततया अर्थं विवृणोति, तस्यैव अक्षरशः अनुकरणं करोति काशिकाकारः। काशिकाकारः विषयं सरलीकर्तुं उदाहरणानां प्रयोगम् अधिकं करोति।

"क्तेनाहोरात्रावयवाः[39]

समासप्रकरणे इदं पञ्चचत्वारिंशत्तमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति– अन्हो रात्रेश्चावयवाः सप्तम्यन्ताः क्तान्तेन सह प्राग्वत्। पूर्वाह्णकृतम्। अपराह्णकृतम्। पूर्वरात्रकृतम्। अपररात्रकृतम्। अवयवग्रहणं किम्? अन्हि दृष्टम्। कथं तर्हि "रात्रिवृत्तमनुयोक्तुमुद्यता'' इति? "कर्तृकरणे कृता बहुलम्"[40] इति भविष्यति। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह – अहरवयवा रात्र्यवयवाश्च सप्तम्यान्ताः क्तान्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति। पूर्वाह्णकृतम्। अवयवग्रहणं किम्? अहनि भुक्तम्, रात्रौ वृत्तम् बहुलग्रहणाद् रात्रिवृत्तम्, सन्ध्यागार्जितमित्यादयः।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेणार्थं विवृणोति, तस्य काशिकाकारो विस्तृतया अर्थं विविच्य प्रतिपदं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति।

"तत्र[41]

समासप्रकरणे इदं षड्चत्वारिंशत्तमं सूत्रमस्ति। शब्दकौस्तुभकारो भट्टोजिदीक्षितः सूत्रस्यार्थं करोति– तत्रेत्येतत्सप्तम्यन्तं क्तान्तेन सह प्राग्वत् । तत्रभुक्तम्।

तत्रकृतम्। यद्यपि अभिहितः सोऽर्थोऽन्तर्भूत इति तत्रशब्दात् प्रथमैव युक्ता, तथापि 'तत्रभवान्' इत्यादौ विभक्त्यन्तरेऽपि दर्शनादधिकरण प्रतिपादने तत्र शब्दादपि सप्तम्येवापेक्ष्येति वृत्तिकृतो मन्यनते।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह तत्रेत्येतत् सप्तम्यन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। तत्रभुक्तम्। तत्रकृतम्। तत्रपीतम्। ऐकपद्यमैकस्वयं च समासत्वाद्भवति।

यत्रविषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेणार्थं विवृणोति, तस्य काशिकाकारो प्रतिपदम् अर्थं विविच्य व्याख्याति, येन सूत्रार्थावगमने सौकर्यंभवति।

"क्षेपे[42]

समासप्रकरणे इदं सप्तचत्वारिंशत्तमं सूत्रमस्ति। शब्दकौस्तुभकारो भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति – सप्तम्यन्तं क्तान्तेन प्राग्वत् निन्दायाम्। अवतप्तेनकुलस्थितं तवैतत्।

"कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्"[43] इति नकुलस्थितशब्देन समासः। उदकेविशीर्णम्। प्रवाहेमूत्रितम्। भस्मनिहुतम्। निष्फलमित्यर्थः। "तत्पुरुषे कृति बहुलम्"[44] इत्यलुक्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– क्षेपो निन्दा। क्षेपे गम्यमाने सप्तम्यन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। अवतप्तेनकुलस्थितं तत्रैवतत् । चापलमेतत्, अनवस्थितत्वं तवैतदित्यर्थः। उदकेविशीर्णम्। प्रवाहेमूत्रितम्? । भस्मनिहुतम्। निष्फलं यत्क्रियते तदेवमुच्यते । "तत्पुरुषे कृति बहुलम्' इत्यलुक् ।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः विस्तृतरूपेण अर्थं विवृणोति, तस्यैव काशिकाकारः अनुकरणं करोति, येन सूत्रार्थवगमने सौकर्यं भवति ।

"पात्रेसमितादयश्च[45]

समासप्रकरणे इदं अष्टाचत्वारिंशत्तमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति – एते निपात्यन्ते क्षेपे। ये चात्र क्तान्तास्तेषां पूर्वेण सिद्धेः पुनः पाठो युक्तारोह्यादित्वसिद्ध्यर्थः। युक्तारोह्यादिषु हि पात्रेसमितादयश्चेति पठ्यते। पात्रेसमिताः। भोजनसमय एव सङ्गता इत्यर्थः। पात्रेबहुलाः। भोजने एव सङ्घीभवन्ति न कार्ये इत्यर्थः। उदुम्बरमशकः। उदुम्बरकृमिः। कूपकच्छपः। कूपमण्डूकः। कुम्भमण्डूकः। उदपानमण्डूकः। नगरकाकः। मातरिपुरुषः। पिण्डीशूरः। पिण्डीओदनपिण्डः। तत्रैव शूरो नान्यत्रेत्यर्थः। गेहेशूरः। गेहेनर्दी। गहेछेदी। गेहेविजिती। गेहेव्याडः। गेहेधृष्टः। गर्भेतृप्तः। आखनिकबकः। आखनिको जलस्त्रोतः। गोष्ठेशूरः। गोष्ठेविजिती। गोष्ठेछेदी। गोष्ठेपटुः। गोष्ठेपण्डितः। गोष्ठेप्रगल्भः। कर्णेटिरिटिरा। कर्णेचुरुचुरा। आकृतिगणोऽयम् ।

चकारोऽवधारणार्थः। तेन 'परमाः पात्रे समिताः' इति वाक्यमेव भवति न तु"सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः[46]इत्यादिना समासान्तरम् ।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह–समुदाया एव निपात्यन्ते । पात्रेसमितादयः शब्दास्ततपुरुषसंज्ञा भवन्ति क्षेपे गम्यमाने। पात्रेसमिताः। एवमेव शब्दकौस्तुभे प्रयुक्तानि उदाहरणानि अत्रापि प्रयुक्तानि सन्ति ।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेणार्थं करोति, तस्य काशिकाकारः सरलरूपेणार्थं कृत्वा व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति । द्वयोर्ग्रन्थयोर्मध्ये कोऽपि भेदः नास्ति।

समानाधिकरणतत्पुरुषः

समानाधिकरणतत्पुरुषे उभयं समानविभक्तिं पदं भवति। तत्र क्वचित् विशेषणवाचकं पदं पूर्वं भवति, क्वचित् उपमानवाचकं पूर्वं भवति, क्वचित् उपमेयवाचकं पदं पूर्वं भवति । अतः समानाधिकरणतत्पुरुषस्य निम्नलिखिताः भेदाः सन्ति। विशेषणपूर्वकर्मधारयः यथा– नीलोत्पलम्, वीरपुरुषः, सत्पुरुषः, महावैयाकरणः, केवलवैयाकरणः, पापनापितः इत्यादयः।

उपमानपूर्वकर्मधारयः। अत्र उपमानवाचकं पदं पूर्वं तिष्ठति उपमेय वाचकं च पदं अन्ते तिष्ठति । यथा – घनश्यामः।

उपमेयपूर्वकर्मधारयः। अत्र उपमेयवाचकं पदं पूर्वं तिष्ठति। यथा – परुषव्याघ्रः, नृसोमः इत्यादि। उपर्युक्तानां भेदानां सूत्रपुरस्सरं विवेचनं प्रस्तूयते –

"पूर्वकालैकसर्वजरत्पुराणनवकेवलास्समानाधिकरणेन''[46]

समासप्रकरणे इदं एकोनपञ्चाशत्तमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति– एते सप्त सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते, स तत्पुरुषः। पूर्वकाल इत्यर्थनिर्देशः। अन्येषां षण्णां स्वरूपग्रहणम् । पूर्वकालोऽपरकालेन समस्यते, पूर्वत्वस्य ससम्बन्धित्वात्। पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। अत्र क्रियाशब्दत्वात्पाचकपाठकवत्पर्यायः प्राप्तः। एकशाटी। शाटशब्दाजातिलक्षणो ङीष्। सर्वयाज्ञिकाः। जरत्तार्किकाः। पुराणमीमांसकाः। नवपाठकाः। केवलवैयाकरणाः। समानाधिकरणे किम्? एकस्याः शौक्ल्यम्। षष्ठी समासस्त्विह न भवति "गुणेन न'' इति निषेधात्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– सुप् सुपेति वर्त्तते, तस्य विशेषणमेतत्। पूर्वकाल, एक, सर्व, जरत्, पुराण, नव, केवल इत्येते सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते, ततपुरुषश्च समासो भवति। भिन्नप्रवृत्तिनिमित्तस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः समानाधिकरण्यम्। पूर्वकाल इत्यर्थनिर्देशः, परिशिष्टानां स्वरूपग्रहणम्। पूर्वकालोऽपरकालेन समस्यते। स्नातानुलिप्तः। कृष्टसमीकृतम्। दग्धप्ररूढम्। एकशाटी। एकभिक्षाः। सर्वदेवाः। सर्वमनुष्याः। जरद्धस्ती। जरद्दृष्टिः।

जरवृत्तिः। पुराणानन्नन्नम्। पुराणावसथम्। नवान्नम्। नवावसथम्। केवलान्नम्।समानाधिकरणेनेति किम्? एकस्याः शाटी?

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेणार्थं करोति, तस्य काशिकाकारस्तु विस्तृततया अर्थं विविच्य प्रतिपदं व्याख्याति, विषयदृष्ट्या नास्ति कोऽपि भेदः उभयोर्ग्रन्थयोर्मध्ये।

विशेषः – प्रकृतसूत्रघटितप्रयोगेषु कर्मधारयः समासः अपि भवितुमर्हति, परञ्च तत्र कर्मधारये समासे समस्यमानपदानाम् पौर्वापर्यक्रमः पूर्वनिपातसम्बन्धे निश्चितः न भवति? प्रकृतसूत्रस्य प्रयोजनमस्ति – समस्यमानां पदानां क्रमस्यनिश्चितकरणम्।

"दिक्संख्ये संज्ञायाम्"[47]

समासप्रकरणे इदं पञ्चाशत्तमं सूत्रं विद्यते। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यार्थं करोति – समानाधिकरणेनेत्यापादपरिसमाप्तेरनुवर्तते। दिक्संख्येसंज्ञायामेव समानाधिकरणेन समस्येते नान्यत्र। पूर्वेषुकामशमी। पञ्चाम्रः। सप्तर्षयः? नेह– उत्तरा वृक्षाः, पञ्च ब्राह्मणाः। पूर्वसूत्रमित्यादौ त्वदिग्वाचित्वात्समासः। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– समानाधिकरणेनेत्यापादसमाप्तेरनुवर्तते। दिग्वाचिनः शब्दाः संख्या च समनाधिकरणेन सुबन्तेन सह समस्यन्ते, ततपुरुषश्च समासो भवति संज्ञायां विषये। पूर्वेषुकामशमी। अपरेषुकामशमी। संख्या– पञ्चाम्राः, सप्तर्षयः। सञ्ज्ञायामिति किम्? उत्तराः वृक्षाः, पञ्चब्राह्मणाः।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारःभट्टोजिदीक्षितः विस्तृतरूपेणार्थं करोति, तस्य काशिकाकारः सरलभाषायाम् अर्थ कृत्वा व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति ।

पूर्वकालैक। पूर्वकाले 'त्यर्थनिर्देशः। इतरेषां तु षण्णां स्वरूपग्रहणम्। पूर्वत्वस्य ससंबनिधकत्वात्पूर्वकालोऽपरकालेन समस्यते । तथैवोदाहरति-स्नातानुलिप्त इति। अत्र क्रियाशब्दत्वात्पाचकपाठकवत्पर्यायः। याज्ञिका इत्यादि। यज्ञमधीयते विदन्ति वा याज्ञिकाः। 'क्रतूक्थादी 'ति ठक्। एवं नैयायिकाः 'जीर्यतेरतृन्' इति भूतेर्थेऽतृन्। जरन्तश्च ते नैयायिकाश्च । जीर्णनैयायिका इत्यर्थः। मीमांसामधीयते विदन्ति वा मीमांसकाः। क्रमादिभ्यो वुन्'। नवपाठका इति। पठन्तीति पाठकाः। ण्वुल्तृचौ' इति ण्वुल्। संख्यावाची न शब्दोऽत्र न गृह्यते, 'दिक्सङ्खये संज्ञाया'मिति नियमात् । समानाधिकरणेनेति किम् ? एकस्याः शौक्लथम्। षष्ठीसमासोऽपि इह न भवति, 'पूरणगुणे 'ति निषेधात्। दिक्सङ्ख्ये संज्ञायाम्। नियमार्थमिति। 'तत्पुरुषे संज्ञायामेव दिक्सङ्ख्ये समस्येते' इति नियमशरीरम्। तेन पञ्चगुरित्यादि सिद्ध्यति। कथं तर्हि 'त्रिलोकनाथः पितृ सद्मगोचरः' इति कालिदासः। त्रिलोकशब्दस्याऽसंज्ञात्वात्। न च समाहारे द्विगुः, 'द्विगोः' इति ङीप्रसङ्गात्। न च पात्रादित्वं कल्प्यं, 'यदि त्रिलोकी गणना परा स्या'दित्यादिप्रयोगाणामसङ्गत्यापत्तेः। न च 'उत्तरपदे' इति समासः त्रिपदतत्पुरुषस्येह दुर्लभत्वात्। अत्राहुः- लोकशब्दोऽत्र लोकसमुदायपरः। त्र्यवयवो लोकस्त्रिलोकः। शाकपार्थिवादित्वादुत्तरपदलोप' इति। पञ्च ब्राह्मणा इति। यद्यप्यत्र कृतेऽपि समासे रूपे विशेषो नास्ति, तथापि विभक्त्य न्वये पञ्चभिर्ब्राह्मणैरित्यादो विशेषो बोध्यः। तद्धितार्थो। असंज्ञार्थं वचनम्। एकापि सप्तमी विषयभेदाद्भिद्यतइत्याशयेनाह- तद्धितार्थे विषये इत्यादि। यदि तु 'तद्धितार्थे वाच्ये' इति व्याख्यायेत, तर्हि 'पौर्वशाल' इत्यादौ तद्धितो न स्यात्, तदर्थस्य समासेनैवोक्तत्वात् । 'द्विगोलुंगनपत्ये' इति ज्ञापकादुक्तेऽपि तद्धितार्थे तद्धितो भवतीति कल्पनायां प्रतिपत्तिगौरवमिति भावः। तद्धिते परे' इति तु न व्याख्येयमेव, तद्धिते परतः समासः, समासे कृते 'दिक्पूर्वपदा 'दित्यादिना तद्धित इत्यन्योन्याश्रयप्रसङ्गात् ।

समाहारे च वाच्ये इति। तेन 'पञ्चगव'मित्यादौ समासेनैव समाहारस्योक्तत्वात्समूहार्थप्रत्ययो नोत्पद्यते। अन्यथा अत्र 'गोरतद्धितलुकी 'ति टन स्यात्, सामूहिकप्रत्ययस्य 'द्विगोलुंगनपत्ये' इति लुक्प्रवृत्तेरिति भावः। सर्वनाम्न इति। एतच्च पूर्वापरोदाहरणान्वयि। यद्यपि 'स्त्रियाः पुंव'दित्यनेनापि प्रकृतरूपसिद्धिः, तथाप्युत्तर पूर्वेत्याद्यर्थं 'सर्वनाम्न' इति वचनमावश्यकं, प्रतिपदोक्तत्वादिहापि तदुपन्यासो न्याय्य इति भावः। वृत्तिमात्रे इति। तद्धितवृत्तौ समासवृत्तौ चेति कैयटः। आकार उदात्त इति। असति त्ववान्तरे तत्पुरुषे पूर्वपदप्रकृतिस्वरेण पूर्वशब्दस्याद्युदात्तत्वमेव स्यादिति भावः। पाण्मातुर इति। 'मातुरुत्सङ्ख्यासंभद्रपूर्वायाः' इत्युदादेशः। 'अनपत्ये' इत्युक्तेः 'द्विगोर्ख'गिति लुग् न। विकल्पो प्राप्त इति। 'महाविभाषये 'ति शेषः। ततश्च तत्पुरुषप्रयुक्तटभावे 'पञ्चगोधन' इत्यपि स्यादिति भावः। मनोरमायां तु-विकल्पे प्राप्ते नित्यसमासार्थं द्वन्द्वतत्पुरुषयोरित्येतद्वचन मिति प्राचां ग्रन्थमनुसृत्योक्तम्। वस्तुतस्तु त्रयाणां समासे कृतेऽन्यपदार्थोपसङ्क्रमेण परस्परसंबन्धाऽभावावन्द्वतत्पुरुषयोरप्राप्तौ सत्यां वचनमिदमित्यादि स्थितम्। द्वन्द्वस्योदाहरणं तु-वाक् च दृषच्च प्रिये अस्य वाग्दृषदप्रियः। छत्रोपानहप्रियः। इह त्रिपदे बहुव्रीहौ कृते पूर्वयोर्नित्यं द्वन्द्वः, तेन'दन्ताच्चूदषहान्ता 'दिति समासान्तष्टजपि नित्य एव। गोरतद्धित। 'तत्पुरुषस्ये 'त्यनुवर्तते, टच्च, तदाह-गोन्तादित्यादि। ननु ग्रहणवता प्रातिपदिकेन तदन्तविधेरभावात्तत्पुरुषस्यावयवो यो गोशब्दस्तमासृजित्यर्थः स्यात्। तथा च 'गोमूत्र'मित्यादावतिप्रसङ्गः स्यादत आह- समासान्त इति।

अयं भावः'समासान्ताः' इत्यधिकाराट्टचा समासान्तेन भवितव्यम्, गोरिति पञ्चमीश्रवणात्ततः परेणापि। न चैतत्तदन्तविधिमन्तरेणोपपद्यत इति सामर्थ्यात्तदन्तविधिलाभः, ततश्च तत्पुरुषस्येति षष्ठ्यन्तं पञ्चम्यन्तेन विपरिणम्यत इति । न तु तद्धितलुकीति। लुग्विषय इत्यर्थो, न तु तद्धितल्लुकि सतीति, समासान्तानामन्तरङ्गत्वात्। अतद्धितलुकीति किम् ? पञ्चभिर्गोभिः क्रीतः पञ्चगुः। अत्र तद्धितस्य ठको' ऽध्यर्धपूर्वेति लुक् । सङ्ख्यापूर्वो द्विगुः। अत्रोक्त इति। अयं भावः- पूर्वसूत्रविषय एवेयं संज्ञा, 'अनन्तरस्यैवेति न्यायात्। एतदर्थमेव हि सूत्रद्वयं कृतम्, अन्यथा 'दिक्संख्ये संज्ञायां तद्धितार्थोत्तरपदसमाहारेष्वि'त्येव ब्रूयात्। तेन 'सप्तर्षय' 'इगन्तकालकपाले 'त्यादिना पूर्वपदप्रकृतिस्वरो न भवति, किन्तु समासान्तोदात्त एव। तथा च लक्ष्यं, 'सप्त ऋषयस्तपसे ये निषेदुः'। 'सप्तऋषीणां सुकृतां यत्र लोकः' इत्यादि। त्रिविधः संख्यापूर्व इति। तद्धितार्थे विषये, उत्तरपदे च परतः, समाहारे च वाच्ये संख्यापूर्वो यः समासः स इत्यर्थः। तद्धितार्थे यथा- पञ्चकपालः। 'संस्कृतं भक्षाः' इत्यणो 'द्विगोलुंगनपत्ये' इति लुक्। उत्तरपदे यथा- पञ्चनावप्रियः। 'नावो द्विगोः' इति समासान्तष्टच् । समाहारे-पञ्चपूली। द्विगोः' इति ङीप्। द्विगुरेकवचनम्। वक्तीति वचनम्। बाहुलकात्कर्तरि ल्युट्। 'सामान्ये नपुंसकम्'। द्विगुः समासएकार्थप्रतिपादको भवतीत्यर्थः। न च वस्तुतोऽनेकार्थस्यैकार्थत्वं कथंचिदुपपद्यत इति सामर्थ्याददतिदेशः संपद्यत इत्याह- एकवत्स्यादिति। 'समाहरे' इति तूपसङ्ख्यानाल्लभ्यते। समाहारे यो द्विगुस्तदर्थ एकवदित्यन्वयः।

समाहारे किम् ? तद्धितार्थे माभूत्। पञ्चसु कपालेषु संस्कृताः पञ्चकपालाः, पञ्चभिर्गोभिः क्रीताः पञ्चगवः पटः। पञ्चगवे पञ्चगवानीत्यत्र तु प्रथम द्विग्वर्थस्यैकवद्भावे कृते योऽयमेकषेषे कृते द्विग्वर्थसमुदायस्तस्याऽद्विग्वर्थत्वाद्बहिरङ्गत्वाश्चैकवद्भावो न भवतीति स्थितमाकरे। यदा 'तद्धितार्थ 'इति सूत्रे 'समाहारे' इति कर्मसाधनस्तदा समाहृतप्रधानो द्विगुरिति बहुत्वे प्राप्तेऽनेन एकवद्भावः क्रियते। यदा तु भावसाधन एव समाहारस्तदा समूहप्रधानत्वाद्विगोः, समूहस्य चैकत्वात्सिद्धमेकत्वमिति नास्य प्रयोजनम् । न च 'स नपुंसक'मिति नपुंसकत्वार्थमेकत्वविधानमितिवाच्यं, समुदायवाचकेषु 'सामान्ये नपुंसक'मित्यभ्युपगमे बाधकाऽभावादित्याहुः। वस्तुतस्तु 'तद्धितार्थ 'इति सूत्रे समाहार इति भावे घन तु कर्मणि। 'पञ्चगव'मित्यत्र पञ्च गावः समाहृता इत्यर्थाभ्युपगमे समाह्रियमाणानां बहुत्वेन एकवचनानुपपत्तेः। न च 'द्विगुरेकवचन मिति सूत्रान्नैवमिति वाच्यम्, पञ्चखट्वीत्यसिद्धेः। तत्र हि पञ्च खट्वाः समाहृताः, पञ्चसु खट्वासु समाहृतास्वित्येवं विग्रहसंभवेन नियतविभक्तित्वाऽभावादेकविभक्ति चापूर्वनिपाते इत्यप्रवृत्तेरनुपसर्जनत्वात् 'गोस्त्रियो 'रिति ह्रस्वो न स्यात्। ततश्च 'आबन्तो वे'ति स्त्रीत्वपक्षे 'द्विगोः' इत्यदन्तलक्षणो ङीन्न स्यात्। भावसाधनत्वे त्वेकविभक्तित्वार्दुपसर्जनत्वमव्याहतमेव। समाहारापेक्षया नियमेन वर्तिपदानां षष्ठ्यन्तत्वात्, तथा च पञ्चखट्वीत्यादिरूपं निर्बाधमेवेति दिक्।

स नपुंसकमिति। एतस्यार्थो मूल एव स्फुटीभविष्यति। कुत्सितानि। 'कुत्स अवक्षेपणे' कर्मणि क्तः। स च 'मतिबुद्धी'ति सूत्रे चकारस्याऽनुक्तसमुच्चयार्थत्वाद्वर्तमाने विहित इत्याशयेनाह-कुत्स्यमानानीति। तत्प्रतिपादकानीत्यर्थः। उभयत्र बहुवचननिर्देशः स्वरूपविधिनिरासार्थः। वैयाकरणखसूचिरिति। सूचयतेः 'अच इः'। यः पृष्टः सन् प्रश्नं विस्मारयितुं खं सूचयत्यभ्यासवैधुर्यात्स एवमुच्यते, न तु वस्तुतो व्याकरणं, तदध्ययनं वा कुत्सितम्, वेदाङ्गत्वेन तस्य प्रशस्तत्वात्। तथापि तस्य प्रतिभानाऽभावेन निष्फलत्वात्कुत्स्यते। दुर्दुरूढ इति। 'दुल उत्क्षेपे' दुपूर्वः।

औणादिक कूटप्रत्ययः। 'बहुलमन्यत्रापी'ति णेर्लुक्। रलयोरेकत्वस्मरणाल्लस्य रः। विशेषयस्य पूर्वनिपातनियमार्थं सूत्रम्। शब्दप्रवृत्तिनिमित्तकुत्सायामेवाऽयं, संनिधानात् । तेनेह न-नैयायिको दुराचारः। पापाणके। एतौ कुत्सनाभिधायिनौ। 'कुपूयकुत्सितावद्यखेटगाऽणकाः समाः'इत्यमरः। ततश्चानयोः पूर्वसूत्रेण समासे परनिपातः स्यात्, तस्मात्पूर्वनिपातनियमार्थमिदं सूत्रमित्याशयेनाह- पूर्वसूत्रापवाद इति।

उपमानानि सामान्यवचनैः उपमीयते येन तदुपमानम्। उपपूर्वान्माङः करणे ल्युट। प्रादिसमासः। उपपूर्वको माङ् सादृश्यहेतुके परिच्छेदे रूढः। येन वस्त्वन्तरं सादृश्येन परिच्छिद्यते तदुपमानमित्यर्थः। यथा 'गौरिव गवयः'। इह हि गौः करणं, सादृश्यं हेतुः, पुरुषः परिच्छेत्ता। स हि गोसादृश्येन गवयं परिच्छिनत्ति । सामान्यवचनैरिति। समानो धर्मः- सामान्यम्। चातुर्वर्ण्यादित्वात्स्वार्थे षयञ्। उपमानोपमेयसाधारणो यो धर्मस्तद्विशिष्टवचनैरित्यर्थः, न तु साधारणधर्ममात्रवचनैरिति ।

एतच्च वचनग्रहणाल्लभ्यते। सामान्यमुक्तवन्तः-सामान्यवचनाः। बाहुलकात्कर्तरि भूतेल्युट। ये पूर्वं सामान्यमुक्त्वा तद्वति द्रव्ये पर्यवस्यन्ति ते तथोक्ताः। तच्च सामान्यविशिष्टमुपमानशब्दस्य संबन्धिशब्दत्वादाक्षिप्तमुपमेयमेव विज्ञायते । लाक्षणिकमिति। अतएव सामानाधिकरण्यान्मृगीव चपला मृगचपलेत्यादौ पुंवद्भावः ।

उत्तरपदोपस्थितश्यामत्वचपलत्वादिद्वारकमेवेह सादृश्यं गृह्यते, संनिधानात्। कथं तर्हि उपमानपरतेति चेत्, भूतपूर्वगत्या शक्यार्थमादाय तत्परतेत्यवेहि। पूर्वनिपातेति। अन्यथाऽनियमः स्यात्, खञ्जकुब्जवदिति भावः। किंच तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययेति सूत्रे प्रतिपदोक्तस्यास्यैवोपमानग्रहणेन ग्रहणार्थमपीदं सूत्रम्। अतएव मयूरव्यंसकादित्वात्समासे उपमानस्वरो न प्रवर्तत इति सिद्धान्तः। उपमितम्। उपमेयमुपमितम्। भूतकालोऽत्र न विवक्षितः। तच्च संबन्धिशब्दादुपमानमाक्षिपति । तथा चोपमानभूतैर्व्याघ्रादिभिरित्यर्थः। पुरुषो व्याघ्र इव शूर इति। तत्र हि शूरसापेक्षस्यापि पुरुषस्य प्रधानत्वात् 'राजपुरुषः सुन्दरः' इतिवदत्रापि समासः स्यात्स मा भूदिति 'सामान्याऽप्रयोगे' इत्युक्तमिति भावः। कथं तर्हि 'भाष्याब्धिः क्वातिगम्भीरः' इति कैयटः, सामान्यप्रयोगसत्त्वेनाऽस्याऽप्राप्तः। अत्र केचित्-प्रमाद एवायमित्याहुः। इह गाम्भीर्येण सादृश्यं न विवक्षितं, किंतु विततदुरवगाहत्वादिना। तस्य हि विततत्वादेरप्रयोगोऽस्त्येवेति निर्बाधः समास इति मनोरमायां स्थितम्। विशेषणम्। विशिष्यते येन तद्विशेषणं । कर्तुः करणत्वविवक्षायां ल्युट। तदाह- भेदकमिति। व्यावर्तकमित्यर्थः। विशेषणविशेष्ययोः स संबन्धिकतयाऽन्यतरोपादानमात्रेणेतराक्षेपसंभवे उभयोरुपादानं स्पष्टार्थमिति कैयटः।

एतच्च 'कुत्सितानि कुत्सनै 'रित्यत्रापि तुल्यम्। हरदत्तस्त्वाह'समस्यमानपदद्वयजन्यबोध-प्रकारकयोविशेषणविशेष्यधर्मयोर्यत्र परस्परव्यभिचारस्तत्रैव समासो भवति, न तु 'तक्षक: सर्प:' इत्यादौ। न हि तक्षकत्वं सर्पत्वं व्यभिचरती 'ति। तन्मदम्। 'कैलासाद्रि:', 'मन्दराद्रि:', 'भावपदार्थ:', 'तर्कविद्या', 'व्याकरणशास्त्रं', 'भोजराज:', इत्यादिप्रयोगाणामसाङ्गत्यापत्ते:। ननु विशेषणविशेष्यभावे कामचारात्पाचकपाठकादाविव नीलोत्पलादावप्यव्यवस्थित: पूर्वनिपात: स्यादिति चेदत्राहु:-जातिशब्दस्य गुणक्रियाशब्दसमभिव्याहारे विशेष्यसमर्पकतैव। तेन 'नीलोत्पलं' 'पाचकब्राह्मण' इति व्यवस्थित एव प्रयोग:। गुणशब्दयो: क्रियाशब्दयोर्गुणक्रियाशब्दयोश्चाऽनियम एव। खञ्जकुब्ज:, कुब्जखञ्ज:। पाचकपाठक:, पाठकपाचक:। खञ्जपाचक:, पाचकखञ्ज इति। अत्र मूलमुपसर्जनमिति महासंज्ञा। अप्रधानं ह्युपसर्जनम्। गुणक्रिययोश्च द्रव्यं प्रत्यप्राधान्यं स्पष्टमेवेति। अपरस्यार्ध इति। एतच्च 'पश्चा'दिति सूत्रे भाष्ये स्थितम् ।

बहुलग्रहणादिति। एकेषु मुख्येषु वीरयते पराक्रमते इति वा बोध्यम् । श्रेण्यादय:। आद्य आदिशब्दो व्यवस्थावाची। द्वितीयस्तु प्रकारवाची। ' श्रेण्यादय: पठ्यन्ते, कृतादिराकृतिगण:' इति भाष्यात्। श्रेणी, एक, पूग, कुन्द, शशि, विशिख, निचय, निधनादि:- श्रेण्यादि:। कृत, मित, भूतादि: कृतादि:। यदा तु सिद्धा एव श्रेणय: सम्यक्कृतास्तदा समासो नेष्यत इत्याशयेनाह- अश्रेणय: श्रेणय इति। एकेन शिल्पेन पण्येन वा ये जीवन्ति तेषां समूह:-श्रेणि:। च्व्यन्तानां तु 'कुगती'ति नित्यसमास:, परत्वात्। श्रेणीकृतम्। श्रेणीकृतम्। इह तु 'रूवौ चे 'ति दीर्घ:। क्तेन।

विशिष्टशब्दोऽवधारणार्थ:। नमात्राधिकेन नहितं समस्यत इति सूत्रार्थ:। तेनेह नसिद्धं चाऽभुक्तं च। 'नुडिडधिकेनापी'ति वाच्यम्। अशितं चानशितं च अशितानशितम्। क्लिष्टाऽक्लिशितम्। 'क्लिश: क्त्वानिष्ठयो:' इति वेट्। कृताकृतमिति। एकदेशकरणात्कृतम्। एकदेशान्तरस्याऽकरणात्तदेवाऽकृतम्। शाकपार्थिव इति। पृथिव्या ईश्वर: पार्थिव:। 'तस्येश्वर:' इत्यण्। 'शाकप्रिय' इति बहुव्रीहि:, तस्य पार्थिवशब्देन समासे कृते पूर्वसमासे यदुत्तरपदं प्रिय इति, तस्य लोप:। तथा 'देवब्राह्मण' इत्यत्र देवस्य पूजको देवपूजक इति पूर्वस्मिन् षष्ठीसमासे यदुत्तरपदं पूजक इति, तस्य लोपो ज्ञेय:। सन्महत्। गुणक्रियाशब्दै: सह समासे सदादीनां पूर्वनिपातनियमार्थं सूत्रम्। कतरकतमौ।

जातिपरिप्रश्ने किम् ? कतरो देवदत्त:। 'वाह बहूनां जातिपरिप्रश्ने डतम'जिति व्युत्पादितकतमशब्दसाहचर्यात्तादृशस्यैव कतरशब्दस्यापि ग्रहणे सिद्धे जातिपरिप्रश्नग्रहणं ज्ञापयति 'कतमश दोऽर्थान्तरेऽपि साधु:' इति। तथा च प्रत्युदाहृतं प्राचीनवृत्तिषु 'कतरो भवतोर्देवदत्त:, कतमो भवतां देवदत्त:' इति। किं क्षेपे। किंराजेति। 'किम: क्षेपे' इति समासान्तनिषेध:। क्षेपे किम् ? को राजा पाटलिपुत्रे । एवं 'किंसखा यो दहति किंगौर्यो न वहति' इत्यप्युदाहरणं बोध्यम्। तत्पुरुष:। समानाधिकरणशब्दोऽर्शआद्यजन्त:। समानाधिकरणपदक इत्यर्थ:। भाषितपुंस्कादित्यादि। एतच्च 'स्त्रिया: पुंव'दिति सूत्रे स्फुटीकरिष्यते। ननु तेनैव कर्मधारयेऽपि सिद्धं, जातीयदेशीययोस्तु 'तसिलादिष्वि'ति सिद्धं, तत्किमनेन सूत्रेणेत्यत आह-पूरणीप्रियादिष्विति। तथेतिच। महानवमीति। नवानां पूरणी। 'तस्य पूरणे डट्' 'नान्तादसङ्ख्यादेर्मट'। टित्त्वान्ङीप्। महती चासौनवमी चेति विग्रह:। पुंवद्भावे कृते वक्ष्यमाणेन महत आकार:। कोपधादेरिति।'कोपधाया:' 'संज्ञापूरण्योश्च' 'वृद्धिनिमित्तस्य च तद्धितस्याऽरक्तविकारे' 'स्वाङ्गाच्चेत:' 'जातेश्चे'ति पञ्चसूत्र्या प्रतिषिद् इत्यर्थ:। क्रमेणोदाहरति-पाचकस्त्रीति। जातीयदेशीययोरपि प्रतिप्रसवमुदाहरति- एवमिति। पाचिकाप्रकारवती पाचकजातीया। 'प्रकारवचने जातीयर्'। पाचकदेशीयेति। 'ईषदसमाप्तौ' इति देशीयर्। उभयत्र 'तसिलादिषु' इति पुंवद्भावस्य 'न कोपधाया:' इति निषेध: प्राप्त:, पटुजातीया पटुदेशीयेत्यादौ तस्य चरितार्थत्वात्। इत्यादीति। आदिपदाद्दत्तजातीया, पञ्चजातीया, स्त्रौग्नजातीया, सुकेशजातीया, ब्राह्मणजातीया। एवं दत्तदेशीयेत्याद्युदाहार्यम्। स्त्रीपुंसलक्षणेति। स्तनश्मश्वादियुक्ता स्त्रीत्यर्थ:। उदश्विदिति। 'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाऽम्बु निर्जल 'मित्यमर:। कठधूर्त इति।

नात्र कठत्वं कुत्स्यते, अत: 'कुत्सितानि कुत्सनै:' इति गतार्थता न शङ्कया, प्रवृत्तिनिमित्तकुत्सायामेव तस्य प्रवृत्ते: 'जनयति कुमुभ्रान्ति धूर्तबको बालमत्स्याना 'मित्यत्र 'धूर्तबक' इत्यसाधुरेव। प्रशंसावचनैश्च। वचनग्रहणं रूढिशब्दपरिग्रहार्थम्। तेन ये यौगिका: प्रशस्तशोभनरमणीयादयो, ये च विशेषवचना: शुचिमृद्वादयो, ये तु गौण्या वृत्त्या प्रशंसा गमयन्ति- 'सिंहो माणवक:' इत्यादयस्ते सर्वे व्युदस्यन्ते। गवोद्ध इति। 'अवङ स्फोटायनस्ये 'त्यवङि आद्गुण:'। 'मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ। प्रशस्तवाचकान्यमूनि' इत्यमर:। 'प्रशंसावचनपोटायुवती'. त्येकयोगसंभवे पृथग्योगकरणं चिन्त्यफलम्। युवखलतीति। 'कृदिकारादक्तिन:' इति ङीष् ।

'पुंवत्कर्मधारये 'ति युवतिशब्दस्य पुंवद्भावः। जरतीति। 'जीर्यतेरतृन्'। 'उगितश्चे'तिङीप्। एवं युवपलितः युववलिन इत्युदाहार्यम्। वलिनशब्दः पामादिः । कृत्यतुलाख्याः ।

'तुल्यमहान्' 'सदृशमहा'नित्यादौ तु परत्वादनेन 'सन्मह'दिति बाध्यते। 'तस्य सत्कृत्यशालिनः' इति भट्टिप्रयोगे तु 'सतां कृत्यं सत्कृत्य'मिति षष्ठीसमासो बोध्यः। एवं 'परमपूज्यः' इत्यादिष्वपि। वर्णो। समानाधिकरणेन वर्णवाचिना वर्णवाचि समस्यत इत्यर्थः। 'विशेषणं विशेष्येणे'त्यनेनैव सिद्ध पृथग्विधानं वर्णो वर्णेष्वनेते' इति पूर्वपदप्रकृतिस्वरो विधीयमानः प्रतिपदोक्तत्वादेतत्समास-पूर्वपदस्यैव भवतु नान्यस्येत्येतदर्थम्। कृष्णसारङ्ग इति। सारङ्गश्चित्रपर्यायः। स च गुणोपसर्जनद्रव्यपरः। कृष्णशब्दोऽपि कृष्णावयबके भाक्तः। एवं च गौणे सामानाधिकरण्ये 'विशेषणं विशेष्येणे 'त्यप्रवृत्ती समासार्थमपीदमारब्धव्यमित्याहुः। ननु 'तृतीया तत्कृते 'त्यनेनैवायं समासः सिध्यति, सारङ्गत्वस्य कृष्णादिकृतत्वात्। नापि स्वरे भेदः। 'तत्पुरुषे तुल्यार्थतृतीये'त्यनेनैव पूर्वपदप्रकृतिस्वरसिद्धेरिति चेदत्राहुः- 'कृष्णशुक्लो हरितशुक्ल इत्याद्यर्थं समासोऽनेनाऽवश्यं विधेयः। नहीह तत्कृतत्वमस्ति। यद्यपीह 'विशेषणं विशेष्येणे 'त्यनेन समासः सिध्यति, तथापीष्टः स्वरो न सिध्यति। न च प्रतिपदोक्तसमासोऽकिञ्चित्करः, व्यावा लाभादिति वाच्यं, 'कृष्णशुक्लौ' इत्यादोवर्त्यस्य संभवा'दिति। कडारादय इति। बहुवचननिर्देशादिति भावः। आदिशब्देन- 'गडुलशाण्डिल्यः', 'शाण्डिल्यगडुलः' इत्यादि। एतच्च भाष्ये स्पष्टम्। एतदेवेति। एवकारः स्फुटसिद्धत्वद्योतनार्थो, न त्ववधारणार्थः, 'युवा खलती'ति सूत्रे जरतीग्रहणस्यापि ज्ञापकत्वसंभवात् । न हि युवन्शब्दस्य पुंस्त्वे जरतीसामानाधिकरण्यंसङ्गच्छते। चतुष्पादो।

मण्डूकप्लुत्याऽत्र 'जाति'रित्यनुवर्तत इत्याह-जातिवाचीति। जातिः किम् ? 'कालाक्षी गर्भिणी'। चतुष्पात्किम् ? ब्राह्मणी गर्भिणी। प्रत्युदाहरणे 'विशेषण 'मिति समासः स्यादेव। गर्भिणीकालाक्षीत्यादिपूर्वनिपाते विशेषः। मयूर। चकारोऽत्रावधारणार्थः। तेन 'परममयूरव्यंसकः' इत्यादि समासान्तरं न भवति। धूर्त इति। एवं च गुणवचनत्वात्पूर्वनिपाते प्राप्ते इदं वचनमारब्धमिति भावः। अन्ये तु 'मयूर इव व्यंसको मयूरव्यंसक' इत्यादौ 'उपमानानि सामान्यवचनै 'रिति समासस्यापवादोऽयम्। तेन 'समासस्ये 'त्यन्तोदात्तत्वमिह सिध्यति, 'तत्पुरुषे तुल्यार्थे 'त्युपमानपूर्वपदप्रकृतिस्वरस्योपमानसंशब्दनेन विहिते प्रतिपदोक्तसमासे चरितार्थत्वादित्याहुः।

लघुशब्देन्दुशेखरे नागेशभट्टः कर्मधारयसमासप्रकरणस्थं सूत्रं सिद्धान्तकौमुद्याः क्रमानुसारेण व्याख्यातवान् -उपमानानीत्यस्योपमानत्वेन बोधकानीत्यर्थः। अन्यथा ससम्बन्धिकत्वात्सामान्यवचनैरित्येव तेन समासलाभे तद्वैयर्थ्यं स्पष्टमेव। एवमुत्तरसूत्रे उपमितमित्यप्युपमेयत्वेन बोधकमित्यर्थकम् । एवमेव भाष्यस्वरस इत्याहुः। उपमितम्। उपमेयत्वम्-उपमानपरिच्छेद्यत्वम्। उपमानोपयेययोः समभिव्याहारे उपमानस्य विशेषणतैव। तदाह-विशेष्यस्येति। एतच्चोपमितमित्येतत्स्वारस्यात्तस्योपगानेन नित्यसाकाङ्क्षत्वाच्च व्याघ्रादीनामुपमानत्वे एव, उभयोः समानलिङ्गत्व एव च प्रवर्त्तते। अत एव 'परवल्लिङ्गम्' इति सूत्रे 'द्वन्द्वैकदेशिनो 'रिति न्यासं कृत्वा तत्पुरुषग्रहणं प्रत्याख्यातम्। अन्यथाऽस्य पूर्वपदार्थप्रधानस्य भाष्याब्धिरित्यादौ दृश्यमानपरवल्लिङ्गस्य सिद्ध्यर्थे तत्पुरुषग्रहणावश्यकत्वेन तदसङ्गतिः स्पष्टैव।

'भाष्याब्धिः कातिगम्भीरः 'इत्यादौ सामान्यधर्मप्रयोगेऽपि लिङ्गभेदेऽपि मयूरव्यंसकादित्वात्सिद्धम्। स च राजान्तरमित्यादौ पूर्वपदार्थप्रधानोऽपि दृष्टः। परवल्लिङ्गताऽपि तत्पाठेनैव। विशेषणसमासेन तु न सिद्धिः, उपमानस्य विशेषणतया पूर्वनिपातापत्तेः। एवञ्च भाष्याब्धिरित्यादौ रूपकमेव। यत्तु अनुपात्तधर्मेण साम्यविवक्षणादनेन समास इति, तन्न, एतदुपादानवैर्य्यापत्तेः, उपात्तधर्मसत्त्वे तेनैव साम्यप्रतीतेरनुभवात्, 'सकलकलः पुरचन्द्रो राजते' इत्यादावुपात्तधर्मातिरिक्तधर्मस्य साम्यप्रयोजकस्याऽभावाच्चेति दिक्। पुरुषव्याघ्र इति। उपमानशूरव्याघ्राऽभिन्नः शूरः पुरुष उपमेय इति बोधः। व्याघ्र इव शूर इति। न च शूरसापेक्षत्वेनाऽसामर्थ्यादत्र समासाऽप्राप्तिः। प्रधानस्य सापेक्षत्वेऽप्यसामर्थ्याऽभावात्। विशेषणमुपमानन्तु नित्यसापेक्षमिति तत्सापेक्षत्वं न दोषः। साधारणधर्मवत्त्वेन परिच्छेदकत्वं हि तत्त्वं । तच्च तत्त्वेन ज्ञातस्यैव। यद्यप्युपमेयत्वं तद्वत्त्वेन परिच्छेद्यकत्वमेव, तथापि तस्य तत्त्वं विधेयमेवेति तन्न नित्यसापेक्षमिति दिक्। विशेषणम्। अत्र विषयताविशेषरूपं विशेषणत्वादि गृह्यते, व्याख्यानात्। वृत्तौ भेदकमेद्यशब्दाभ्यामपि तदेव। व्यावर्तकत्वरूपं तत्तु नील इति सामान्योपक्रमे उत्पलस्याप्यस्तीत्यव्यावर्त्तकम्। अत्र जातिसजयोर्गुणक्रियाभ्यां समभिव्याहारे विशेष्यतैव। गुणयोः क्रिययोर्गुणक्रिययोश्चाऽनियम एव। व्याप्यव्यापकभावानापन्नजात्योरप्येवम्। यथा भूतमूर्तयोः। तद्भावापन्नयोस्तु व्यापकस्य विशेष्यतैव। यथा शिशपावृक्ष इति। यत्रैकोऽवयवशब्दः, परः समुदायशब्दस्तत्रावयवस्य विशेषणत्वमेव। अत एव 'वर्णो वर्णेन' इति सूत्रे भाष्ये 'कृष्णसारङ्ग' इत्युदाहृत्य तृतीयासमासेनेदं सिद्धमित्युक्तम्। अन्यथा कर्मधारयेपूर्वनिपाताऽनियमेन तृतीयासमासे च तन्नियमेन

तदसङ्गतिः स्पष्टैव । द्वयोररप्यवयवशब्दत्वे त्वनियमः। एवञ्च 'सोमयाजिडित्थ' इत्येवोचितम् । डित्थसोमयाजीत्याद्यसाध्वेव। कुञ्जखञ्जः खञ्जकुञ्ज इत्यादौ विषयताया अपि शाब्दबोधे भानाद्बोधे विशेष इति दिक्। पूर्वापर। बहुलग्रहणानुवृत्त्या क्रियाशब्दैः पाचकादिभिरेषां न समास इति समर्थसूत्रे भाष्ये। एवञ्च 'अपराध्यापकः' इत्युदाहरणं चिन्त्यम्। 'अपरमीमांसकः इत्याधुचितमुदाहरणम्। भृत्यभरणीयादौ विशेषणमिति प्रवर्त्तत एवेत्यपि तत्रैव भाष्ये स्पष्टम्। व्यर्थेति। तेन श्रेणीस्थानामेव दण्डनादिरूपकरणेन समासः। ज्यन्तानां तु परत्वात् 'कुगति' इति नित्यसमासः। कृतादिराकृतिगणः। क्तेन नञ्। क्तेनेति विभक्तिवि परिणामेनाऽनञ्त्यित्रापि सम्बध्यते। तेनोभयोः क्तान्तत्वे एकप्रकृतिकत्वे एव चायं समासः। नग्रहणञ्च क्रियागताऽसमाप्तिद्योतकाव्ययोपलक्षणम्। तेन कृतापकृतादिसङ्ग्रहः पूर्वनिपातनियमार्थञ्चेदम्। देवब्राह्मण इति। देवपूजको ब्राह्मण इत्यर्थः। यद्यपि पूर्वपदस्य तत्तदर्थे लक्षणायां विशेषणसमासेन सिद्धं, तथापि मुख्यार्थे 'शाकप्रियपार्थिव' इत्यादिनिवृत्त्यर्थमिदम्। सन्महत्। 'महापाप'मित्यादौ पूजाऽभावेऽपि विशेषणसमासो बोध्यः। अत्रापि महत्त्वेन पापस्य स्वगुणांशे पूजाऽस्त्येवेत्यन्ये। वृन्दारकना। वृन्दारकशब्दौ देवजातिवाची। द्वितीयो गजसर्पवाची। अन्त्यो गजवाची। तेषामुपमानत्वेनैव पूजावाचित्वादाह- व्याघ्रादेरिति। सामान्येति। 'गोकुञ्जरः स्थल'इत्यादौ।

कतरकतमौ। 'द्वयोरेकस्य' 'वा बहूनाम्' इति सूत्रयोरुपाधिप्रत्याख्यानात् 'कतमो भवतां पण्डित' इत्यादौसमासाऽभावाय जातिपरिप्रश्ने इति। यथान्यासेऽपि कतरार्थे तत् । किंराजेति। 'किमः क्षेपे' इति समासान्तनिषेधः । क्षेपे किम् ? को राजा पाटलिपुत्रे।

तत्पुरुषः। तत्पुरुषाधिकार एतत्करणे त्वेकसञ्ज्ञाधिकारात्तस्या अनया बाधः स्यादिति बोध्यम्। समानाधिकरणपदावयव इत्यर्थोऽत्र, व्याख्यानात् । पुंवत्कर्मधारय । 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ' इत्यनुवर्तते। अपूरणीप्रियादिष्विति तु नानुवर्तते व्याख्यानात् । तदाह- पूरणीत्यादि। एतेन 'स्त्रियाः पुंवत्', 'तसिलादिष्वि'ति सिद्धे इदं व्यर्थमित्यपास्तम्। महानवमीति। पुंवत्त्वे 'आन्महतः' इत्यात्वम्। तथा कोपधादेरिति। एतेन निषेधप्रकरणात्पूर्वमेतत्पाठ्यं, पुंवदिति च न कार्येमित्यपास्तम्। 'भध्येऽपवादा' इति न्यायेन परनिषेधबाधाऽनापत्तेः। 'न कोपधायाः' 'सञ्ज्ञापूरण्योथ' 'वृद्धिनिमित्तस्य च' 'स्वाङ्गाच्चेतः' 'जातेश्च' इति पञ्चसूत्र्येत्यर्थः। विध्युन्मूलकत्वरूपयुक्तिमूलकस्य 'निषेधाश्च बलीयांसः' इत्यस्य तु न विषयः, तद्बाध विना कर्मधारयांशेऽस्य विधेरचारितार्थ्यात्। बाध्यसामान्यचिन्तया च सर्वबाधः। इमी पोटेत्यादिविग्रहः। जातेः पूर्वनिपातार्थ 'पोटायुवति' इति सूत्रम्।

प्रशंसाव। जातिरिति वर्त्तते। ननु मतल्लिकादेः स्त्रीत्वात् प्रशस्त इत्यर्थो न युक्तः। 'प्रशस्ता गौरित्यर्थ' इति पाठ उद्घादेः पुंस्त्वात्प्रकाण्डस्य क्लीबत्वादयुक्तोऽत आह- न तु विशेष्यनिघ्ना इति। युवत्यामेवेति। जरत्यां युवतीधर्मारोपे तु युवती शब्दस्य विशेषणत्वेन 'विशेषणम्' इति समासेऽपि पूर्वनिपातनियमसिद्ध्या जरतीग्रहणस्य वैयर्थ्यमेव स्यादिति भावः। कृत्यतु। कृत्यप्रत्ययान्तास्तुल्यवाचकाश्चजातिभिन्निवाचकेन समस्यन्त इत्यर्थः। 'तल्यमहा'नित्यादौ परत्वादनेनैव समासः ।

पूर्वनिपातनियमार्थमिदम्। सत्कृत्यं, परमपूज्य इत्यादौ षष्ठीसमासो बोद्ध्यः। यद्वा बाहुलकादेतद्विषये 'सन्महत्' इत्यस्यैव प्रवृत्तिः। सामर्थ्यादिति । पूर्वनिपातस्योभयत्रापि समत्वादिति भावः। जातिभिन्नवाचकेन समासे हि पूर्वनिपाताऽनियमे प्राप्ते तन्नियमार्थमिदं सार्थकमिति अजात्येत्येतद्व्यर्थ स्यादिति तत्सामर्थ्याद्विशेषणसमासबाध इति तात्पर्यम्। इदं प्राचामनुरोधेन। परे तु अजात्येति उक्तार्थस्य स्पष्टतया लाभायैव । अत एव 'कुरुगार्हपते 'ति सूत्रभाष्योदाहते पण्यकम्बलः पण्यहस्तीत्यत्र 'विशेषण'मिति समाससिद्धिः। भोज्य ओदन इत्यत्राऽसमासस्येष्टत्वे स बाहुलकाद्बोध्य इत्याहुः । समानाधिकरणेनेति। वर्णवाचिना तादृशेन वर्णवाचि समस्यत इत्यर्थः। सारङ्गःचित्रः। कृष्णशब्दस्तदवयवके लाक्षणिक इति सामानाधिकरण्यम्। 'विशेषण'मित्येव सिद्धे इदं व्यर्थम्। न च 'वर्णो वर्णेष्वनेते' इति स्वरविधायके प्रतिपदोक्तस्याऽस्यैव ग्रहणार्थमिदम्। अत एव सारङ्गस्यावयवः कृष्णः 'सारङ्गकृष्ण' इत्यत्र तेन पूर्वपदप्रकृतिस्वरो नेति वाच्यम्, कर्मधारयस्वरप्रकरणे तत्पाठेन सिद्धेरिति दिक्। बहुवचननिर्देशादाद्यर्थावगतिरित्याह- कडारादय इति। कर्मधारये किम् ? कडारपुरुषको ग्रामः। एतदेवेति। एतदपीत्यर्थः। 'युवा खलती'ति सूत्रे जरतीग्रहणस्यापि ज्ञापकत्वात्। चतुष्पादो। 'जातिग्रहणं कर्त्तव्य'मिति वार्तिकलब्धमर्थमाह- जातिवाचिन इति। मयूरो व्यंसक इति। केचित्तु मयूर इव व्यंसक इत्यर्थे उपमानसमासापवादोऽयं, प्रतिपदोक्तोपमानसमासविषयकपूर्वपदप्रकृतिस्वराऽभावायेत्याहुः। उच्चावचमिति। उच्चावचादेशोऽत्र। उच्चनीचमित्यर्थे इदमित्यन्ये। निश्चितप्रचितयोनिश्चप्रचादेशः।

"तद्धितार्थोत्तरपदसमाहारे च''[48]

समासप्रकरणे इदम् एकपञ्चाशत्तमं सूत्रमस्ति। शब्दकौस्तुभकार: सूत्रस्यास्यार्थं करोति – तद्धितार्थे विषये उत्तरपदे च परत: समाहारे च वाच्ये दिक्संख्ये समानाधिकरणेन सह समस्येते स तत्पुरुष:। पूर्वस्यां शालायां भव: पौर्वशाल: । समासे कृते "दिक्पूर्वपदादसंज्ञायां ञ:''[49] एवम् आपरशाल: ।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– दिक्संख्ये इत्यनुवर्तते । तद्धितार्थे विषये उत्तरपदे च परत: समाहारे चाभिधेये दिक्संख्ये समानाधिकरणेन सुपा सह समस्येते, तत्पुरुषश्च समासो भवति। तद्धितार्थे तावत्– पूर्वस्यां शालायां भव:, "दिक्पूर्वपदादसंज्ञायां ञ:''– पौर्वशाल:, आपरशाल:। उत्तरपदे– पूर्वशालाप्रिय:, अपरशालाप्रिय:।

समहारे दिक्शब्दो न सम्भवति।

पूर्वशालाप्रिय:। अत्र शब्दकौस्तुभकार: भट्टोजिदीक्षित: व्याख्याति यत् इह त्रिपदे बहुब्रीहौ कृते प्रियशब्दे उत्तरपदे पूर्वयोस्तत्पुरुष सति समासान्तोदात्तत्वं लकाराकारस्य भवति। असति त्ववान्तरतत्पुरुषे पूर्वपदप्रकृतिस्वरेण पूर्वशब्दस्यायुदात्तत्वं स्यात्। दिक्षु समाहारो नास्ति, अनभिधानात्। संख्यायास्तद्धितार्थे षाण्मातुर:। पाञ्चनापिति:। पञ्चकपाल:। पञ्चगवधन:। अत्रापि त्रिपदे बहुब्रीहौ धनशब्देउत्तरपदे पूर्वयोस्तत्पुरुषे "गोरतद्धितलुकि''[50] इति टच् । ननु पाक्षिकं पञ्चगोधन इति दुर्वारम्। महाविभाषाधिकारेण तत्पुरुषस्य वैकल्पिकत्वात् । अत एव नित्यत्वमुसंख्यातंवार्तिककृता "द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्' (का. वा.) इति। तेन समासान्तोऽपि नित्यमेव। स्यादेतत्। समुदायस्यैकार्थी भावे सति अवयवयोरावश्यक इत्युपसंख्यानं व्यर्थमिति चेत्? मैवम्, त्रयाणां समासे कृतेऽन्यपदार्थोपसंक्रमेण परस्परसम्बन्धाभावात् सति तूपसंख्याने वचनसामर्थ्याद्द्वन्द्वतत्पुरुषयो: प्रवृत्ते:। न चैवं त्रिपदे बहुब्रीहौ 'चित्राजरद्गु:' इत्यत्रापि तत्पुरुषे चित्राशब्दस्य पुंवद्भावापत्ति: ।

काशिकाकारस्तु केवलम् उदाहरणानि प्रयुज्यते। तद्यथा, संख्या, तद्धितार्थपाञ्चनापिति: पञ्चकपाल:। उत्तरपदे– पञ्चगवधन:, दशगवधन:। स अत्र किमपि विशेषं न कथयति। समाहारे – पञ्चफली, दशमूली। पञ्चकुमारि, दशकुमारि । शब्दकौस्तुभकार: भट्टोजिदीक्षित: व्याख्याति समाहारे– पञ्चमूली। पञ्चकुमारी। इह पञ्चानां मूलानां कुमारीणां च समाहार इति विग्रह:। न तु पञ्चमूला: समाहृता इत्यादि। भावसाधनो हि समाहारशब्दो न तु कर्मसाधन:। तथा सति 'पञ्चकुमारी' इत्यत्र कुमार्यर्थस्य प्राधान्यात्समासशास्त्रे च अप्रथमानिर्दिष्टत्वादेकविभक्तित्वाभावाच्चोपसर्जनत्वाभावेन "गोस्त्रियोरूपसर्जनस्य''[51]इति हस्वो न स्यात्। स्यादेतत् । समाहार: समूह इति पर्यायौ। पञ्चमूली। पञ्चगवम्। समूहश्च तद्धितार्थ:, "तस्य समूह:"[52] इति सूत्रात् । तथा च तद्धितार्थ इत्येव सिद्धे किं समाहारग्रहणेन? न चैवं तद्धितश्रवणं स्यादिति वाच्यम् "द्विगोलुंग्"[53] इति लुक्सम्भवात्। नन्वेवं लुकृतानि स्यु:। तद्यथा – 'पञ्चपूली' इत्यत्र "अपरिमाणबिस्त''[54]इति ङीप् प्रतिषेध: स्यात् ।

'पञ्चगवम्' इत्यत्र टच् न स्यादिति चेत्? मैवम् न तद्धितलुक्यद्धितलुकीत्येतत्स्थानेसमाहारशब्दपाठेन सर्वसामञ्जस्यात्। तथाहि– अपरिमाणबिस्तादिभ्य: समाहारेनियमार्थमिदम्– एभ्य: समाहार एवेति। पञ्चानामवश्वानां समाहार: पञ्चश्वी। नेहपञ्चभिरश्वै: क्रीता पञ्चाश्वा। अत्र भाष्यकारा:। एवं सति 'पञ्चकुमारी' 'दशकुमारी' इत्यत्र "लुक्तद्धितलुकि''[55] इति स्त्रीप्रत्ययस्य लुक् स्यात्। तस्मात्तद्धितनिवृत्यर्थं समाहारग्रहणम्। पृथक्समाहारग्रहणाद्धि समासस्यैव समाहारो वाच्यो न तु तद्धितस्येति व्याख्यानात् तद्धितो नोत्पद्यते इति सिद्धमिष्टम्। अत एव च ज्ञापकात्तद्धितार्थे विषये इति व्याख्यातं न तु वाच्ये इति। अत एव 'पाञ्चनापिति:' इत्यादौ तद्धित उत्पद्यते। समासेनैव तदर्थस्योक्तौ तु तद्धितो नोत्पद्येत । अत एव द्विगोलुंग्वचनमपि सङ्गच्छते इति दिक्।

ननु पञ्च गावोऽस्य सन्ति पञ्चगु: पुरुष इत्यत्र मत्वर्थस्य तद्धितार्थत्वादयं समास: प्राप्नोति न तु बहुब्रीहि:, अशेषत्वात्। तस्य तु चित्रग्वादिरवकाश:, यत्र दिक्संख्ये न स्त:। सति चास्मिन्समासे मतुप: श्रवणं स्यात्। न च द्विगोरिति लुक्, अप्राग्दीव्यतीयत्वात् अत्रोच्यते। परत्वाद्बहुव्रीहि:। त्रिकत: शेषस्य भाष्यसम्मतत्वात्। वार्तिककृता तु वचनमेवारब्धम्–मत्वर्थे प्रतिषेध:।

एवं दृश्यते यत् यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृतरूपेणार्थं विवृणोति, तस्य काशिकाकारो साररूपेण अर्थं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति। शब्दकौस्तुभकारस्तु भाष्योक्तं सर्वं पक्षम् उपस्थाय प्रतिपदम् अर्थं विवृणोति।

कर्मधारयसमासस्य एक: अपरोपि भेद: द्विगु:। अत: उक्तम् – तत्पुरुषसमानाधिकरण: कर्मधारय:। कर्मधारय: भेदो द्विगु:। द्विगुसमासविधायकं सूत्रं "तद्धितार्थोत्तरपदसमाहारे च" अनेन त्रिविधसमास: क्रियते। त्रिष्वपि यदि संख्या वाचकं पदं पूर्वस्मिन् तिष्ठति

तदा स द्विगु कथ्यते। अतः द्विगुसमासस्य तत्पुरुषत्वं द्विगुश्च इति उभयम्। तथा च सूत्रं द्विगुश्च इति । सूत्रे चकारबलेन तत्तपुरुषसमासः अपिउपचीयते।

"संख्यापूर्वो द्विगुः[56]

समासप्रकरणे इदं द्विपञ्चाशत्तमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यार्थं करोति- "तद्धितार्थोत्तरपदसमाहारे च''[57] इत्यत्रोक्तः संख्यापूर्वः समासो द्विगुसञ्ज्ञः स्यात्। पञ्चकपालः। "संस्कृतम्भक्षाः'[58] इत्यनेनोत्पन्नस्याणो "द्विगो गनप्रत्ये"[59] इति लुक् । पञ्चनावप्रियः। “नावो द्विगोः'[60] इति समासान्तष्टच् । पञ्चमूली। “द्विगोः"[61] इति ङीप्। अनन्तरस्येति न्यायात्पूर्वसूत्रविषय एवेयं संज्ञा। एतदर्थमेव तत्र योगविभागः। अन्यथा “दिक्संख्ये संज्ञातद्धितार्थोत्तरपदसमाहारेषु" इत्येव ब्रूयात्। तेन 'सप्तर्षयः' इत्यत्र "इगन्तकालकपालभगालशरावेषु द्विगौ'[62] इतिपर्वपदप्रकृतिस्वरो न भवति। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह"तद्धितार्थोत्तरपदसमाहारे च'' इत्यत्र यः संख्यापूर्वः समासः स द्विगुसञ्ज्ञो भवति । तद्धितार्थे तावत्- पञ्चसु कपालेषु संस्कृतः पञ्चकपालः दशकपालः। "संस्कृतं भक्षाः' इती हाण, तस्य "द्विगोर्खनपत्ये'' इति लुक् । उत्तरपदे- पञ्चनावप्रियः। "नाव द्विगोः'' इति समासान्तो भवति । समाहारे - पञ्चमूली। "द्विगोः'" इति ङीब् भवति। द्विगुप्रदेशाः- "द्विगोः'' इत्येवमादयः।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृततरूपेणार्थं विवृणोति, तस्य काशिकाकारोऽनुकरणमात्रमेव करोति । विषयदृष्ट्या भेदः नास्ति।

"कुत्सितानि कुत्सनैः[63]

समासप्रकरणे इदं त्रयः पञ्चाशत्तमं सूत्रं विद्यते। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति- "कुत्स अवक्षेपणे'[64] । मत्यादिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद्वर्तमाने क्तः। बहुवचननिर्देश उभयत्रापि स्वरूपग्रहणनिरासार्थः। कुत्स्यमानवाचीनि कुत्सनैः सह प्राग्वत्। शब्दप्रवृत्तिनिमित्तकुत्सायामेवायमिष्यते, सन्निधानात्। विशेष्यस्य पूर्वनिपातार्थोऽयमारम्भः वैयाकरणखसूचिः। अत्र व्याकरणस्य वैदाङ्गत्वात्तदध्ययनं स्वरूपेण यद्यपि प्रशस्तं तथापिप्रतिभानाभावेन निष्फलत्वात् कुत्स्यते । याज्ञिककितवः। मीमांसकदुर्दुरूढः।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- कुत्सितवाचीनि सुबन्तानि कुत्सनवचनैः सुबन्तैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति । शब्दप्रवृत्तिनिमित्तकुत्सायामयं समास इष्यते "विशेषणं विशेष्येण बहुलम्'' इति परनिपाते प्राप्ते विशेष्यस्य पूर्वनिपातार्थ आरम्भः। वैयाकरणखसूचिः। निष्प्रतिभइत्यर्थः। याज्ञिककितवः, अयाज्ययाजनतृष्णापरः। मीमासंकदुर्दुरूढः नास्तिक। कुत्सितानि इति किम्? वैयाकरणश्चौरः। न ह्यत्र वैयाकरणत्वं कुत्स्यते? कुत्सनैरिति किम्? कुत्सितो ब्राह्मणः।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः विस्तृततया अर्थं व्याख्याति, तस्य काशिकाकारः विस्तृततया अर्थं विविच्य प्रतिपदं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति। अत्र विषये भट्टोजिदीक्षित कथयति यत् सूत्रस्थं 'कुत्सितं' इति पदेभूतकालार्थकः 'क्त' प्रत्ययः नास्ति अपितु वर्तमानकालार्थकः 'क्त' प्रत्ययः अस्ति। येन अस्यार्थो भवति- कुत्स्यमानम्। महाभाष्येऽपि एवमेव व्याख्यातमस्ति।

"पापाणके कुत्सितैः[65]

समासप्रकरणे इदं चतुर्पञ्चाशत्तमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यार्थं करोति- एते सुबन्ते कुत्सितैः सह प्राग्वत्। पापाणकशब्दौ कुत्सनाभिधायिनौ। तयोः पूर्वसूत्रेण समासे परनिपातः स्यात्। तस्मात्पूर्वनिपातार्थमिदम्। पापनापितः। पापकुलालः। अणकनापितः। अणककुलालः। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- पापाणकशब्दौ कुत्सनाभिधायिनौ, तयोः पूर्वेण समासे परनिपातः प्राप्तः, पूर्वनिपातार्थमिदमारभ्यते। पाप, अणक एते सुबन्ते कुत्सितवचनैस्सह समस्येते, तत्पुरुषश्च समासो भवति। पापनापितः। पापकुलालः। अणकनापितः। अणककुलालः।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेणार्थं करोति, काशिकाकारस्तु शब्दकौस्तुभमेवानुकरोति।

विशेषः - पापनापितः - पापश्चाऽसौ नापितश्च। अणकनापितः - अणकश्चाऽसौ नापितश्च। (भट्टि. 14.5)

"उपमानानि सामान्यवचनैः[66]

समासप्रकरणे इदं पञ्चपञ्चाशत्तमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यार्थं करोति - उपमानोपमेय साधारणधर्मवचनैः सहोपमानानि प्राग्वत्। घनश्यामः। इह पूर्वपदं तत्सदृशे लाक्षणिकम्। अत एव सामानाधिकरण्यात् 'मृगीव चपला मृगचपला' इत्यादौ

पुंवद्भाव:। सादृश्यं चोत्तरपदोपस्थितश्यामत्वचापलादिद्वारकमेव गृह्यते, तथैव व्युत्पत्ते:, श्रुतं विहायाश्रुतकल्पेन गौरवापत्तेश्च। अत एव हि व्यस्तेऽपि 'वागर्थाविव' इत्यादिस्थले सम्पर्कप्रभृतिसन्निहितद्वारकमेव सादृश्यं प्रतीयते। पूर्वनिपातनियमार्थं चेदं सूत्रम्। उपमीयतेऽनेनेत्युपमानम्। उपपूर्वकान्माङ: करणे ल्युट्। प्रादिसमास:। उपपूर्वकश्च माङ् सादृश्यहेतुके परिच्छेदे रूढ:। येनवस्त्वन्तरं सादृश्येन परिच्छिद्यते तदुपमानम्। घनश्यामादौ तु घनादय: शब्दा: यद्यपि घनादिसदृशे उपमेये संक्रान्तास्तथापि भूतपूर्वगत्या उपमानवाचिता द्रष्टव्या। इदमेव दर्शयितुं लौकिके विग्रहवाक्ये इवशब्द: प्रयुज्यते न त्वसौ प्रक्रियोपयोगीत्यवधेयम् । सामान्यवचनत्वमपि तद्विशिष्टोपमेयपरत्वमेव बोध्यम्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- उपमीयतेऽनेनेत्युपमानम्। उपमानवाचीनि सुबन्तानि सामान्यवचनै: सुबन्तै: सह समस्यन्ते तत्पुरुषश्च समासो भवति। उपमानोपमेययो: साधारणो धर्म: सामान्यम्, तद्विशिष्टोपमेयवचनैरयं समास: शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्ता। कुमुदश्येनी। हंसगद्गदा। न्यग्रोधपरिमण्डला। उपमानानीति किम्? देवदत्ता श्यामा। सामान्यवचनैरिति किम्? फाला इव तन्दुला:,पर्वता इव बलाहका:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृतरूपेण अर्थं विवृणोति, तस्य काशिकाकारस्तु अनुकरणमेव करोति, विषय बोधदृष्ट्या काशिकाकार: कौस्तुभाद् भिन्नानि उदाहरणानि लिखति, येन सूत्रार्थावगमने सौकर्यंभवति।

विशेष :- 1. चन्द्र इव रम्यं (मुखम्)। अत्र 'चन्द्र:' इति उपमानम्, 'मुखमि'ति उपमेय:, रम्यशब्द: सामान्यवचनम् अस्ति।

2. कुन्दावदाता: – कुन्दम् इव अवदातस्ते (भट्टि. 2.1)

"उपमितं व्याघ्रादिभि: सामान्याप्रयोगे''[67]

समासप्रकरणे इदं षड्पञ्चाशत्तमं सूत्रं विद्यते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति – उपमेयं व्याघ्रादिभि: सह प्राग्वत् साधारणधर्मप्रयोगेऽसति। विशेष्यस्य पूर्वनिपातार्थोऽयमारम्भ:। पुरुषो व्याघ्र इव पुरुषव्याघ्र:। व्याघ्रादिराकृतिगण:। सामान्याप्रयोगे किम्? पुरुषोऽयं व्याघ्र इव शूर: । काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयनह- उपमेयमुपमितम्, तद्वाचि सुबन्तं व्याघ्रादिभि: सामर्थ्यादुपमानवचनै: सह समस्यते, तत्पुरुषश्च समासो भवति। न चेत्सामान्यवाची शब्द: प्रयुज्यते। "विशेषणं विशेष्येण बहुलम्' इति परनिपातेप्राप्ते विशेष्यस्य पूर्वनिपातार्थ आरम्भ:। पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्र:। पुरुषसिंह:। सामान्याप्रयोग इति किम्? पुरुषो व्याघ्र इव शूर:। व्याघ्र। सिंह। ऋक्ष। ऋषभ। चन्दन। वृक्ष। वृष। वराह। हस्तिन्। कुञ्जर। रुरु। पृषत्। पुण्डरीक। बलाहक। आकृतिगणश्चायम्। तेनेदमपि भवति- मुखपद्मम्, मुखकमलम्, करकिसलयम्, पार्थिवचन्द्र: इत्येवमादि:। यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृतरूपेणार्थं विवृणोति, तस्य काशिकाकारो प्रतिपदम् अर्थं विविच्य सूत्रार्थं व्याख्याति, काशिकाकारो प्रकृतसूत्रान्तर्गते के के शब्दा: आगच्छन्ति? तेषामपि उल्लेखं करोति, येन सूत्रार्थावगमने सौकर्यं भवति ।

अन्योदाहरणानि: – कपिकुञ्जर: (भट्टि. 6)। कपिद्विप: (भट्टि. 6)।

"विशेषणं विशेष्येण बहुलम्[68]

समासप्रकरणे इदं सप्तपञ्चाशत्तमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति – भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत्। नीलमुत्पलं नीलोत्पलम्। बहुलग्रहणात्क्वचिन्नित्यसमास:। कृष्णसर्प:। लोहितशालि:। क्वचिन, रामो जामदग्न्य:। व्यास: पराशर्य:। विशेषणविशेष्ययो: ससम्बन्धिकतयाऽन्यतरोपादानमात्रेणेतरापेक्षसम्भवे उभयोपादानं स्पष्टार्थं "कुत्सितानि कुत्सनै:''[69] इत्यादाविवेति कैयटमतम्। हरदत्तस्त्वाह- विशेष्येणेत्युक्तया विशेषणं लब्धम्। तस्य पुनर्विशेषणत्वोक्तिर्विशिष्यते इति व्युत्पत्त्या विशेष्यत्वलाभार्थं, तथा च समस्यमानपदद्वयजन्यबोधप्रकारयो: परस्परव्यभिचारित्वे समासोऽयं यथा नीलोत्पलादौ। तक्षक: सर्प: इत्यादौ तु न भवति । इदं त्ववधेयम्। विशेषणविशेष्यभावे कामचारात्पाचकपाठकादाविव नीलोत्पलादावप्यव्यवस्थित: पूर्वनिपात: प्राप्त:। तत्रायं सिद्धान्त:। उपसर्जनमिति तावदन्वर्थसंज्ञेत्युक्तम् 'अप्रधानमुपसर्जनम्' इति। तदिह जातिगुणशब्दयो: सन्निपाते गुण एव विशेषणं तस्य द्रव्यावच्छेदद्वारैव क्रियानिवर्तकत्वात्। श्रौतव्यवहारोऽप्येवम्। क्रियाजात्योरप्युपनिपाते एवमेव। तेन 'नीलोत्पलं' 'पाचकब्रह्मण:'

इति व्यवस्थित एव प्रयोगः। यत्र तु गुणशब्दयोः क्रियाशब्दयोः गुणक्रियाशब्दयोर्वोपनिपातस्तत्रानियम एव। 'खञ्जकुब्जः ' 'कुब्जखञ्जः'। 'पाचकपाठकः' पाठकपाचकः'। 'खञ्जपाचकः, पाचकखञ्जः'। इति।

'शिंशपावृक्षः' इत्यत्र तु शिंशपात्वस्य व्याप्यत्वात् वृक्षत्वस्य च व्यापकत्वात् विशेषणविशेष्यभावव्यवस्था स्पष्टैवेति दिक्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- भेदकं विशेषणम्, भेद्य विशेष्यम्। विशेषणवाचि सुबन्तं विशेष्यवाचिना समानाधिकरणेन सुबन्तेन सह बहुलं समस्यते, तत्पुरुषश्च समासो भवति। नीलोत्पलम्। रक्तोत्पलम्। बहुलवचनं व्यवस्थार्थम् । क्वचिन्नित्यसमास एव- कृष्णसर्पः, लोहितशालिः। क्वचिन्न भवत्येवरामो जामदग्न्यः, अर्जुनः कार्तवीर्यः। क्वचिद्विकल्पः-नीलमुत्पलम्, नीलोत्पलम् । विशेषणमिति किम्? तक्षकः सर्पः। विशेष्येणेति किम्? लोहितस्तक्षकः।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेणार्थं व्याख्याति, उपसर्जनसंज्ञायाः सिद्धान्तमपि विस्तृततया प्रतिपादयति, तस्य काशिकाकारः साररूपेणार्थं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति।

"पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च'[70]

समासप्रकरणे इदम् अष्टपञ्चाशत्तमं सूत्रमस्ति । शब्दकौस्तुभकार भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति- एते सुबन्ताः समानाधिकरणेन सुपा सह प्राग्वत्। पूर्वेणैव सिद्धे पूर्वनिपातनियमार्थमिदम्। गुणक्रियाशब्दैः सह समासे पूर्वादीनामेव पूर्वनिपातो यथा स्यात्। पूर्ववैयाकरणः। अपराध्यापकः। इत्यादि। अपरश्चासावर्द्धश्च पश्चाद्धः। "पश्चात्[71] इति पठिष्यमाणेन "अर्द्धच" (का.वा.) इति वार्तिकेनापरस्य पश्चभावः। 'पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्' इति कालिदासः।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह :- पूर्व, अपर, प्रथम, चरम,जघन्य, समान, मध्य, मध्यम, वीर इत्येते सुबन्ताः समानाधिकरणेन सुपा सहसमस्यन्ते, तत्पुरुषश्च समासो भवति। पूर्वपुरुषः। अपरपुरुषः। इत्यादि। पूर्वस्यैवायंप्रपञ्चः।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेणार्थं करोति, तस्य काशिकाकारो सरलार्थं करोति, येन सूत्रार्थावगमने सौकर्यं भवति ।

"श्रेण्यादयः कृतादिभिः[72]

समासप्रकरणे इदम् एकोनषष्टितमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति - अर्थः प्राग्वत्। श्रेण्यादिषु च्व्यर्थवचनम्। अश्रेणयः श्रेणयाः कृताः श्रेणिकृताः। एकेन शिल्पेन पण्येन वा ये जीवन्ति तेषां समूहः श्रेणि। श्रेण्यादयः पठ्यन्ते। कृतादिराकृतिगणः। च्व्यन्तानां तु "कुगतिप्रादयः"[73] इति नित्यं समासः परत्वात्। श्रेणि, एक, पूग, मुकुन्द, राशि, विषय, निचय, निधन, इन्द्र, देव, मुण्ड, भूत, श्रवण, वदान्य, अध्यापक, अभिरूपक, ब्राह्मण, क्षत्रिय, पटु, पण्डित, कुशल, चपल, निपुण, कृपण इति श्रेण्यादिः।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह श्रेण्यादयः सुबन्ताः कृतादिभिः समानाधिकरणैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति। (श्रेण्यादिषु च्व्यर्थवचनम्) । अश्रेणयः श्रेणयः कृताः श्रेणिकृताः। एककृताः। श्रेण्यादयः पठ्यन्ते।

कृतादिराकृतिगणः । च्व्यन्तानां तु "कुगतिप्रादयः' इत्यनेन नित्यसमासः। श्रेणीकृताः।तथा च अत्रापि शब्दकौस्तुभवत् श्रेण्यादीनाम् उल्लेखः कृतः। कृत। मित। मत। भूत ।उक्त। समाज्ञात। समाम्नात। समाख्यात। संभावित। अवधारित। निराकृत।अवकल्पित। उपकृत। उपाकृत। इति कृतादिः।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेणार्थं करोति, तस्य काशिकाकारो विस्तृततया अर्थं विविच्य प्रतिपदम् अर्थं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति। शब्दकौस्तुभकारः केवलं श्रेण्यादिनामेव व्याख्यां करोति। काशिकाकारस्तु श्रेण्यादीनां कृतादीनाञ्च व्याख्यां विधाति। विषयदृष्ट्या द्वयोर्गन्थयोर्मध्ये कोऽपि भेदः नास्ति।

"क्तेन न विशिष्टेनानञ्''[74]

समासप्रकरणे इदं षष्टितमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति - नञ्मात्राधिकेन क्तान्तेनानञ् क्तान्तं समस्यते, स तत्पुरुषः। कृतं च तदकृतं च कृताकृतम्। एकमेव वस्तु एकदेशकरणात्कृतमेकदेशान्तरस्याकरणाच्चाकृतमित्युच्यते। पीतापीतम्। उदितानुदितम्। नुडिडाधिक्येऽपीष्यते। अशितानशितम्। क्लिष्टाक्लिशितम्। नुडिड्ग्रहमभेदकस्य विकारस्याप्युपलक्षणम्। "शाच्छोरन्यतरस्याम्''[75] छाताच्छितम् । पूर्वनिपातनियमार्थं सूत्रारम्भः।

'कृतापकृतादीनामुपसंख्यानम्' (का.वा.)। कृतापकृतम्। भुक्तविभुक्तम्। पीतविपीतम्। गतप्रत्यागतम्। भावेक्त:। यातं च तदनुयातं च तदानीमेव पुनर्गमनात् यातानुयातम्। क्रयाक्रयिका। "अल्पे''[76]इति कप्रत्यय:। तदन्तश्च स्वभावात्स्त्रियाम् । "अन्येषामपि दृश्यते''[77] इति दीर्घ:। महान् क्रय: क्रयशब्देनोच्यते, गोबलीवर्दन्यायात् । एवं पुटापुटिका, फलाफलिका, मानोन्मानिकेति। समानाधिकरणाधिकार शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम् (का.वा.)। शाकप्रिय: पार्थिव: शाकपार्थिव:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- नबव विशेषो यस्य सर्वमन्यत् प्रकृत्यादिकं तुल्यं तन्नविशिष्टम्, तेन नविशिष्टेन क्तान्तेन समानाधिकरणेन सह अनञ् क्तान्तं समस्यते, तत्पुरुषश्च समासो भवति। कृतं च तदकृतं च कृताकृतम् । भुक्ताभुक्तम्। पीतापीतम्। उदितानुदितम्। नुडिटौ तद्भक्तत्वान्नैव भेदकौ। अशितानशितेन जीवति, क्लिष्टाक्लिशितेन वर्त्तते। (कृपापकृतादीनामुपसंख्यानम्) कृतापकृतम्। भुक्तविभुक्तम्। पीतविपीतम्। गतप्रत्यागतम्। यातानुयातम्। क्रयाक्रयिका। पुटापुटिका। फलाफलिका। मानोन्मानिका। (समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च)। शाकप्रधान: पार्थिव: शाकपार्थिव: । कुतपसौश्रुत:। अजातौल्वलि:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृततरूपेणार्थं . व्याख्याति, उदाहरणानाञ्चार्थं कृत्वा सम्बन्धितसूत्रै: साधयति च, तस्य काशिकाकारोसाररूपेण सूत्रस्यार्थं विविच्य व्याख्याति, शब्दकौस्तभस्यानकरणमात्रमेव करोति, येनसूत्रार्थावगमने सौकर्यं भवति ।

विशेष: - विशिष्टेन-अधिकेन। भुक्तविभक्तम- अत्र विशब्दोऽशोभनार्थो विरूपवत् ।क्रयाक्रयिका-महान् क्रय: क्रय उच्यते। अल्पक्रय: क्रयिका। समासे अन्येषामपिदृश्यत इति दीर्घ:।

"सन्महत्परमोत्तमोत्कृष्टा: पूज्यमानै:''[78]

समासप्रकरणे इदम् एकषष्टितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति- एते पूज्यमानै: सह प्राग्वत्। गुणक्रियाशब्दै: सह समासे सदादीनां पूर्वनिपातनियमार्थं सूत्रम्। सत्पाठक:। महावैकयाकरण:। इत्यादि। पूज्यमानै: किम्? उत्कृष्टो गौ:। कर्दमादुद्धत इत्यर्थ:। 'महाजन:' 'महोदधि:' 'महापापम्' इत्यादौ तु पूजाभावेऽपि "विशेषणं विशेष्येण बहुलम्"[79] इति समास:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- सत्, महत्, परम, उत्तम, उत्कृष्ट इत्येते पूज्यमानै: सह समस्यन्ते, तत्पुरुषश्च समासो भवति। पूज्यमानैरिति वचनात् पूजावचना: सदादयो विज्ञायन्ते। सत्पुरुष:। महापुरुष:। परमपुरुष:। उत्तमपुरुष:। उत्कृष्टपुरुष:। पूज्यमानैरिति किम्? उत्कृष्टो गौ: कर्दमात्।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृततरूपेणार्थं व्याख्याति, तस्य काशिकाकारोऽनुकरणं करोति। विषयदृष्ट्या नास्ति अत्र कोऽपिभेद:। शब्दकौस्तुभकार: कथयति यत् पूजाभावेऽपि "विशेषणं विशेष्येण बहुलम्" इति सूत्रेण समासो भवति अस्मिन् विषये काशिकाकार: किमपि न कथयति- इति विशेष:।

"वृन्दारकनागकुञ्जरै: पूज्यमानम्'[80]

समासप्रकरणे इदं द्विषष्टितमं सूत्रं वर्तते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति - एतै: समानाधिकरणै: पूज्यमानं प्राग्वत्। व्याघ्रादेराकृतिगणत्वादेव सिद्धे पूज्यमानमेवेति नियमार्थं वचनम् । गोवृन्दारक:। गोनाग:। गोकुञ्जर:। नेह-माणवकोऽयं नाग: यस्मान्मूर्ख इति । केचित्तु सामान्यप्रयोगे विध्यर्थमिदमित्याहु:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- वृन्दारक, नाग, कुञ्जर इत्येतै: सह पूज्यमानवाचि सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति । पूज्यमानमिति वचनाद् वृन्दारकादय: पूजावचना गृह्यन्ते। गोवृन्दारक:। अश्ववृन्दारक:। गोनाग:। अश्वनाग:। गोकुञ्जर:। अश्वकुञ्जर:। पूज्यमानमिति किम्? सुसीमो नाग:। यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृततरूपेणार्थं व्याख्याति, तस्य काशिकाकार: विस्तृततया अर्थं विविच्य प्रतिपदं व्याख्याति, येन सूत्रार्थवगमने सौकर्यं भवति।

विशेष: -

1. गोवृन्दारक: - गोश्चाऽसौ वृन्दारकश्च ।
2. गोनाग: - गोश्चाऽसौ नागश्च।
3. गोकुञ्जर: - गोश्चाऽसौ कुञ्जरश्च। एवमेव सर्वम्।

"कतरकतमौ जातिपरिप्रने[81]

समासप्रकरणे इदं त्रय:षष्टितमं सूत्रं विद्यते । शब्दकौस्तुभकार: भट्टोजिदीक्षित:सूत्रस्यास्यार्थं करोति- एतौ समर्थेन सह प्राग्वत् । कतरकठ:। कतमकलाप:। "गोत्रं चचरणै: सह" (भा.श्री.वा.) कतमशब्दसाहचर्यात्कतरशब्दस्यापि तथाविधस्यैव ग्रहणे सिद्धे जातिपरिप्रश्नग्रहणं ज्ञापकं कतमशब्दोऽप्यन्यत्र साधुरिति। तथा च चिरन्तनवृत्तिषुप्रत्युदाहृतं कतरो भवतोर्देवदत्त:। कतमो भवतां देवदत्त इति।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- कतरकतमौ जातिपरिप्रश्ने वर्तमानौ समर्थेन सुपा सह समस्येते, तत्पुरुषश्च समासो भवति। कतरकठ:।कतरकलाप:। कतमकट:। कतमकलाप:। ननु कतमशब्दस्तावजातिपरिप्रश्न एव व्युत्पादित:, कतरशब्दोऽपि साहचर्यात् तदर्थवृत्तिरेव ग्रहीष्यते, किं जातिपरिप्रश्नग्रहणेन? एवं तर्खेतज्ज्ञापयति- कतमशब्दोऽन्यत्रापि वर्त्तत इति। तथा च प्रत्युदाहरणम् – कतरो भवतर्िदेवदत्त:, कतमो भवतां देवदत्त:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृतरूपेणार्थं व्याख्याति, तस्य काशिकाकारो सरलरीत्या अर्थं प्रतिपादयति, येन सूत्रार्थावगमने सौकर्यं भवति । विषयदृष्ट्या नास्ति अत्र कोऽपि भेद:।

कि क्षप[82]

समासप्रकरणे इदं चतु:षष्टितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति- एतत्समानाधिकरणेन सह प्राग्वत्। किंराजा, यो न रक्षति। किंसखा, यो द्रुह्यति। किङ्गौ:, यो न वहति । "किम: क्षेपे'[83] इति समासान्तप्रतिषेध: । क्षेपे किम्? को राजा पाटलिपुत्रे ।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- किमित्येतत् क्षेपे गम्यमाने सुपा सह समस्यते, तत्पुरुषश्च समासो भवति। किंराजा, यो न रक्षति। किंसखा, योऽभिद्रुह्यति। किङ्गौ:, यो न वहति। "किम: क्षेपे" इति समासान्तो न भवति। क्षेपे इति किम्? को राजा पाटलिपुत्रे।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूक्ष्मरूपेणार्थं करोति, तस्य काशिकाकारो विस्तृततया अर्थं विविच्य प्रतिपादयति, येन सूत्रार्थावगमने सौकर्यं भवति। विषयदृष्ट्या नास्ति अत्र कोऽपि भेद:।

"पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्वष्कयणीप्रवक्तृ
श्रोत्रियाध्यापकधूर्तैर्जाति:"[84]

समासप्रकरणे इदं पञ्चषष्टितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति – नपुंसकं पोटा इति हरदत्त:। अमरस्तु – "पोटाजीपंसलक्षणा"[85]इति नपुंसकपर्यायेभ्य: पृथगेवाह। स्तनश्मश्वादियुक्ता स्त्री पोटेति तव्याख्यातार:। उभयथापि शास्त्रीयस्त्रीत्वविशिष्टे पोटाशब्दे वर्तते। यथा शास्त्रीयपुंस्त्वविशिष्टे दारशब्द:। अत्र विषये काशिकाकारस्य मतमस्ति- अभयव्यञ्जना पोटेत्यभिधीयते। अग्रे भट्टोजिदीक्षित: कथयति – गृष्टिरेकवारप्रसूता। धेनु: प्रत्यग्रप्रसवा। वशा वन्ध्या। वेहद् गर्भघातिनी । वष्कयणी तरुणवत्सा। पोटादिभि: सह जाति: प्राग्वत्। इभपोटा। इभयुवति:। अग्निस्तोक:। उदश्वित्कतिपयम्। गोगृष्टि:। गोधेनु:। गोवशा। गोवेहत्। गोवष्कयणी। कठप्रवक्ता। कठश्रोत्रिय:। कठाध्यापक:। कठधूर्त:। जाति: किम्? देवदत्त: प्रवक्ता।

काशिकाकारस्तु अस्य सूत्रस्यार्थं अयमेव करोति- पोटादिभि: सह जातिवाचिसुबन्तं समस्यते, तत्पुरुषश्च समासो भवति। उदाहरणानि तु शब्दकौस्तुभवत् वर्तन्ते । केवलं सूत्रस्यार्थकरणे भेद:।

शब्दकौस्तुभे भट्टोजिदीक्षित: 'कठधूर्त:' इति पदं विवेचयन्नाह यत् इत्यत्र य: कठ: स: धूर्त इत्यर्थो न तु कठत्वं कुत्स्यते। अत: "कुत्सितानि कुत्सनै:''[86] इत्यनेन गतार्थता न शक्या , प्रवृत्तिनिमित्तकुत्सायां तत्प्रवृत्ते:। कथं तर्हि "जनयति कुमुदभ्रान्तिं धूर्तबको बालभत्स्यानाम्" इति । बकधूर्त इति हि युक्तम्? सत्यम एपाट एवायमिति प्रामाणिका:।

एवमेव दृश्यते यत् विषयदृष्ट्या द्वयोर्ग्रन्थयोर्मध्ये नास्ति कोऽपि भेद:। यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृतरूपेण व्याख्याति, तस्य काशिकाकार: सम्यगर्थं कृत्वा प्रतिपदं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति ।

"प्रशंसावचनैश्च'[87]

समासप्रकरणे इदं षष्टितमं सूत्रं विद्यते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति– प्रशस्तवाचिभि: समानाधिकरणै: सह जाति: प्राग्वत् । "मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ"। 'प्रशस्तवाचकान्यमूनि'[88] इत्यमर: । नियतलिङ्गा एते न तु विशेष्यनिघ्ना:। गोमतल्लिका। गोमचर्चिका। गोप्रकाण्डम् । गवोद्ध:। गोतल्लज:। प्रशस्ता गौरित्यर्थ:। जाते: पूर्वनिपातार्थं सूत्रम्। प्रशंसावचनपोटायुवतीत्येकयोगसम्भवे योगविभागस्य प्रयोजनं चिन्त्यम्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं करोति – जातिरिति वर्त्तते। जातिवाचि: सुबन्तं प्रशंसावचनै: सह समस्यते, तत्पुरुषश्च समासो भवति। रूढिशब्दा: प्रशंसावचना गृह्यन्ते मतल्लिकादय:, ते च आविष्टलिङ्गत्वादन्यलिङ्गेऽपि जातिशब्दे स्वलिङ्गोपादाना एव समानाधिकरणा भवन्ति। गोप्रकाण्डम्। अश्वप्रकाण्डम् । गोमतल्लिका। अश्वमतल्लिका। गोमचर्चिका। अश्वमचर्चिका। जातिरिति किम्? कुमारी मतल्लिका। अत्र विषये शब्दकौस्तुभकार: कथयति– प्रशंसयेति वक्तव्ये वचनग्रहणं रूढिशब्दपरिग्रहार्थम्? तेन ये यौगिका: प्रशस्तशोभनरमणीयादय:, ये च विशेषवचना:शुचिमृद्धादय:, ये च जातिशब्दा: सन्त: परत्र प्रयोगात्प्रशंसां गमयन्ति, सिंहो माणवक इति, ते सर्वे व्युदस्ता:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृततया अर्थं व्याख्याति, तस्य काशिकाकार: सरलभाषायाम् अर्थं कृत्वा शब्दकौस्तुभमेवानुकरोति ।

"युवाखलतिपलितवलिनजरतीभि:[89]

समासप्रकरणे सूत्रमिदं सप्तषष्टितमं वर्तते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति – जरद्भिरिति पाठान्तरम्। तत्राद्यपाठे युवशब्देन जरत्या: सामानाधिकरण्यासम्भवात्तदन्यथानुपपत्त्या "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्"[90] इति परिभाषा ज्ञाप्यते। तथा च युवयुवतिशब्दयोर्द्वयोरपि खलत्यादिभिश्चतुर्भिरुभयलिङ्गै: समानाधिकरणै: सह समासे अष्टौ उदाहरणानि पर्यवस्यन्ति। तथाहि, युवाखलति: युवखलति:। युवति: खलती युवखलती। युवा पलित: युवपलित:। युवति: पलिता युवपलिता। युवा वलिन: युववलिन:। युवतिर्वलिना युववलिना। वलिशब्द: पामादि:। युवा जरन् युवजरन्। युवतिर्जरती युवजरती इति। युवशब्दस्य पूर्वनिपातनियमार्थं वचनम्। अनियमो हि प्रसक्त:,गुणशब्दत्वात्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– खलत्यादिभि: समानाधिकरणसह युवशब्द: समस्यते, तत्पुरुषश्च समासो भवति। जरतीभिरिति स्त्रीलिङ्गनिर्देश: । उदाहरणानि तु शब्दकौस्तुभवत् काशिकायामपि वर्तन्ते ।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृततयाप्रतिपदं व्याख्याति, तस्य काशिकाकार: सम्यगर्थं कृत्वैव केवलम् उदाहरणानि प्रस्तौति।

"कृत्यतुल्याख्या अजात्या'[91]

समासप्रकरणे इदं अष्टषष्टितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति– कृत्यप्रत्ययान्तास्तुल्यपर्यायाश्चाजातिवचनेन सह प्राग्वत्। भोज्योष्णम्। भोज्यलक्षणम्। तुल्यश्वेत:। सदृशश्वेत:। पूर्वनिपातनियमार्थं वचनम्। अजात्येति किम्? भोज्य ओदन:। प्रतिषेधसामर्थ्यात् विशेषणमित्यपि न भवति। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– कृत्यप्रत्ययान्तास्तुल्यपर्यायाश्च सुबन्ता अजातिवचनेन समस्यन्ते, तत्पुरुषश्च समासो भवति। भोज्योष्णम्। भोज्यलवणम्। पानीयशीतम् । तुल्याख्या:–तुल्यश्वेत:, तुल्यमहान्, सदृशश्वेत:, सदृशमहान्। अजात्येति किम्? भोज्य ओदन:।

विषयदृष्ट्या द्वयो: ग्रन्थयोर्मध्ये कोऽपि भेद: नास्ति। उभयो: ग्रन्थयो: प्रतिपदं सोदाहरणं व्याख्यातम् अस्ति।

"वर्णो वर्णेन'[92]

समासप्रकरणे इदम् एकोनसप्ततितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति – समानाधिकरणेन सह प्राग्वत्। कृष्णसारङ्ग:। सारङ्गश्चित्र:। स चाकृष्णोऽपि सम्भवति। अत: कृष्णो विशेषणम्। न चासम्भव:,

नानारूपसमाहाराश्चित्रमित्यभ्युपगमात्। चित्रत्वं रूपत्वव्याप्यं नीलत्वादिविरुद्धं जात्यन्तरमेवेति पक्षे तु कृष्णावयवके कृष्णशब्दस्य लक्षणा बोध्या।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह–वर्णविशेषवाचि सुबन्तनं वर्ण विशेषवाचिना सुबन्तेन समानाधिकरणेन सह समस्यते, तत्पुरुषश्च समासो भवति। कृष्णसारङ्ग:। लोहितसारङ्ग:। कृष्णशबल:। लोहितशबल:। अवयवद्वारेण कृष्णशब्द: समुदाये वर्तमान: समानाधिकरणो भवति।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृतया अर्थं व्याख्याति, तस्य काशिकाकार: प्रतिपदम् अर्थं विविच्य व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति। विशेष: – अस्मिन् सूत्रे महर्षिणा पतञ्जलिना (समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानामुत्तरपदलोपश्च) इति वार्तिक: पठित: (काशिका, वैयाकरणसिद्धान्तकौमुदी या. 2.1.6) एष: मध्यमपदलोपी समास:। अस्य अन्यत् नाम शाकपार्थिवादिसमास:। यथा– शाकपार्थिव:। 'शाक: प्रिय: यस्य स:' इति विग्रहे "अनेकमन्यपदार्थे " इति सूत्रेण बहुव्रीहि समासो (शाकप्रिय:) इति शब्द: निष्पद्यते।

'शाकप्रियश्चासौ पार्थिवश्च' इति विग्रहे प्रकृतवार्तिकेन उत्तरपदस्य (प्रियस्य) लोपे (शाकपार्थिव:) इति रूपं निष्पन्नं भवति। महाभाष्ये – 'शाकभोजी पार्थिव: शाकपार्थिव:'। देवपूजको ब्राह्मण:–देवब्राह्मण: । व्यवयवो लोक: त्रिलोक:, तस्य नाथ:– त्रिलोकनाथ: ।

अत्र समाहारार्थे द्विगु: समास: नास्ति। कारणं किमिति चेत् समाहारे तु स्त्रीत्वविवक्षायां 'त्रिलोकी' शब्द निष्पन्न: भवति, न तु 'त्रिलोक:' इति।

"कुमार: श्रमणादिभि:[93]

समासप्रकरणे इदं सप्ततितमं सूत्रं वर्तते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति – पूर्वनिपातनियमार्थं सूत्रम्। येऽत्र स्त्रीलिङ्गा: पठ्यन्ते– श्रमणा, प्रव्रजिता, कुलटा इत्येवमादयस्तै: सह स्त्रीलिङ्ग एव कुमारशब्द: समस्यते। ये तु पुंल्लिङ्गा अध्यापकादयस्तैरुभयथा, प्रातिपदिकग्रहो लिङ्गविशिष्टस्यापि ग्रहणात् । कुमारी श्रमणा कुमारश्रमणा। श्रमणा। प्रव्रजिता। कुलटा। गर्भिणी। तापसी। दासी। बन्धकी। अध्यापक। अभिरूपक। पण्डित। पटु। मृदु । कुशल । चपल। निपुण।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह – कुमारशब्द: श्रमणादिभि: सह समस्यते, तत्पुरुषश्च समासो भवति। येऽत्र स्त्रीलिङ्गा: पठ्यन्ते श्रमणा, प्रव्रजिता, कुलटेत्येवमादयस्तै: सह स्त्रीलिङ्ग एव कुमारशब्द: समस्यते, ये तु पुंल्लिङ्गा अध्यापकोऽभिरूपक: पण्डित इति तैरुभयथा। प्रतिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति– कुमारी श्रमणा कुमारश्रमणा। शेषं सर्वं शब्दकौस्तुभवत् वर्तते। यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृतरूपेणार्थं व्याख्याति, तस्य काशिकाकार: सरलभाषायाम् अर्थं कृत्वा प्रतिपदं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति।

"चतुष्पादो गर्भिण्या[94]

समासप्रकरणे इदं एकसप्ततितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सत्रस्यास्यार्थं करोति – जातिरिति मण्डूकप्लुत्यानुवर्तते चतुष्पाज्जातिवाचिन: सुबन्ता गर्भिणीशब्देन सह प्राग्वत्। गोगर्भिणी। अजागर्भिणी। जाति: किम्? कालाक्षी गर्भिणी चतुष्पात्किम्? ब्राह्मणी गर्भिणी।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– चतुष्पाद्वाचिन: सुबन्ता गर्भिणीशब्देन समस्यन्ते, तत्पुरुषश्च समासो भवति। गोगर्भिणी। अजागर्भिणी। 'चतुष्पाज्जातिरिति वक्तव्यम्'। इह मा भूत्– कालाक्षी गर्भिणी, स्वस्तिमती गर्भिणी। चतुष्पाद इति किम्?. ब्राह्मणी गर्भिणी।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृततया अर्थं व्याख्याति, तस्य काशिकाकार: अनुकरणमेव विधाति। विषयवस्तुदृष्ट्या द्वयोर्ग्रन्थयोर्मध्ये नास्ति कोऽपि भेद:।

"मयूरव्यंसकारादयश्च"[95]

समासप्रकरणे इदं द्वासप्ततितमं सूत्रं वर्तते। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति – 'एते समुदाया निपात्यन्ते। चकारोऽवधारणार्थः समासान्तरं व्यावर्तयति। व्यंसको धूर्तः। मयूरश्चासौ व्यंसकश्चेति विग्रहः। व्यंसकशब्दस्य गुणवचनत्वात्पूर्वनिपाते प्राप्ते वचनम् । एवं छात्रव्यंसकादीनां यवनमुण्डपर्यन्तानाम्।

काशिकाकारस्तु सूत्रस्यास्यार्थं विवेचयन्नाह- समुदया एव निपात्यन्ते। मयूरव्यंसकादयः शब्दास्तत्पुरुषसंज्ञा भवन्ति। चकारोऽवधारणार्थः, परममयूरव्यंसकदति समासान्तरं न भवति। मयूरव्यंसकः। छात्रव्यंसकः। काम्बोजमुण्डः । यवनमुण्डः।नन्दसि-हस्तेगृह्य, पादेगृह्य, लाङ्गलेगृह्य, पुनीय।

अन्येत्वाहुः – मयूर इव व्यंसकः। छात्र इव व्यंसकः। कम्बोज इव मुण्डः। यवन इव मुण्डः। उपमानसमासोऽयम्। तत्र – "उपमानानि सामान्यवचनैः"[96] इत्येव सिद्धे पुनर्विधानं "तत्पुरुषे तुल्यार्थतृतीया'"[97] इति पूर्वपदप्रकृतिस्वरो मा भूदिति। स ह्युपमानसंशब्देन विहिते समासे विधीयते। मयूरव्यंसकः। छात्रव्यंसकः। कम्बोजमुण्डः। यवनमुण्डः। पादगृह्य, हस्तगृह्य, लालगृह्य, पुनर्दाय, एते चत्वारश्च छन्दसि। शब्दकौस्तुभकारः अस्मिन्नेव प्रसंगेऽग्रे कथयति – "एहीडादयोऽन्यपदार्थे " (ग.सू.)। एहीडेति यस्मिन्कर्मणि तदेहीडम्। एवम् एहियवम्। एहिवाणिजेति यस्यां क्रियायां सा एहिवाणिजा। एवम् अपेहिवाणिजा। प्रेहिवाणिजा। एहि स्वागतमिति यस्यां क्रियायां सा एहिस्वागता। "ऊह वितर्के"[98] लोण्मध्यमैकवचनम्। प्रोहकरटमिति यस्यां सा प्रोहकरटा। निपातनात्परस्मैपदम्। प्रोहकटा। प्रोहकर्दमा। उद्धरचूडा। आहरवसना। आहरवनिता। कृन्तविचक्षणा। उद्धरकोष्ठात् उत्सृज देहीति यस्यां क्रियायां सा उद्धरोत्सृजा। "आख्यातमाख्यातेन" (ग.सू.) इति सिद्धे असातत्यार्थं वचनम्। एवम् – उद्धमविधमा। उत्पच-निपचा। उत्पतनिपता। इहैषां समासानामन्यपदार्थे स्त्रीलिङ्गत्वाट्टाप्। एवमग्रेऽपि उदक् च अवाक् च उच्चावचम्। उच्चैश्च नीचैश्चोच्चनीच्चम्। आचितं चोपचितं च आचोपचम्। आचपचम्। निश्चितं चप्रचितं च निश्चप्रचम्। एते सर्वे निपात्यन्ते। न विद्यते किञ्चन यस्यासावकिञ्चनः। सकिञ्चनः। स्नात्वाकालकः। पीत्वास्थिरकः। भुक्त्वासुहितः। प्रोष्यपापीयान्। उत्पत्यपाकुला। निपत्यरोहिणी। निषद्यध्यामा। अपेहिप्रणमा। "जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति" (का.वा.) जहीति लोण्मध्यमैकवचनान्तम् । तत्कर्मणा बहुलं समस्यते आभीक्ष्ण्येगम्यमाने समासेन चेत् कर्ताभिधीयते। जहिजोडमित्याभीक्ष्ण्येन य आह स जहिजोडः। जहिस्तम्बः। उज्जहिस्तम्बः। "आख्यातमाख्यातेन क्रियासातत्ये" (ग.सू.)। अनीतपिबतेत्येवं यत्र सततमभिधीयते साऽश्रीतपिबता। एवं पचतभृज्जता। खादतमोदता। खादतवसता। आहरनिचया। आहरनिष्कषा। उत्पचनिपचा। भिन्धिलवणा। भिन्धि लवणमिति यस्यामभिधीयते साक्रिया तथा। एवं- पचलवणा। नास्ति कुतोऽपि भयं यस्य सः अकुतोभयः। कान्दिशंगच्छामीति य आह स कान्दिशीकः। अहोपुरुषोऽहामिति यो मन्यते तस्य भाव आहोपुरुषिका। अहं शक्तोऽहं शक्त इति यस्यां साहमहमिका। या इच्छा अभिप्राय इति यदृच्छा। एहिरेपाहिरा। एहि रे पाहि रे इति यस्यां सा तथेत्यर्थः। काशिकायान्तु काशिकाकारः शब्दकौस्तुभस्यैव अनुकरणं करोति, स उदाहरणानि लिखति। तस्य सम्बन्धे विशद विवरणन्तु शब्दकौस्तुभे एव कृतं भट्टोजिदीक्षितेन। विषयदृष्ट्या उभयोर्ग्रन्थयोर्मध्ये कोऽपि भेदः नास्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेण प्रतिपदं सूत्रेणसहितं सोदाहरणानि च व्याख्याति, येन सूत्रार्थावगमेन सौकर्यं भवति तथा पाठकः तस्मिन् सम्बन्धे सम्यक्रूपेण अवगच्छति।

"पर्वापराधरोत्तरमेकदेशिनैकाधिकरणे''[99]

समासप्रकरणे इदं त्रिसप्ततितमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति – अवयविना सह पूर्वादयः समस्यन्ते, स तत्पुरुषः, एकत्वसंख्याविशिष्टश्चेदवयवी भवति । पूर्वं कायस्येति पूर्वकायः। अपरकायः, इत्यादि। षष्ठीसमासापवादोऽयम्। तथा च 'कायपूर्वः' इति प्रयोगोऽनेन व्यावर्यते । 'पूर्वकायः' इति प्रयोगस्तु पूर्वश्चासौ कायश्चेति कर्मधारयेणापि सिद्धः। समुदायेषु हि वृताः शब्दाः अवयवेऽपि वर्तन्ते इति न्यायात्, ऊर्ध्वकाय इतिवत् । ननु षष्ठीसमासव्यावृत्तयेऽपि सूत्रं न कार्य, षष्ठ्या एवेह दुर्लभत्वात्। पञ्चम्या हीह भाव्यम्, दिशि दृष्टः शब्दो दिक्शब्द इति व्याख्यानेन सम्प्रत्यदिग्वृत्तिनाऽपि योगे पञ्चमीस्वीकारात्? सत्यम्। अवयववृत्तिभिर्योगे षष्ठ्येवेष्यते "तस्य परमानेडितम्"[100] इति लिङ्गात्। एकदेशिशब्दोऽयमवयवे रूढः।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- एकदेशोऽस्यास्तीत्येकदेशी अवयवी, तद्वाचिना सुबन्तेन सह पूर्वापराधरोत्तरशब्दाः सामर्थ्यादिकदेशवचनाः समस्यन्ते, तत्पुरुषश्च समासो भवति। एकाधिकरणग्रहणमेकदेशिनो विशेषणम्, एकं

चेदधिकरणमेकद्रव्यमेकदेशि भवति। षष्ठीसमासापवादोऽयं योगः। पूर्वं कायस्य पूर्वकायः। अपरकायः। अधरकायः। उत्तरकायः। एकदेशिनेति किम्? पूर्वं नाभेः कायस्य। इत्यस्मिन् सन्दर्भे शब्दकौस्तुभकारः व्याख्याति- नाभेः पूर्वो भागः स कायस्य सम्बन्धीत्यर्थः। नाभेरिति दिग्योगलक्षणपञ्चमी। अत्र पूर्वस्य भागस्य नाभिरवधिर्न त्वेकदेशी अतो न नाभ्या समासः। कायेन तु स्यादेव पूर्वकायो नाभेरिति,पूर्वशब्दस्य नित्यसापेक्षत्वात्। एकाधिकरणेकिम्? पूर्वं छात्राणामामन्त्रयस्व। नेयं निर्धारणे षष्ठी, किन्तु समुदायसमुदायिसम्बन्धे। बहुवचनं तद्भूतावयवभेदसमुदायविवक्षया यथा 'छात्राणां पञ्चमः' इति। ततश्च छात्राणामेकदेशित्वमस्त्येव, किन्त्वेकत्वसंख्यावैशिष्ट्यं नास्तीति समासाभावः। कथन्तर्हि 'मध्याह्नः' 'सायाह्नः' इति? अत्राहुः – सर्वस्यैकदेशवाचिनोऽह्ना समासः, "संख्याविसाय''[101]इति ज्ञापकात् । नह्यन्यथा सायपूर्वत्वमह्नस्योपपद्यते। केचित्तु नेदं विशेषापेक्षं ज्ञापकमर्हति, किन्तु सामान्यापेक्षम्। कथं मध्याह्नः, सायाह्नः इति? इति सन्दर्भ काशिकाकारः तर्कयति"संख्याविसायपूर्वस्याह्नस्य'' इति ज्ञापकात्सर्वेणैकदेशशब्देनाह्नः समासो भवति । यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेणार्थं व्याख्याति, तस्य काशिकाकारः सम्पूर्णमर्थं कृत्वा प्रतिपदं व्याख्याति, येन सूत्रार्थावगमने सौकर्य भवति। विशेषः – 'असति बाधके सर्वसामान्यं ज्ञापकम्' इति परिभाषाम् आधारीकृत्य शब्दकौस्तुभकारः भट्टोजिदीक्षितः विवेचयति-सर्व एकदेशवाची कालेन समस्यते इति ज्ञाप्यशरीरम्। तेन 'मध्यरात्रः' 'उपारताः पश्चिमरात्रगोचराः' इत्यादि सिद्धम्। न चोर्ध्वकायवत्सामानाधिकरण्येन सायाह्नमध्यरात्रादेर्निर्वाहः शङ्कयः, "अहः सर्वैकदेश"[102] इत्यादिना विहितस्याचः "अहोऽह्न एतेभ्यः"[103] इत्यहादेशस्य चैकदेशिसमासं विनाऽनुपपत्तेः। कथन्तर्हि 'दिनमध्यः' 'रात्रिमध्यः' इति ज्ञापकसिद्ध न सर्वत्रेत्यदोषः।

"अर्धं नपुंसकम्'[104]

समासप्रकरणे इदं चतुःसप्ततितमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति – नित्यक्लीबोऽर्धशब्द एकद्रव्ये विद्यमानेनावयविवाचिना सह प्राग्वत्। 'भित्तं शकलखण्डे वा पुंस्योऽर्धं समेंऽशके'[105] इत्यमरः। इह समेंऽशके तु अर्धं नित्यनपुंसकमित्यर्थः। अर्धं पिप्पल्याः अर्धपिप्पली। "एकविभक्तावषष्ठ्यन्तवचनम्' (का.वा.) इति पिप्पलीशब्दस्यानुपसर्जनत्वान्न ह्रस्वः। एकाधिकरणेकिम्? अर्धं पिप्पलीनाम्। कथं तर्हि अर्धपिप्पल इति? अर्धानि पिप्पलीनामिति विग्रहेमा भूत्। खण्डसमुच्चये तु भविष्यति, अर्धपिप्पली च अर्धपिप्पली चेत्यादि विग्रहात् ।

एकदेशिनेति किम्? अर्धं पशोर्देवदत्तस्य। देवदत्तोऽत्र स्वामी न त्ववयवीति न तेन समासः। पशुना तु स्यादेव अर्धपशुर्देवदत्तस्येति । देवदत्तस्वामिकं पशोरधर्ममित्यर्थः। नपुंसकं किम्? ग्रामार्धः। नगराधः। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह – एकदेशिनैकाधिकरणे इति वर्तते। समप्रविभागेऽर्धशब्दो नपुंसकमाविष्टलिङ्गः, तस्येदं ग्रहणम्। अर्द्धमित्येतत् नपुंसकमेकदेशिनैकाधिकरणेन समस्यते, तत्पुरुषश्च समासो भवति। षष्ठीसमासाऽपवादोऽयं योगः। अर्द्धं पिप्पल्या अर्द्धपिप्पली। अर्द्धकोशातकी। नपुंसकमिति किम्? ग्रामार्द्धः, नगरार्द्धः। एकदेशिनेत्येव- अर्द्ध पशोर्देवदत्तस्य। देवदत्तेन सह समासो न भवति। एकाधिकरण इत्येव- अर्द्धं पिप्पलीनाम् । शब्दकौस्तुभकारः भट्टोजिदीक्षितः 'नपुंसकम् किम्? ग्रामार्धः, नगराधः, इत्यस्मिन् विषये व्याख्याति – अर्धमिति निर्देशादेव सिद्धे नपुंसकग्रहणं सूत्रे लिङ्गनिर्देशो नविवक्षित इति ज्ञापयितुम्। तेन 'तस्येदम्'[106] इति लिङ्गत्रयेऽपि भवति। एतत्सूत्रं "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः'[107] इत्यत्र भाष्ये प्रत्याख्यातम्। तथाहि, 'अर्धपिप्पली' इति कर्मधारयेण सिद्धम्, समुदाये दृष्टाः शब्दाः अवयवेऽपि वर्तन्ते इति न्यायात्। समप्रविभागादन्यत्र हि तवाप्येषैव गतिः। अर्धाहारः, अर्धहारः, अर्धजरतीयम्, अर्धवैशसम्, अर्धोक्तम्, अर्धविलोकितम् इत्यादिदर्शनात्। न च समप्रविभागे षष्ठीसमासं बाधितुमिदं सूत्रमिति वाच्यम्, षष्ठीसमासस्यापीष्टत्वादिति।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेणार्थं विवृणोति, तस्य काशिकाकारः प्रतिपदम् अर्थं कृत्वा व्याख्याति। काशिकाकारस्तु केवलं मुख्यविषयं प्रतिपादयति, तस्य विस्तृतविवेचनं शंकासमाधानञ्च शब्दकौस्तुभे भट्टोजिदीक्षितः करोति, येन सूत्रार्थावगमने सौकर्यं भवति।

"द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्''[108]

समासप्रकरणे इदं पञ्चसप्ततितमं सूत्रं विद्यते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति– एतानि एकदेशिना सह वा प्राग्वत्स्युरेकं चेद् द्रव्यम्। द्वितीयं भिक्षाया: द्वितीयभिक्षा, भिक्षाद्वितीयम्। तृतीयभिक्षा। भिक्षातृतीयम् इत्यादि। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– एकदेशिनैकाधिकरण इति वर्त्तते। षष्ठीसमासापवादोऽयं योग:। अन्यतरस्यां ग्रहणात् सोऽपि भवति। "पूरण" इति प्रतिषेधश्चात् एवान्यतरस्यां ग्रहणसामर्थ्यान्न प्रवर्त्तते। द्वितीयादीनि शब्दरूपाणिएकदेशिनैकाधिकरणेन सहान्यतरस्याम् समस्यन्ते, तत्पुरुषश्च समासो भवति। द्वितीयं भिक्षाया द्वितीयभिक्षा। षष्ठीसमास पक्षे–भिक्षाद्वितीयं वा। तृतीयं भिक्षाया: तृतीयभिक्षा। भिक्षातृतीयं वा। चतुर्थं भिक्षाया: चतुर्थभिक्षा। भिक्षाचतुर्थं वा। तुर्यं भिक्षाया: तुर्यभिक्षा । भिक्षातुर्यं वा। तुरीयशब्दस्यापीष्यते– तुरीयं भिक्षाया: तुरीयभिक्षा। भिक्षातुरीयं वा। एकदेशिनेत्येव– द्वितीयं भिक्षाया भिक्षुकस्य। एकाधिकरण इत्येवद्वितीयं भिक्षाणाम्। शब्दकौस्तुभकार: विवेचयति – "पूरण''[109]इत्यत्र हि अर्थग्रहणं न तु पूरणाधिकारविहितप्रत्ययग्रहणम्, अर्थशब्दस्य प्रत्येकमभिसम्बन्धात्। स्वार्थिकाश्च प्रकृत्यर्थेनार्थवन्त इति अन्नन्तस्यापि पूरणार्थतास्त्येवेति भाष्ये स्थितम्। तुरीयस्यापीष्यते इति वृत्तिकारा:। एतच्च भाष्यादौ नास्ति।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: विस्तृतरूपेणार्थं व्याख्याति, तस्य काशिकाकार: प्रतिपदमर्थं कृत्वा सूत्रस्यार्थं प्रतिपादयति, येन सूत्रार्थावगमने सौकर्यं भवति। काशिकाकार: स्पष्टतया विषयस्य प्रतिपादनं करोति, स: सम्यग्रूपेण अर्थ विवृणोति। शब्दकौस्तुभे तु विस्तृतं पर्यालोचनं कृतमस्ति।

"प्राप्तापन्ने च द्वितीयया"[110]

समासप्रकरणे इदं षड्सप्ततितमं सूत्रं वर्तते । शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति– एतौ द्वितीयान्तेन सह प्राग्वत्। पक्षे "द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नै:''[111] इति समास:। प्राप्तो जीविकां प्राप्तजीविक:। जीविकाप्राप्त इतिवा। आपन्नजीविक:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– एकदेशिनैकाधिकरण इति निवृत्तम्। द्वितीयासमासेप्राप्ते वचनमिदम्। विधानसामर्थ्यात्सोऽपि भवति । प्राप्त, आपन्न इत्येतौ द्वितीयान्तेन सह समस्यतेते, तत्पुरुषश्च समासो भवति। प्राप्तो जीविकां प्राप्तजीविक:। जीवीकाप्राप्त इति वा। आपन्नो जीविकाम् आपन्नजीविक:। जीविकापन्नइति वा।

इत्यस्मिन् प्रसङ्गे शब्दकौस्तुभकार: भट्टोजिदीक्षित: विवेचयति–यद्यपि प्राप्ता जीविका येनेति कृत्वा कर्मणि क्तान्तेन बहुव्रीहौ ‘प्राप्तजीविक:’ इत्यादि सिध्यति, तथापि समासान्तोदात्तार्थं वचनं 'प्राप्तसुख:' इत्याद्यर्थञ्च। इह हि बहुव्रीहौ "जातिकालसुखादिभ्य:" (का.वा.) इति निष्ठाया: परनिपात: स्यात् । लिङ्गविशिष्टपरिभाषया प्राप्तशब्दस्याप्ययं समास:। प्राप्ता जीवीका प्राप्तजीविकेति। यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृतरूपेण विवेचयति, तस्य काशिकाकार: साररूपेण अर्थं विवेचयति, येन सूत्रस्यार्थागवमने सौकर्यं भवति ।

"काला: परिमाणिना"[112]

समासप्रकरणे इदं सप्तसप्ततितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति– परिमीयते परिच्छिद्यते येन तत्परिमाणं तद्वान्परिमाणी। परिच्छेद्यवाचिना सुबन्तेन सह काला: समस्यन्ते, स: तत्पुरुष:। मासो जातस्य यस्य स मासजात:। ननु जातो देवदत्त: तस्य च दिष्ट्यादि परिच्छेदकं न तु काल:, तस्य क्रियामात्रपरिच्छेदकत्वादिति चेत्? सत्यम्, साक्षात्क्रियां परिच्छिन्दन्नपि कालस्तद्वारादेवदत्तं – परिच्छिनत्ति। यस्य हि जननादूर्ध्वं मासो गत: स मासजात: इति व्यवहियते। तत्र व्यवहारकालजननक्षणयोरन्तरालभावी मासो जननद्वारा जातमपि परिच्छिनत्त्येव।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह–परिमाणमस्यास्तीति परिमाणी, तद्वाचिना सुबन्तेन सह सामर्थ्यात्परिमाणवचना: कालशब्दा: समस्यन्ते, तत्पुरुषश्च समासो भवति मासो जातस्य मासजात:। संवत्सरजात:। द्वयहजात: । त्यहजात: ।

'द्वयहजात:' अत्र शब्दकौस्तुभकार: भट्टोजिदीक्षित: प्रतिपादयति – द्वयोरह्नो: समाहार:। “राजाह: सखिभ्यष्टच्''[113]। "न संख्यादे: समाहारे "[114] इत्याह्नादेशप्रतिषेध:। कथन्तर्हि 'द्वयहजात:' इति? उच्यते, नायं समाहारे द्विगु: किन्तूत्तरपदे द्वे अहनी जातस्य यस्येति त्रिपदतत्पुरुषाभ्युपगमात्। ननु सुप्सुपेत्येकत्वस्य विवक्षितत्वात्कथमेतदिति चेत्? वचनादित्यवेहि। उक्तं हि वार्त्तिककृता। "उत्तरपदेन

परिमाणिना द्विगोः समासवचनम्" इति। अस्यार्थः - परिमाणिवचनेनोत्तरपदेन द्विगोः सिद्ध्ये समासो वक्तव्यः। अर्थात् द्वयोर्युगपदिति गम्यते। तथाच वचनाद्बहूनामप्ययं तत्पुरुषो भवति । एवं द्वौ मासौ जातस्य पूर्वयोस्तत्पुरुषे सति। "कालान्ते द्विगौ''[115] इति पूर्वपदप्रकृतिस्वरो भवति। द्वयोर्मासयोः समाहारो द्विमासम्। पात्रादिः। द्विमासं जातस्येति तु विगृह्य समासे क्रियमाणे सतिशिष्टत्वात्समासान्तोदात्तत्वं स्यात् इति। एवमेव कथयितुं शक्यते यत् यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेण सूत्रस्यार्थं विवृणोति, तस्य काशिकाकारः साररूपेण व्याख्याति, येन सूत्रस्यार्थावगमने सौकर्यं भवति। शब्दकौस्तुभकारस्तु सर्वं पक्षम् समालोच्य व्याख्याति, येन सूत्रार्थावगमने कोऽपि क्लेशो न भवति ।

"नञ्[116]

समासप्रकरणे इदं अष्टसप्ततितमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति - नञ् सुपा सह प्राग्वत्। अब्राह्मणः। अवृषलः। उत्तरपदार्थप्रधानोऽयम्। तथाहि आरोपितत्वं नञा द्योत्यते। तच्चोत्तरपदप्रवृत्तिनिष्ठम्। तथा चारोपितं यद् ब्राह्मणत्वं तद्विशिष्टे समासः शक्तः। विशेषणविशेष्ययोः संसर्गस्त्वारोप एव। तेन ब्राह्मणाभिन्नत्वबोध आर्थः। अत एवानुपसर्जनत्वादतस्मिन्नित्यादिसर्वनाम कार्यनिर्वाहः। स्यादेतत्। विघ्नानामभावो अविघ्नमित्यत्रापि परत्वात्तत्पुरुषः स्यात्। अव्ययीभावस्तु 'निर्मक्षिकम्' इत्यादौ सावकाशः। मैवम्, उत्तरपदार्थप्राधान्य एवास्य प्रवृत्तेः। उक्तं हि प्राक् "अव्ययीभावादिमहासंज्ञाव्यवहारेण पूर्वाचार्योक्तार्थनियमोऽप्युत्सर्गतः स्वीक्रियते" इति। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- नञ् समर्थेन सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। न ब्राह्मणः अब्राह्मणः। अवृषलः। (नञो नलोपस्तिङि क्षेपे) अपचसि त्वं जाल्म। यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेण प्रतिपदं व्याख्याति, तस्य काशिकाकारः पूर्णरूपेणार्थं कृत्वा प्रतिपादयति, येन सूत्रार्थावगमने कण्ठस्थीकरणे चसौकर्यं भवति।

विशेषः -

तपः श्रुतञ्च योनिश्चेत्येतद् ब्राह्मणकारणम्।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव स॥
(शब्दकौस्तुभम् 2-2-6)
तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।
(शब्दकौस्तुभम् 2-2-6)

"ईषदकृता[117]

समासप्रकरणे इदं एकोनाशीतितमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितिः अस्य सूत्रस्यार्थं करोति -

स्पष्टोऽर्थः। ईषत्पिङ्गलः। ननु 'ईषद्रक्तम्' 'ईषदुन्नतम्' इत्यादावव्याप्तिः। ईषद्गार्यादावतिव्याप्तिश्च। सत्यम्। अत एव वार्तिककृतोक्तम्- "ईषद् गुणवचनेन" इति। अकृतेत्यपनीय तत्स्थाने गुणवचनेनेति पूरणीयमित्यर्थः। अतो नाव्याप्त्यतिव्याप्ती। यद्यपि गर्गापत्यत्वे उत्कर्षापकर्षौ न स्तस्तथापि तदेकार्थसमवायिनां क्रियागुणानां तौ बोध्यौ। तथा च प्रयुज्यते- 'गार्ग्यतरः' 'गार्यकल्पः' इत्यादि।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- ईषदित्ययं शब्दोऽकृदन्तेन सुपा सह समस्यते तत्पुरुषश्च समासो भवति। (ईषद् गुणवचनेनेति वक्तव्यम्) । ईषत्कडारः। ईषत्पिङ्गलः। ईषद्विकटः। ईषदुन्नतः। ईषत्पीतम्। ईषद्रक्तम्। गुणवचनेनेति किम्? इह न भवति - ईषद्गार्ग्यः। कारणं किमिति चेत् शब्दोऽयंजातिवचनोनगुणवचनः।

एवं दृश्यते यत् विषयेऽस्मिन् शब्दकौस्तुभकारः विस्तृततया अर्थं व्याख्याति, तस्य काशिकाकारः सरलतया अर्थं कृत्वा व्याख्याति, सम्यग्तया अर्थावगमनाय बहूदाहरणानि व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति।

"षष्ठी[118]

समासप्रकरणे इदम् अशीतितमं सूत्रमस्ति । शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यार्थं करोति – षष्ठ्यन्तं समर्थेन सुबन्तेन सह प्राग्वत् ।

राजपुरुषः। कृद्योगा च षष्ठी समस्यत इति वाच्यम् (का.वा.)। इध्मव्रश्चनः । प्रतिपदविधाना चेति निषेधस्यायमपवादः। वस्तुतस्तु स निषेधोऽयं तदपवादश्चेत्युभयमपि न वक्तव्यमिति वक्ष्यते।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। राज्ञः पुरुषो राजपुरुषः। ब्राह्मणकम्बलः। (कृद्योगा'[119]च षष्ठी समस्यत इति वक्तव्यम्)। इध्मप्रवश्चनः । पलाशशातनः। किमर्थमिदमुच्यते? 'प्रतिपदविधाना षष्ठी न समस्यते' इति वक्ष्यति, तस्यायं पुरस्तादपकर्षः।[120]

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोदीक्षितः विस्तृततया सूत्रार्थं व्याख्याति, तस्य काशिकारः प्रतिपदमर्थं कृत्वा विस्तृतरूपेणार्थं प्रतिपादयति, येन सूत्रार्थावगमने सौकर्यं भवति।

"याजकादिभिश्च[121]

समासप्रकरणे इदम् एकाशीतितमं सूत्रं विद्यते। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति – एभिः षष्ठी समस्यते। "तृजकाभ्यां कर्त्तरि''[122]

इत्यस्य प्रतिप्रसवोऽयम्। ब्राह्मणयाजकः। याजक, पूजक, परिचारक, परिवेषक, स्नातक, अध्यापक, उत्सादक, उद्वर्तक, होतृ, पोतृ, भर्तृ, रथगणक, पत्ति, गणक । वृत्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह–पूर्वेण समासः सिद्धः एव, तस्य "कर्तरि च" इति प्रतिषेधेप्राप्ते वचनमिदमारभ्यते प्रतिप्रसवार्थम्। याजकादिभिः सहषष्ठी समस्यते, तत्पुरुषश्च समासो भवति । ब्राह्मणयाजकः। क्षत्रिययाजकः। याजक। पूरक। परिचारक। परिषेचक, क्वचित् परिवेषक इति पाठान्तरम् । स्नातक । अध्यापक। उत्सादक। उद्वर्तक। होतृ। भर्तृ। रथगणक। पत्तिगणक। (तत्स्थैश्च (2) गुणैः षष्ठी समस्यत इति वक्तव्यम्)। चन्दनगन्धः। कपित्थरसः। अस्मिन् वार्तिकसम्बन्धे शब्दकौस्तुभकारः भट्टोजिदीक्षितः किमपि न व्याख्याति, तेन उल्लेखोऽपि न कृतः। अग्रे काशिकाकारः व्याख्याति– (गुणात्तरेण तरलोपश्चेति वक्तव्यम्) सर्वेषां श्वेततरः सर्वश्वेतः। सर्वेषां महत्तरः सर्वमहान्। "न निर्धारणे" इति प्रतिषेधे प्राप्ते वचनमिदम्। सर्वशुक्ला गौः।

अत्र विषये शब्दकौस्तुभकारः व्याख्याति – (गुणात्तरेण तरलोपश्चेति वक्तव्यम् (का.वा.)। तरबन्तं यद् गुणवाचि तेन समास इत्यर्थः। सर्वेषां श्वेततरः सर्वश्वेतः। सर्वेषां महत्तरः सर्वमहान्।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्ततृतया सूत्रस्यार्थं व्याख्याति, तस्य काशिकाकारः शब्दकौस्तुभमनुसृत्य साररूपेण सूत्रस्यार्थं प्रतिपादयति येन सूत्रार्थावगमने सौकर्यं भवति।

"न निर्धारणे[123]

समासप्रकरेण इदं द्वाशीतितमं सूत्रं वर्तते । शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति– निर्धारणे या षष्ठी सा न समस्यते। नृणां द्विजः श्रेष्ठः। अत्र द्विजशब्देन समासप्रसङ्गः। तदपेक्षा हि षष्ठी।

अत्र विषये काशिकाकारस्तु सूत्रस्यार्थं विवेचयन्नाह– पूर्वेण समासे प्राप्ते प्रतिषेधे आरभ्यते। निर्धारणे या षष्ठी सा न समस्यते। जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम्। क्षत्रियो मनुष्याणां शूरतमः। कृष्णा (1)गवां सम्पन्नक्षीरतमा। धावन्नध्वगानां शीघ्रतमः। (प्रतिपद[124] विधाना च षष्ठी न समस्यत इति वक्तव्यम्) । सर्पिषो ज्ञानम्। मधुनो ज्ञानम् ॥ शब्दकौस्तुभकारः विस्तृतयासूत्रार्थं विवेचयन्नाह– कथं 'पुरुषोत्तमः' इति? अत्र समाधानं "द्विवचनविभज्योपपदे तरबीयसुनौ' इति सूत्रे स्थित्वा कैयट आह यस्मान्निर्धार्यते यश्चैकदेशो निर्धार्यते यश्च निर्धारणहेतुरेतत्त्रितयसन्निधाने निर्धारणं भवतीति तत्रैवायं निषेधो न तु त्रितयसन्निधानाभावेऽपीति। यद्वा, पुरुषेषूत्तम इति निर्धारणसप्तम्यां "संज्ञायाम्"[125] इति समासः। यत्त्वेवं सति "न निर्धारणे"[126] इति सूत्रं व्यर्थं स्यादिति । तत्र, स्वरे भेदात् । सप्तमीसमासे हि "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः"[127] इति पूर्वपदप्रकृतिस्वरः षष्ठीसमासे त्वन्तोदात्तत्वं स्यात्। (प्रतिपदविधाना च षष्ठी नसमस्यते इति वाच्यम्)(का.वा.)। सर्पिषोज्ञानम्।

"ज्ञोऽविदर्थस्य करणे''[128]इति षष्ठी। सा च प्रतिपदविधाना "षष्ठीशेषे''[129] इति विहायान्यस्याः सर्वस्या अपि तथात्वात्। न चैवम् अनेनैव गतार्थत्वात् "न निर्धारणे'[130] इति व्यर्थमिति शङ्कयम्। 'यतश्च निर्धारणम्"[131] इति सूत्रं हि षष्ठी न विधत्ते किन्तु सप्तमीमेव। षष्ठी तु तया मा बाधीति प्रतिप्रसूयते इत्यन्यदेतत्।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः प्रतिपदमर्थं कृत्वा विस्तृततया सूत्रार्थं व्याख्याति, येन सूत्रार्थं गहनतया ज्ञातं भवति। काशिकाकारस्तु सूक्ष्मरूपेण तदेवप्रतिपादयति यत् भट्टोजिदीक्षितेन शब्दकौस्तुभे व्याख्यातमस्ति । द्वयोर्ग्रन्थयोः तुलनात्मकाध्ययनेन सूत्रार्थावगमने सौकर्यं भवत्येव। विशेष -

1. कृष्णागवामिति-नात्रायमर्थः- गवां मध्ये कृष्णा सा सम्पन्नक्षीरतमेति, एवं हिकृष्णाशब्दस्य गवामित्यनेन सम्बन्धः, न च तस्य समासप्रसङ्गः, गुणेन नेतिप्रतिषेधात्, तस्माद्गवां मध्ये या सम्पन्नक्षीरतमा सा कृष्णेत्ययमत्रार्थः इति पदमञ्जरी।

2. प्रतिपदेति- षष्ठीशेषे इति सामान्यविहितां षष्ठी मुक्त्वाविशेषलक्षणविहिता षष्ठीप्रतिपदविधाना।

3."साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः। प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये"॥ इति।

4."निष्ठायां कर्मविषया षष्ठी च प्रतिषिध्यते ।
शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते'' ॥ इति ।

"पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन''[132]

समासप्रकरणे इदं त्र्योऽशीतितमं सूत्रं विद्यते। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति - पूरणाद्यर्थैस्त्रिभिः सदादिभिश्च षष्ठी न समस्यते। पूरणे-सतां षष्ठः। अत्र पूरणार्थाः प्रत्यया एव गृह्यन्ते न तु पूरणोम्भनादिशब्दा अपि। गुणश्चेह "सत्त्वे निविशतेऽपैति" इति लक्षितोगृह्यते केवलगुणस्य गुणोपसर्जनद्रव्यस्य च प्रतिपादकः, व्याप्तिन्यायात्। काकस्य कार्ण्यम्। बाह्मणस्य शुक्लाः। सुहितार्थास्तृप्त्यर्थाः। फलानां सुहितः। करणस्यैव शेषत्वविवक्षया षष्ठी। न च "लोकाव्ययनिष्ठाखलर्थतनाम्"[133] इति निषेधः शङ्कयः,तस्य कृद्योगलक्षणषष्ठीविषयकत्वात्। इह सुहितार्थयोगे करणस्य शेषत्वविवक्षैव नियतेत्याहुरिति हरदत्तः। तत्राहुरित्यपरितोषोद्भावनम् । तद्बीजन्तु नियमे प्रमाणाभावः,'नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।

नान्तकः सर्वभूतानां न पुंसां वामलोचने॥' इत्यादिप्रयोगाणां पाक्षिक्यापि शेषत्वविवक्षया सिद्धत्वात्। नन्वेवं षष्ठीसमासे निषिद्धेऽपि तृतीयातत्पुरुषेण 'फलतृप्तः' इति स्यादेवेति चेत्? इष्टापत्तेः। न चैवं निषेधवैयर्थ्यम्, स्वरे विशेषात् ।

सत् - द्विजस्य कुर्वन् कुर्वाणो वा। किंकर इत्यर्थः। शेषे षष्ठी। चोरस्य द्विषन् । इह "द्विषः शतुर्वा वचनम्" इति पाक्षिकी कर्मणि षष्ठी। अव्यय- ब्राह्मणस्य कृत्वा।

तादर्थ्यरूपसम्बन्धस्य सामान्यरूपेण विवक्षायां षष्ठी। ब्राह्मणसम्बन्धिनी क्रियेत्यर्थः।

तव्य - ब्राह्मणस्य कर्तव्यम्। निरनुबन्धकस्य सूत्रे ग्रहणात् तव्यता समासो भवत्येव-स्वकर्तव्यम्। स्वरे भेदः। समानाधिकरणेन - तक्षकस्य सर्पस्य। विशेषणसमासस्त्विह बहुलग्रहणान्नेत्युक्तम्। स्यादेतत्, इह षष्ठीसमासः प्राप्नोत्येव न। बाह्यसम्बन्ध्यपेक्षा हीयं षष्ठी। यत्तु वृत्तावुदाहृतं शुकस्य माराविकस्य, राज्ञः पाटलिपुत्रकस्येति। तत्र मारावीत्याहेति माराविकः। "तदाहेतिमाशब्दादिभ्य उपसंख्यानम्' (का.वा.) इति ठक्। शब्दनक्रियायाः प्रतिषेधको माराविकः। माराविदस्येति पाठे माराविशब्दं ददातीति स एवार्थः। एवं पाटलिपुत्रे भवः पाटलिपुत्रकः। इत्थं स्थिते यदीह समासोऽनिष्टः स्यात्तदेदं समानाधिकरण इत्यस्योदाहरणं सङ्गच्छेत । समास इष्ट इति तु वदता तेनैव नेदमुदाहर्तुं युक्तम्।

यत्तु तत्रैव समर्थितम् - षष्ठीसमासे सति पूर्वनिपातानियमः स्यात् । विशेषणसमासे तु विशेषणस्यैव पूर्वनिपातः सिध्यतीति। तत्रेदं वक्तव्यम्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह - पूरण, गुण, सुहितार्थ, सद, अव्यय, तव्य, समानाधिकरण इत्येतैः सह षष्ठी न समस्यते। अर्थशब्दः प्रत्येकमभिसम्बध्यते, तेन स्वरूपविधिर्न भवति। पूरणार्थे- छात्राणां पञ्चमः, छात्राणां दशमः। गुण- बलाकायाः शौक्ल्यम्, काकस्य कार्ण्यम्। सुहितार्थास्तृप्त्यर्थाःफलानां तृप्तः। सत् ब्राह्मणस्य कुर्वन्, ब्राह्मणस्य कुर्वाणः। अव्यय- ब्राह्मणस्य कृत्वा,ब्राह्मणस्य हत्वा। तव्य-ब्राह्मणस्य कर्त्तव्यम्। तव्यता सानुबन्धकेन समासो भवत्येव - ब्राह्मणकर्त्तव्यम्। समानाधिकरण-शुकस्य

माराविदस्य (1) राज्ञ: पाटलिपुत्रस्य, पाणिने: सूत्रकारस्य। किं च स्यात्? पूर्वनिपातस्यानियम: स्यात् । अनन्तरायां तु प्राप्तौ प्रतिषिद्धायां "विशेषण विशेष्येण बहुलम्" इति भवत्येव समास:। पूर्वनिपातश्च तदा नियोगतो विशेषणस्यैव।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृततया सूत्रस्यार्थं व्याख्याति प्रतिपदमर्थं विवेचयति च, तस्य काशिकाकारो साररूपेणार्थं व्याख्याति, येन सूत्रार्थावगमने सौकर्यं भवति। विशेष: - 1. माराविदस्य - मारावीति शब्दं ददातीति माराविद:। संज्ञैषा शुकविशेषस्य।

1. "फलैर्नानाविधैश्चित्रै: स्वादुशीतैश्च वारिभि:।

2. तृप्तास्तां भ्राजथुमन्तीं प्रपच्छु: कस्य पूरियम्।।' (भट्टि:)

"क्तेन च पूजायाम्'[134]

समासप्रकरणे इदं चतुरशीतितमं सूत्रं विद्यते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं व्याख्याति - "मतिबुद्धिपूजार्थेभ्यश्च''[135] इति सूत्रेण विहितो य: क्तस्तदन्तेन षष्ठी न समस्यते। स हि पूजायां वर्तमानाद्विहित इत्येतावन्मात्रेण पूजाग्रहणं तस्योपलक्षणं गृहस्येव काक:। तेन मतिबुद्ध्यर्थानां क्तस्याप्ययं निषेध:। राज्ञां मतो बुद्ध: पूजितो वा। "क्तस्य च वर्तमाने''[136] इति षष्ठी। कथन्तर्हि"कलहंसराममहित: कृतवान्'' इति भट्टि:? "मह पूजायाम्'[137] रामस्य महित इत्यर्थ: तथा 'राजपूजित:' इत्यादि। अत्राहु:। "क्तेन च पूजायाम्'[138] इत्यादिषु कारकषष्ठ्या एव समासो निषिध्यते । यदा तु कर्नादेरेव शेषत्वविवक्षया षष्ठी तदा भवत्येव समास:। स्वरे च विशेष: - कारकषष्ठ्या समासे हि कृदुत्तरपद-प्रकृतिस्वर:, शेषषष्ठ्या तु समासान्तोदात्तत्वमिति। अनुन्यासकारस्त्वाह- यदा वर्तमाने क्तस्तदा षष्ठी समासनिषेधश्च। यदा तु भूते क्तस्तदा कर्तरि तृतीया। यथा "पूजितो य: सुरासुरै: इति । तस्या: "कर्तृकरणे कृता बहुलम्'[139] इति समास:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं करोति - "मतिबुद्धिपूजार्थेभ्यश्च" इति वक्ष्यति, तस्येदं ग्रहणम्। पूजाग्रहणमुपलक्षणार्थम् । क्तो य: पूजायां विहितस्तेन षष्ठी न समस्यते । राज्ञां मत:। राज्ञां बुद्ध:। राज्ञां पूजित:। पूजायामिति किम्? छात्रस्य हसितं छात्रहसितम्। यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: प्रतिपदं स्पष्टीकृत्वा सूत्रस्यार्थं व्याख्याति, तस्य काशिकाकारस्तु मुख्यार्थमेव प्रतिपादयति येन सूत्रार्थावगमने सौकर्यं भवति।

"अधिकरणवाचिना च"[140]

समासप्रकरणे इदं पञ्चाशीतितमं सूत्रं विद्यते। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति - तेन षष्ठी न समस्यते। इदमेषामासितं गतं भुक्तं वा। "क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य:''[141] इति क्त:। "अधिकरणवाचिनश्च'[142]

इति कर्तरि षष्ठी। "अधिकरणे च'' इत्येव सिद्धे वाचिग्रहणं स्पष्टार्थम्। कथं तर्हि 'किंवृत्तं' 'यद्वृत्तम्' इति? अत्राहु:- नायमधिकरणे क्त:, किन्तु भावे। किमो वृत्तं यस्मिन्निति व्यधिकरणपदो बहुव्रीहि:। यद्वा, कर्तरि क्त:। किमो वृत्तं निष्पन्नमिति चविग्रह:।

काशिकाकारस्तु अस्य सूत्रस्यार्थं करोति - "क्तोऽधिकरणे चध्रौव्यगतिप्रत्यवसानार्थेभ्य:'' इति वक्ष्यति, तस्येदं ग्रहणम्। अधिकरणवाचिना क्तेन षष्ठी न समस्यते। इदमेषां यातम्। इदमेषां भुक्तम्। यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृततया अर्थं व्याख्याति, तस्य काशिकाकार: साररूपेणार्थं प्रतिपादयति, येन सूत्रार्थावगमने सौकर्यं भवति ।

"कर्मणि च[143]

समासप्रकरणे इदं षडशीतितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति - चकार इतिशब्दार्थ:। कर्मणीतिशब्दमुच्चार्य विहिता परिशोषिता वा या षष्ठी सा न समस्यते। चित्रङ्गवान्दोहोऽगोपेन।

काशिकाकारस्तु अस्य सूत्रस्यार्थं करोति - क्तेनेति निवृत्तम्। कर्मग्रहणं षष्ठीविशेषणम्। कर्मणि च या षष्ठी सा न समस्यते। "उभयप्राप्तौ कर्मणि" इति षष्ठ्या इदं ग्रहणम्। आश्चर्यो गवां दोहोऽगोपालकेन। रोचते ओदनस्य भोजनं देवदत्तेन। साधु खलु पयस: पानं देवदत्तेन। विचित्रा सूत्रस्य कृति: पाणिनिना।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति, तस्य काशिकाकार: प्रतिपदमर्थं कृत्वा विस्तृततया व्याख्याति, येन सूत्रार्थावगमेन सौकर्यभवति।

"तृजकाभ्यां कर्तरि [144]

समासप्रकरणे इदं सप्ताशीतितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति - कर्बर्थतजकाभ्यां षष्ट्या न समास:। कर्तरीत्यकस्यैव विशेषणं न तु तृचोऽपि, अव्यभिचारात्। अपां स्रष्टा। पुराम्भेत्ता। वज्रस्य भर्ता। यद्यपि भर्तृशब्दो याजकादिषु पठितस्तथापि रूढेर्बलीयस्त्वात्पतिपर्यायस्य तत्र ग्रहणम्। यौगिकस्य तु निषेध एव। ओदनस्य पाचक:। कर्तरिकिम्? इथूणां भक्षणमिक्षुभक्षिका। काशिकाकारस्तु अस्य सूत्रस्यार्थं करोति - कर्तृग्रहणं षष्ठीविशेषणम् । कर्तरि या षष्ठी सा तृचाऽकेन च सह न समस्यते। भवत: शायिका। भवत आसिका। भवतोऽग्रगामिका। तृच् कर्त्तर्येव विधीयते, तत्प्रयोगे कर्तरि षष्ठी नास्ति। तस्मात्तृग्रहणमुत्तरार्थम् । कर्तरि किम्? इक्षुभक्षिकां मे (1) धारयसि।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृततया सूत्रस्यार्थं व्याख्याति, तस्य काशिकाकार: प्रतिपदमर्थं कृत्वा सूत्रस्यार्थं विवेचयति, येन सूत्रार्थावगमने सौकर्यं भवति। विशेष: - 1. इक्षुभक्षिका मे इति - कर्मणि षष्ठ्या समास:, मे इति "धारेरुत्तमर्ण:" इति सम्प्रदाने चतुर्थी न्यासकारस्त्वत्र कर्तरि षष्ठीमाह । (काशिका 2-2-15)

"कर्तरि च[145]

समासप्रकरणे इदम् अष्टाशीतितमं सूत्रमस्ति । शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति- कर्तृषष्ट्या अकेन न समास:। भवत: शायिका। "पर्यायार्हर्ण''[146] इति ण्वुच्। पूर्वत्र द्वन्द्वेन निर्दिष्टोऽपि तृच् नेहानुवर्तते, तद्योगे कर्तुरभिहिततया कर्तृषष्ठ्या असम्भवात्। काशिकाकारस्तु अस्य सूत्रस्यार्थं करोति - कर्तरि च यौ तृजको ताभ्यां सह षष्ठी न समस्यते। सामर्थ्यादकस्य विशेषणार्थं कर्तृग्रहणम् इतरत्र व्यभिचाराभावात्। अपां स्रष्टा। पुरां भेत्ता। वज्रस्य भर्ता। ननु च भर्तृशब्दो ह्ययं याजकादिषु पठ्यते। सम्बन्धिशब्दस्य पतिपर्यायस्य तत्र ग्रहणम्। अक: खल्वपिओदनस्य भोजक:, सक्तूनां पायक:।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृततया सूत्रस्यार्थं व्याख्याति, तस्य काशिकाकार: सोदाहरणं प्रतिपदमर्थं कृत्वा सूत्रार्थं विवेचयति, येन सूत्रार्थावगमने सौकर्यं भवति।

"नित्यं क्रीडाजीविकयो:[147]

समासप्रकरणे इदम् एकोननवतितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यार्थं करोति - एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते। उद्दालकपुष्पभञ्जिका। क्रीडाविशेषस्येयं संज्ञा। जीविकायाम् - दन्तलेखक:। तत्र क्रीडायां विकल्पे प्राप्ते जीविकायां "कर्तरि च''[148]इति निषेधे प्राप्ते वचनम्।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह : - नेति निवृत्तम्, न तृजको। नित्यं समासो विधीयते। क्रीडायां जीविकायां च नित्यं षष्ठी समस्यते, तत्पुरुषश्च समासो भवति। तृच् क्रीडाजीविकयो स्तीत्यक एवोदाहियते । उद्दालकपुष्पभञ्जिका। वारणपुष्पप्रचायिका। जीविकायाम् - दन्तलेखक:, नखलेखक:। क्रीडाजीविकयोरिति किम्? ओदनस्य भोजक:।

शब्दकौस्तुभे भट्टोजिदीक्षित: विषयेऽस्मिन् अग्रे विवेचयन्नाह- जयादित्यस्तु "तृजकाभ्यां कर्तरि"[149] इति सूत्रे कर्तरीत्येतदनुवृत्ताया: षष्ठ्या विशेषणम् । तृ (1) जुत्तरार्थ इत्युक्त्वा "कर्तरि च''[150] इति सूत्रे कर्तृग्रहणं तृजकयोर्विशेषणतया व्याजहार। तत्रेदं वक्तव्यम्, प्रथमसूत्रे कर्तृग्रहणं तृजकयोरेव विशेषणं युक्तम्, तयो: श्रुतत्वात्, न तु षष्ठ्या: । एवञ्च तृजुत्तरार्थ इत्यपि न कल्प्यम्। अकस्यैव चोत्तरत्रानुवृत्तिर्न तु तृच: असम्भवात् । तथा च सूत्रद्वयस्य व्यत्यासेनार्थ उचित इति ।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकार: भट्टोजिदीक्षित: विस्तृततया सूत्रस्यार्थं व्याख्याति, तस्य काशिकाकार: सर्वं पक्षं विचार्य साररूपेण सूत्रस्यार्थं विवेचयति, येन सूत्रार्थावगमने सौकर्यं भवत्येव।

विशेष: -

1. 'तृच् प्रत्ययेन कर्तुरभिधाने तद्योगे कर्तृषष्ठ्या असम्भवात्' इत्यादिः।

द्वितीया श्रितातीत। श्रितादीनां गतिविशेषवाचित्वात् 'गत्यर्थाकर्मके 'ति कर्तरि क्तः। 'प्रत्ययग्रहणे तदन्तग्रहण'मित्याशयेनाह-द्वितीयान्तमिति।

श्रितादिप्रकृतिकैरिति। यद्यपि संबोधने सुबन्तत्वं संभवति तथाप्यन्यत्रापि समासस्येष्टत्वात् श्रितादयस्तद्घटितसमुदाये लाक्षणिका इह गृह्यन्त इति भावः। एवं 'खट्वा क्षेपे' 'गर्गादिभ्यो य'जित्यादावप्यूह्यम्। न हि खट्वेत्यस्य द्वितीयान्तत्वं, गर्गादीनां षष्ठ्यन्तत्वं वा संभवति। स्यादेतत्-द्वितीयान्तस्य श्रितप्रकृतिकसुबन्तेन समासे काष्टश्रितेयो न सिध्येत्। श्रितशब्दाथापि ततः सुपि कष्टं श्रिता कष्टश्रितेति समासे श्रिताशब्दस्यैव टाबन्तत्वात्, ततः 'स्त्रीभ्यो ढ'गिति ढकि काष्टौतेय इति स्यात्। 'गतिकारकोपपदाना'मिति सुबुत्पत्तेः प्राकृदन्तेन समासे तु श्रितान्तस्य यबन्तत्वादिष्टं सिध्यतीति चेत्। मैवम्। प्रधानस्त्रीप्रत्यये तदादिनियमाऽभावन काष्टश्रितेयस्य निर्बाधत्वात्। न च कदाचित् श्रिताशब्दादपि ढक्स्यादिति वाच्यम्। जहत्स्वार्थायां वृत्तौ श्रिताशब्द स्यानर्थकत्वेनाऽपत्ययोगाऽसंभवात्। अजहत्स्वार्थायामपि न दोषः, समुदायावयवसंनिधौ समुदायस्यैव कार्यप्रयोजन कत्वात्। अन्यथा सुन्दरदुहितुरपत्यं सौन्दरदौहित्र इत्यापत्तेरिति दिक्। कृष्णं श्रित इति। 'न लोके 'ति षष्ठी निषेधः। कृष्णश्रित इति। 'प्रथमानिर्दिष्ट मिति द्वितीयान्तस्य पूर्वनिपातः। यद्यपीह श्रितशब्दोऽपि प्रथमानिर्दिष्ट स्तथापि 'समासविधायके प्रथमानिर्दिष्टमुपसर्जन'मित्युक्तमिति नास्त्यतिप्रसङ्गः। नन्वेवमव्ययादीनामुपसर्जनसंज्ञार्थम व्ययं विभक्तीत्यादिना समासविधानस्यावश्यकत्वात् 'सुप्सुपा' इति समासस्याऽनित्यत्वे प्रागुक्तज्ञापकं न संभवत्येव तथा चाऽव्ययीभावतत्पुरुषादिसमासाऽभावपक्षे 'सुप्सुपे'ति समासप्रवृत्त्या 'अप विष्णोः' 'परि विष्णोः' 'कृष्णं श्रितः' 'राज्ञः पुरुष' इत्यादिविग्रहवाक्यानि न सिधेरनिति चेत्। अत्राहुः - पुनः समासविधानं नअवलमपसर्जनसंज्ञार्थं तस्याः प्रकारान्तरेणापि सिद्धेः। तथा हि- 'प्राकडारात्समासःइत्यनन्तरं 'प्रथमानिर्दिष्टमुपसर्जनम्', 'एकविभक्ति चापूर्वनिपाते' इति पठित्वा समासाधिकारे प्रथमानिर्दिष्टमिति व्याख्यायामुपसर्जनसंज्ञज्ञ सिध्यत्येव, 'विभक्त्यर्थादिषु विद्यमानमव्ययं सुबन्तेन चेत्समस्यते स समासोऽव्ययीभावः स्यात्, द्वितीयान्तं चेत्स समासस्तत्पुरुष' इत्येवं व्याख्यानादव्ययीभावतत्पुरुषादिसंज्ञापि सिध्यतीति पुनः समासविधानं व्यर्थं सज्ज्ञापयतीति। ननु 'अव्ययं विभक्ति-' इत्यादीनां समासविधायकत्वे सिद्धे भवदुक्तमेतत्स्यात्, तत्रैव मानं न पश्याम इति चेत्- अत्र केचित्-उक्तरीत्यैवोपसर्जनसंज्ञायां सिद्धायां 'प्रथमानिर्दिष्ट'मिति सूत्रे समासग्रहणं व्यर्थं सत्समासविधायके प्रथमानिर्दिष्टमित्यर्थलाभार्थं। तेनामीषां समासविधायकत्वं सिध्यतीति। अथवा 'सुप्सुपे'ति समासस्याऽनित्यत्वे आकरग्रन्थ एव प्रमाणम्, अन्यथा 'सिन्नित्यसमासयोः' इति वार्तिके 'नित्यग्रहणेन नार्थः', इदमपि सिद्धं भवति वाप्यामश्वो वाप्यश्व' इत्यादिप्रागुक्तभाष्यकैयटग्रन्थस्याऽसामञ्जस्यापत्तेरिति दिक्। ननु कृष्णश्रित इत्यस्य कृष्णकर्मकश्रयणकर्तेति ह्यर्थः, स च कृष्णः श्रितो येनेति कर्मणि तान्तेन बहुव्रीहिणापि सुलभ इति किमनेन समासारम्भेण ? मैवम्। बहुव्रीहौ श्रितकृष्ण इति निष्ठान्तस्यपूर्वनिपातप्रसङ्गात्। 'शेषाद्विभाषे 'ति समासान्तः कप्प्रसज्येतेति दिक् ! दुःखातीत इति। अतिपूर्वकादिणः कर्तरि क्तः। अवशिष्टन्यप्युदाहरणान्यूह्यानि। कूपपतितः। यद्यपि 'तनिपतिदरिद्रातिभ्यः' इति विकल्पितेट्कत्वात् 'यस्य विभाषेतीनिषेधेन भाव्यं, तथाप्यतएव निपातनादिडित्याहुः। वस्तुतस्तु चुरादावदन्तेषु पठितस्य 'पत गतौ वा' इत्यस्याश्रयणेन पतितः सिध्यति, 'यस्य विभाषे 'त्यत्रैकाचइत्यनुवृत्तेः सर्वसंमतत्वात् । ग्रामगतः। तुहिनात्यस्तः। अत्यासो- व्यतिक्रमः। सोऽपि गतिविशेष एवेति कर्तरि क्तः। आदिकर्मणि क्तो वाऽत्राभ्युपेयः। सुखप्राप्तः । दुःखापन्न । गम्यादीनामिति। गम्यादयश्च प्रयोगतो ज्ञेयाः। ग्रामगमीति। 'गमेरिनिः' इत्यौणादिक इनिः। स च 'भविष्यति गम्यादयः' इति भविष्यत्काले। 'अकेनो 'रिति षष्ठीनिषेधात्कर्मणि द्वितीया। अयोग्यत्वादिति। 'स्वय'-मित्यस्यात्मनेत्यर्थकस्य कर्बर्थतया द्वितीयान्तत्वानुपपत्तिरिति भावः । स्वायंकृतिरिति। असति समासे कार्तिरिति स्यादिति भावः। खट्वारूढ इति। जाल्मोऽसमीक्ष्यकारी स्यात्' इत्यमरः। वेदं व्रतानि च समाप्य समावृत्तेन हि खट्वारोढव्या। ब्रह्मचर्य एव भूमिशयनार्होऽपि यः खट्वामारोहति स जाल्मः। रूढश्चायम्। तेन खट्वामारोहतु मा वा, निषिद्धानुष्ठानपरः सर्वोऽपि खट्वारूढ इत्युच्यते। अत एवाह-नित्येति। सामि। सामीत्येतदव्ययमर्ध पर्यायः। कालाः। बहुवचननिर्देशः स्वरूपनिरासार्थः। 'कालवाचिनो द्वितीयान्ताः क्तान्तेन सह वा समस्यन्त' इति सूत्रार्थः। ननु 'काला अत्यन्तसंयोगे' इत्येवास्तु क्तेनेतिनिवृत्तम्, नार्थो योगविभागेनेत्यत आह-अनत्यन्तेति।

मासप्रमित इति। 'माङ्भाने'। आदिकर्मणि क्तः कर्तरि। इह प्रतिपच्चन्द्रेण नास्त्यत्यन्तसंयोगः। मुहूर्त मिति। मुहूर्तव्यापीत्यर्थः। 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया। तृतीया तत्कृत। लुप्तेति। सौत्रत्वादिति भावः। तच्छब्देन तृतीयान्तपरामर्शिना तदर्थो लक्ष्यते । तदर्थकृतत्वं च गुणवाचकस्यार्थद्वारा विशेषणं- तृतीयान्तमिति भावः। नन्वर्थेन समासाऽसंभवात्तद्वाची शब्दो ग्रहीष्यते किमत्र वचनग्रहणेन ? अत्राहुः - गुणमुक्तवान्गुणवचन 'कृत्यल्युटो बहुल 'मिति भूते कर्तरि ल्युट्। गुणमुक्त्वा योद्रव्यमुक्तवान्स गुणवचनस्तेन घृतेन पाटवमिति गुणमात्रनिष्ठेन शब्देन समासो न भवति। गुणश्चात्र 'सत्त्वे निविशतेऽपैति' इत्यादिलक्षणलक्षितो गृह्यते न तु प्रवृत्तिनिमित्तं घटत्वादि, तस्य तत्त्वाऽसंभवादिति। शङ्कलया खण्ड इति। करणेऽत्र तृतीया। 'खडि भेदने' इत्यस्माद्भावे घञि व्युत्पादितः खण्डशब्दः क्रियारूपापन्ने गुणे वर्तित्वा पश्चान्मत्वर्थलक्षणया तद्वति द्रव्ये वर्तत इति गुणवचनो भवति। धान्येनेति। करणे तृतीया। अर्थ्यते इत्यर्थः- प्रयोजनम्। कर्मणि घञ्। अर्थनमर्थः-अभिलाषो वा। भावे घञ्। अर्थशब्दस्य रूढत्वे तु धान्येनेति हेतौ तृतीया। 'कर्तृकरणे कृता-' इत्यनेन गतार्थत्वशङ्कवाऽत्र नेति रूढत्वाभ्युपगमपक्ष एव श्रेयान्।

तत्कृतेति किमिति। 'कर्तृकरणे कृता-' इति सिद्धमिति प्रश्नः। इतरो 'गुणवचनेन चेत्तत्कृतेनैवे'ति नियमार्थमिदमित्याशयेन प्रत्युदाहरति-अक्ष्णेति। न ह्यक्ष्णा काणत्वं कृतं किंतु कर्मादिनैवेति भावः। तृतीया त्विह 'येनाङ्गविकारः' इत्यनेन। काण इति। 'कण निमीलने' इत्यस्माद्धञ्। गुणवचनत्वं तुक्तरीत्या खण्डशब्दस्येवास्यापि बोध्यम्। गुणवचनेनेति किम् ? गोभिर्वपावान्। गोसंबन्धिदध्यादिभोजनेन देवदत्तस्य वपावत्त्वमित्यस्ति तत्कृतत्वं, न त्वसौ गुणवचनः। पूर्वसदृश। इह समसदृशाभ्यां योगे 'तुल्यार्थैः' इति तृतीया। अन्यैर्योगे त्वतएव वचनात्, 'हेतौ' इति वा तृतीया। इह सदृशग्रहणं व्यर्थं, षष्ठीसमासेन गतार्थत्वात्। न च 'तत्पुरुषे तुल्यार्थतृतीया-' इति पूर्वपदप्रकृतिस्वरार्थमिदमिति वाच्यम्। 'सदृशप्रतिरूपयोः सादृश्ये' इति सूत्रेण तत्सिद्धेरिति मनोरमाया स्थितम् । विद्यया सदृशो विद्यासदृश इत्यादौ हेतुत्वप्रकारकबोधार्थं तृतीयासमासोऽप्यावश्यक इति त्वन्ये।

पूर्वसूत्रेणैव तत्कृतत्वात्तृतीयासमासोऽपि सिद्यतीत्यपरे। ऊनार्थेति। पूर्वसूत्रेऽर्थशब्देन समासस्योक्तत्वादिहार्थग्रहणमभिधेयपरम्। तच्चोनशब्देनैव संबध्यते, न तु पूर्वादिभिः, समसदृशयोः पृथग्ग्रहणादिति भावः। मिश्रं चेति। 'पणबन्धेनैकार्थ्य संधिस्तत्राऽप्रयुज्यमानो मिश्रशब्द उपसर्गरहितोऽन्तोदात्तः' इति सूत्रार्थः। अवरस्येति। अत्र व्याचक्षते-ऊनार्थेत्येव सिद्धत्वादिदं सुत्यजमेव। न चावरशब्दस्योनार्थकत्वमप्रसिद्धमिति वाच्यम्। 'सप्तदशावराः सत्रमासीरन्' इति श्रुतौ 'अव्यक्तानुकरणाद् द्यजवरार्धात्' इति सूत्रे च तत्प्रसिद्धेरिति । कर्तृकरणे। समाहारद्वन्द्वात्सप्तमीत्याशयेनाहकर्तरि करणे चेति। अत्र केचित्-कर्तृकरणे इति प्रथमाद्विवचनं तृतीयया विशेष्यते, विशेषणेन च तदन्तविधिस्तेन तृतीयान्ते कर्तृकरणे कृदन्तेन समस्येते इति व्याख्यान्तरमित्याहुः। सर्वोपाधीति। कर्तरि करणे च या तृतीया तदन्तमपि बहुलग्रहणात् कृचिन्न समस्यते। क्वचित्तु विभक्त्यन्तरमपि समस्यते, बहुलग्रहणादेवेत्यर्थः। समासाऽभावं प्रदर्शयति-दात्रेण लूनवानित्यादाविति। आदिशब्देन दात्रेण छिनवान्, हस्तेन कुर्वन्नित्यादि ग्राह्यम्। विभक्त्यन्तरमपि समस्यत इत्यस्योदाहरणं तु-पादहारकः गलेचोपकः। ह्रियत इति हारकः। बाहुलकात्कर्मणि ण्वुल्। पादाभ्यामित्यपादानपञ्चम्यन्तस्य समासः। 'चुप मन्दायां गतौ'। हेतुमण्णिजन्तात्कर्मणि ण्वुल्। 'अमूर्धमस्तका 'दित्यलुक्। कर्तृत्व]करणत्वयोः क्रियानिरूपितत्वेन क्रियासमर्पककृदन्तेनैव भवेत्समासः, 'सुपा' इत्यधिकारात्तिङन्तेन तु नातिप्रसङ्ग इत्याशयेन पृच्छति-कृता किमिति। इतरस्तु तिङन्तप्रकृतिकतद्धितान्तप्रकृतिकसुबन्तेनाऽसमासस्तत्फलमित्याशयेन प्रत्युदाहरतिकाष्ठैरिति। कृत्यैरधिकार्थ। पूर्वसूत्रस्यैव प्रपञ्चोऽयं न तु नियमार्थमित्याहुः। वातच्छेद्यमिति। पूर्ववत्कृत्यः। कोमलत्वाद्वातेनापि छेत्तुं शक्यत इति स्तुतिः, वातेनापि छेत्तुं शक्यते निर्बलत्वादिति निन्दा वा। काकपेयेति। 'शकि लिङ् चे 'ति शक्यार्थे कृत्यः। पूर्णतोयत्वात्तटस्थैः काकैरपि पातुं शक्येति स्तुतिः, अल्पतोयत्वेन निन्दा वा। अन्नेन। 'भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री' इत्यमरः। व्याख्यानान्नेह स्वरूपग्रहणं, तदाह-संस्कारकेत्यादि। भक्ष्येण। खरं विशदमभ्यवहार्यं भक्ष्यम्। खरं =कठिनं विशंद-विविक्तावयवं खाद्यं भक्ष्यमित्यर्थः। यत्प्रत्यययान्तस्य एरजन्तस्य च भक्षयतेस्तत्रैव प्रयोगात्। 'अब्भक्ष' इत्यादिप्रयोगस्तु भाक्तः। गुडधाना इति। ननु धानानां प्रत्येकं विविक्तावयवत्वाऽभावात्कथमेतदुदाहरणं सङ्गच्छत इति चेत्। मैवम्। भृष्टयवसमुदायस्य धानात्वात्समुदायं प्रति समुदायिनामवयवत्वाच्च तदुपपत्तेः। चतुर्थी तदथार्थ। तच्छब्देन प्रकृता चतुर्थी परामृश्यते, प्रत्ययग्रहणात्तदन्तग्रहणम्, चतुर्थ्यन्तेन सामर्थ्यात्तदर्थो लक्ष्यते इत्याशयेनाह-चतुर्थ्यन्तार्थाय यदिति। चतुर्थ्यन्तवाच्याय यूपाय यद्दार्वादि, तद्वाचिना चतुर्थ्यन्तं समस्यत इत्यर्थः। बलिरक्षितग्रहणादिति। हितसुखग्रहणं तु न ज्ञापकं, तद्योगे चतुर्थी चाशिषीत्यतादर्थेऽपि चतुः संभवादिति भावः। ननु 'चतुर्थी चाशिषी

'ति विहिता या चतुर्थी तदन्तस्य समासो न भवति, समासादाशिषोऽनवगमादिति केचिदाहुरिति कैयटेनोक्तम्। ततश्च तत्पक्षे हितसुखग्रहणमपि बलिरक्षितग्रहणवज्ज्ञापमेवेति चेत्, नव्याः- 'ब्राह्मणाय हितं ब्राह्मणहितम्। गोहितम्। गोसुखमित्यतादर्थ्यचतुर्थ्यन्तेनापि समासः स्वीक्रियते। सा चाऽतादर्थ्यचतुर्थी 'हितयोगे चेति वार्तिका चतुर्थी तदर्थे 'त्यादिना हितसुखशब्दाभ्यांसमासविधानाज्ज्ञापकाद्वा सम्भवतीति हितसुखग्रहणं न ज्ञापकमिति सम्यगेवेत्याहुः।यूपायेति। तादर्थ्य चतुर्थी । एवमग्रेऽपि यथासंभवमूह्यम्।

अश्वघासादय इति। एतच्च भाष्यकृतोक्तम् । नन्वेवं 'रन्धनाय स्थाली'त्यत्रापि षष्ठीसमासः स्यादेवेति प्रकृतिविकृतिभाव एवेति नियमो निष्फल एव। न च स्वरे विशेषः, 'चतुर्थी तदर्थे 'इति पूर्वपदकृतिस्वरस्यापि प्रकृतिविकृत एवेष्यमाणत्वात्। अत्राहुः- 'संबन्धत्वतादर्थ्यकृत-वैलक्षण्येनोक्तनियमसाफल्यान्न दोषः। अत्र च मानमेतदेव भाष्यम्। 'न माषाणामश्नीयात्', 'दाशरथाय मैथिली'त्यादिप्रयोगा अपीत्थमेव विवक्षाभेदेन निर्वाह्याः। एवञ्च 'पूर्वसदृशे' सूत्रे सदृशग्रहणं व्यर्थमिति कैयटहरदत्तादीनामुक्तिः प्रामादिकीत्यवधेयम्। शाब्दबोधकृतवैलक्षण्यस्य तत्रापि सत्त्वादिति। अर्थेन नित्येति। अन्यथा विभाषाधिकारात्पक्षे 'द्विजायार्थ 'इति प्रयोगः स्यादिति भावः। विशेष्यलिङ्गता चेति। वचनाऽभावे त्वर्थशब्दस्य नित्यपुंस्त्वात् 'परवल्लिङ्ग मिति सर्वत्र पुल्लिङ्गप्रयोग एव स्यादिति भावः। पञ्चमी भयेन। भयेनेति स्वरूपग्रहणं, नार्थस्य, प्रमाणाऽभावात्, 'भयभीते 'ति वार्तिकारम्भाच्च । तेन 'वृकात्रास' इत्यादौ समासो न। कथं तर्हि 'भोगोपरतो' 'ग्रामनिर्गतः', इत्यादिप्रयोगाः ? अत्राहुःबहुलग्रहणात्क्वचिद्विभत्तयन्तरमपि कृता समस्यतइति प्रागेवोक्तत्वात्, 'सुप्सुपे'त्यनेन वा तदुपपत्तिरिति। अपेतापोढ। 'पञ्चमी'ति वर्तते, प्रत्ययग्रहणात्तदन्तग्रहणम् । 'अल्पश'इत्यत्र 'बह्वल्पार्थाच्छस्कारका 'दिति शस्। यद्यपि 'बह्वल्पार्थान्मङ्गलाऽमङ्गलवचन मिति वक्ष्यति, तथाप्यतएव निपातनाच्छसिति बोध्यम्। कारकत्वं तसमसनक्रियां प्रति पञ्चम्यन्तस्य कर्मत्वात्तदभिधायित्वाच्चाल्पशब्दस्य। तदेतदाह-अल्पंपञ्चम्यन्तमिति। स्तोकान्मुक्त इत्यादि। करणे च स्तोकाल्पे 'ति पञ्चमी। 'दूरादागत' इत्यादौ तु 'दूरान्तिकार्थेभ्यः' इत्यनेन। राजपुरुष इति। राजन् अस्-पुरुष सु इत्यलौकिकविग्रहे समासे कृते सुपो लुक्यन्तर्वतिनी विभक्तिमाश्रित्य पदत्वान्न लोपः। याजकादिभिश्च। याजक। पूजक। परिचारक। परिवेषक। स्नातक। अध्यापक। उत्पादक। होतृ। पोतृ। भर्तृ। रथगणक। पत्तिगणक। वृत्। गुणात्तरेणेति। एतच्च वार्तिकं 'सर्वं गुणकात्स्न्ये' इत्यत्र पठितम्। कृद्योगा षष्ठीति। कर्तृकर्मणोः कृती'ति कृत्संनियोगेन कृतेत्यर्थः। यदा तु 'प्रतिपदविधाने'त्यादिनिषेधवचनमारभ्यते, तदेदं तद्बाधनायारब्धव्यम्। तस्यैवाऽनारभ्यत्वमनुपदं वक्ष्यामः। इध्मव्रश्चन इति। वृश्च्यते छिद्यतेऽनेनेति व्रश्चनः=कुठारादिः। करणे ल्युट्। इध्मानामिति कर्मषष्ठ्यन्तस्यानेन समासः। नृणामिति । यतश्च निर्धारण मिति षष्ठी। द्विजशब्देनात्र समासप्रसङ्गस्तदपेक्षा हि षष्ठी। श्रेषठत्वं द्विजेतरमनुष्येभ्यः, तेषां सामान्यशब्देनोपस्थिततया तान्विहायानुपस्थितकल्पनाया अन्याय्यत्वात्। अथ कथं पुरुषोत्तम इति ? यस्मान्निर्धार्यते, यश्चैकदेशो निर्धार्यते, यश्च निर्धारणहेतुः- एतत्रितयसंनिधाने सत्येवायं निषेध इति 'द्विवचनविभज्योपे 'ति सूत्रे कैयटः। अन्ये तु-पुरुषेषूत्तम इति निर्धारणसप्तम्याः 'संज्ञाया'मिति समासः। न चैवं 'न निर्धारणे' इति व्यर्थम्। स्वरेभेदात् । सप्तमीसमासे हि 'तत्पुरुषे तुल्यार्थे 'त्यादिना पूर्वपदप्रकृतिस्वरः, षष्ठीसमासे तु 'समासस्ये 'त्यन्तोदात्तत्वं स्यात्तच्चाऽनिष्टमित्याहुः। तन्मन्दम्। 'संज्ञाया'मिति समासस्य नित्यत्वेन स्वपदविग्रहाऽसङ्गतिप्रसङ्गात्। तस्मात्कैयटोक्तसमाधानमेव समीचीनमिति नव्याः। प्रतिपदविधानेति। पदं पदं प्रति विहिता प्रतिपदविधाना। 'षष्ठी शेषे' इतिविहायाऽन्येन 'ज्ञोऽविदर्थस्ये'त्यादिना विहिता सर्वैव षष्ठीत्यर्थः। धातुकारकविशेषं गृहीत्वैव 'ज्ञोऽविदर्थस्य' इत्यादिना षष्ठी विधीयत इति भवति तस्याः प्रतिपदविधानत्वम्। नन्दननैवे गतार्थत्वा'न्न निर्धारणे' इति व्यर्थमिति चेत् । अत्राहुः'यतश्च निर्धारण 'मिति सूत्रं न षष्ठी विधत्ते, किं तु सप्तमीमेव। षष्ठी तु तया मा बाधीति प्रतिप्रसूयत इत्यन्यदेतत् । एवं 'स्वामीश्वराधिपती'त्यादिष्वपि। तेन 'गृहस्वामी' 'सर्वेश्वरः' 'निषादाधिपति'रित्यादि सिद्धमिति। वस्तुतस्तु 'ज्ञोऽविदर्थस्ये'त्यादिचतुर्दशसूत्रीमध्ये 'दिवस्तदर्थस्ये'त्यादिषट्सूत्रीं विहायावशिष्टायामष्टसूत्र्यां 'शेषे' इति वर्तते, तथा च 'न माषाणामश्नीया 'दित्यादाविव 'षष्ठी शेषे' इत्येव सिद्धे नियमार्थं प्रकरणम्- इह षष्ठ्येव न तु तल्लुगिति। तथा च लुकः प्रयोजकीभूतः समास एव नेति फलितोऽर्थः। ततश्च 'प्रतिपदविधाने 'ति वचनं न कर्तव्यम्। एवं स्थिते 'कृद्योगा षष्ठी ति वचनमपि मास्तु। 'कर्तृकर्मणाः कृती'त्यत्र हि 'शेषे' इति निवृत्तम्। तथा चाऽप्राप्तषष्ठीविधानार्थमेव तदिति समासनिवृत्तिप्रसङ्गाऽभावात् षष्ठी' इत्यनेनैव समाससिद्धेः। सर्पिषो ज्ञानमिति। वस्तुतः करणस्य संबन्धमात्रविवक्षया 'ज्ञोऽविदर्थस्य' इति षष्ठी। सर्पिःसंबन्धि

प्रवर्तनमित्यर्थः। पूरणगुण। अर्थशब्दस्य त्रिषु संबन्धादाह-पूरणाद्यर्थैरिति। अत्र प्राचोक्तम् 'एतदर्थैः षष्ठी न समस्यते' इति। तन्न्यूनम्। तथा हि सति सुहितान्तानामेव ग्रहणं स्यात्, तावतामेवाऽर्थशब्देन समस्तत्वादिति ध्वनयन्नाह-सदादिभिश्चेति। षष्ठ इति। षण्णां पूरणः षष्ठः। तस्य पूरणे डट्', 'षट्कतिकतिपयचतुरां थुक्'। कथं तर्हि 'तान्युञ्छषष्ठाङ्कितसैकतानी 'ति ?प्रमाद एवायमित्येके। उञ्छेषु षष्ठः, उञ्छात्मकः षष्ठ इति वा व्याख्येयमितिमनोरमायां स्थितम्।

गुणे इति। 'सत्त्वे निविशतेऽपैती'त्यादिलक्षणलक्षितो गुणोऽत्र गृह्यते, न त्वदेङ्लक्षणः, अर्थग्रहणात्। नापि सङ्ख्या, 'क्रोशशतयोजनशतयो 'रिति वार्तिके निर्देशात्। काकस्य कार्ष्ण्यें। ब्राह्मणस्य शुक्ला इति। व्याप्तिन्यायात्केवलगुणवाचली गुणोपसर्जनद्रव्यवाची च गुणशब्देन गृह्यत इति भावः। ननु 'ब्राह्मणस्य शुक्ला' इत्यत्र समास एव नास्ति, ब्राह्मणशब्दस्य दन्तैरेवान्वयाद्ब्रह्मणस्य ये दन्तास्ते शुक्ला इत्यर्थादत आह-यदेति। शुक्लशब्द एवे विशेष्यसमर्पक इति भावः। 'चन्दनगन्धः' 'घटरूप' मित्यादावनेन निषेधे प्राप्ते 'तत्स्थैश्च गुणैः समासो वक्तव्यः इति वार्तिकेन समासः प्रतिप्रसूयते। गन्धत्वेन प्रतीयमानो गन्धो न कदापि गुणिसमानाधिकरणः, किंतु स्वप्रधानः। मेव हि तात्स्थ्यं नाम। ननु 'पिनष्टि गन्धा'निति प्रयोगदर्शनाच्छुकक्लशब्दादितुल्य एव गन्धशब्दो न तत्स्थगुणवचन इति चेत्। न। 'पिनष्टी 'ति प्रयोगे हि 'गन्धा'निति न गुणशब्दः, मालतीकुसुमादिषु गन्धशब्दप्रयोगदर्शनात्। चन्दनत्वादिजातिनिमित्तकोऽन्य एव सः। तस्माच्चन्दनगन्ध इत्यादौ तत्स्थत्वं सुस्थमेव। एवं 'घटरूप'मित्यादावपि ।

नन्वेवमपि 'बलाकायाः शौक्लयं', 'केशस्य नैल्य'मित्यादावतिप्रसङ्ग इति चेत् । अत्राहुः- 'गुणिवचनादुत्पन्नस्य गुणस्यैवाभिधानात्तद्वाचकपदानां गुणिसामानाधिकरण्यसत्त्वान्न दोषः। तथा च प्राधान्येनाऽप्राधान्येन वा द्रव्याऽप्रतिपादकत्वे सति गुणप्रतिपादकत्वं तत्स्थगुणवाचित्वमित्यर्थ इति। फलानामिति। करणस्यशेषत्वविवक्षायां षष्ठी। स्वरे विशेष इति। 'तत्पुरुषे तुल्यार्थे 'ति पूर्वपदप्रकृतिस्वरं बाधित्वा 'थाथा 'दिसूत्रेणान्तोदात्तत्वे प्राप्ते तदपवादेन 'तृतीया कर्मणी'त्यनेन पूर्वपदप्रकृतिस्वरे सत्याधुदात्त इष्टः, षष्ठीमासे त्वन्तोदात्तत्वं स्यात्तच्च नेष्यत इति भावः। तृपिश्च सकर्मकोऽप्यस्ति' 'पितृनतासत्सममंस्त बन्धू'निति भट्टिप्रयोगात् । तेनाऽस्मात्कर्मणि क्तो नास्तीति न शङ्कनीयम्। द्विजस्य कुर्वन्कुर्वाण इति। नेयं घटाद्यपेक्षया षष्ठी, 'द्विजस्य घटं कुर्वन्निति। तथा हि सत्य सामर्थ्यादिव समासाऽप्रसक्तौ निषेधोऽयं व्यर्थः स्यादतो व्याचष्टे-किङ्कर इत्यर्थ इति। ब्राह्मणस्य कृत्वेति। तादर्थ्यरूपसंबन्धस्य सामान्यरूपेण विवक्षयां षष्ठी। ब्राह्मणसंबन्धिनी या क्रिया तदनन्तरमित्यर्थः। कृदव्ययमेवेति। 'अनेकमन्यपदार्थे 'इति सूत्रे 'सर्वपश्चा'दिति भाष्यप्रयोगादिति भावः। इत्यादीति। तथा च भट्टिः प्रायुक्त- 'यत्कृतेऽरीन्निगृह्णीमः'। 'आदेयाः किङ्कृते भोगाः कुम्भकर्ण! त्वया विना' इति । रक्षित इति। कैयटहरदत्तौ त्वव्ययप्रतिषेधे 'वृक्षस्योपरी'त्युदाहरन्तावकृदव्ययेनापि निषेधं मन्येते, तौ च प्रागुक्तभाष्यप्रयोगविरोधादुपेक्ष्याविति भावः। तव्यता तु भवत्येवेति। सूत्रे निरनुबन्धग्रहणादिति भावः। स्वकर्तव्यमिति। कर्तृषष्ठ्या समासः। स्वरे भेद इति। कृदुत्तरपदप्रकृतिस्वरेण तित्स्वरस्यावस्थानादन्तस्वरित इष्टः। तव्येन तु समासे मध्योदात्तत्वं स्यात्तच्च नेष्यत इति भावः। सोऽप्यनेनेति। षष्ठीसमासेन 'पोटायुवती'ति समासो वारितः, सोऽपि षष्ठीसमासः 'पूरणगुणे'त्यनेन वार्य इत्यर्थः। क्तेन च पूजायाम्। सूत्रे उपलक्षणं पूजाग्रहणं, व्याख्यानादित्याह-मतिबुद्धीति। राज्ञामिति 'क्तस्य च वर्तमाने' इति कर्तरि षष्ठी। भूत इति। न च तक्रकौण्डिन्यन्यायेनमत्यादिभ्यः क्तस्य वर्तमानकाले भूतकालतां बाधत इति वाच्यं, 'तेनैकदि'गित्यतः'तेन' इत्यधिकारे 'उपज्ञाते' इति निर्देशेन भूतकालस्याऽबाधज्ञापनात् । 'उपज्ञाते' इत्यत्र हि भूते क्तो, न तु वर्तमाने। अन्यथा 'क्तस्य च वर्तमाने' इति षष्ठीविधानादुपज्ञातशब्दस्य तेनेति तृतीयायोगो न स्यात्। न चैवमपि ज्ञानार्थेष्वेव ज्ञापकत्वमस्त्विति वाच्यं, 'पूजितो यः सुरासुरैः' इति प्रयोगानुरोधेन सामान्यविषयज्ञापकत्वस्यैव न्याय्यत्वात्। अन्ये तु कारकषष्ठ्या एव समासनिषेधोऽयम्, शेषषष्ठ्या तु समासः स्यादेवेत्याहुः। एतेन 'कलहं स राममहितः कृतवा'निति भट्टिप्रयोगो व्याख्यातः। 'राममहितः स कलहं कृतवा'नित्यन्वयः। अधिकरणवाचिना च। 'वाचि'ग्रहणं चिन्त्यप्रयोजनमिति हरदत्तादयः। इदमेषामिति। 'क्तोऽधिकरणे चे 'ति क्तः। 'अधिकरणवाचिनश्चे 'ति कर्तरि षष्ठी। 'अधिकरणे चे'त्येव सिद्धे सूत्रद्वयेऽपि 'वाचि' ग्रहणं स्पष्टार्थमित्याहुः। ननु 'किंवृत्तं' 'यद्वृत्त'मित्यत्र न कर्मणि क्तः, वृतेरकर्मकत्वात्। तथा चाधिकरणक्तान्तेन कथमिह समास इति चेत् । मैवम्। नायमधिकरणे क्तः, किं तु 'गत्यर्थाकर्मके'ति कर्तरि। किमा वृत्त निष्पन्नमित्यर्थः।

कर्मणि च। तेनेति नानुवर्तते, 'क्तेन च पूजाया 'मिति निषेधवैयर्थ्यप्रसङ्गात । षष्ठी त्वनुवर्तते, किंतु सापि या काचित्कर्मणि षष्ठी न गृह्यते। 'अपा स्रष्टे'तयादावनेनैव सिद्धौ 'तृजकाभ्यां कर्तरी 'ति निषेधवैयर्थ्यापत्तेः। किं च 'इध्मव्रश्चनः' इत्यादौ समाससिद्धये वचनं कर्तव्यं स्यात्। न च 'कृद्योगलक्षणा षष्ठी समस्यते 'इति वार्तिकमस्त्येवेति वाच्यं, तस्य सिद्धान्ते प्रत्याख्यानात्। ततश्चनिपातानामनेकार्थत्वादितीत्यर्थे च शब्दोऽयं, तदाह- कर्मणीति या षष्ठीति। सप्तम्येकवचनान्तं पदमुच्चार्यं या षष्ठी विहिता परिशेषिता वेत्यर्थः। नियमसूत्राणां विधिरूपेण निषेधरूपेण वेति द्वेधा प्रवृत्तेः स्वीकृतत्वात्। गवां दोह इति। 'अगोपेने'त्युपन्यासस्त्विह उभयप्राप्तिप्रदर्शनार्थः। अथ कथं 'शब्दानुशासन'मिति ? अत्र व्याचख्युः-शब्दानामितीयं षष्ठी 'कर्तृकर्मणो 'रिति विहिता, न तु 'उभयप्राप्तौ' इत्यनेन, आचार्यस्य कर्तुः वस्तुतः सत्त्वेऽपीहानुपादानात्। 'कृत्वोर्थप्रयोगे-' इत्यतः 'प्रयोगे' इत्यनुवर्तनात्कर्तृकर्मणोरुपादान एवायं नियम इति स्वीकारात्। 'आश्चर्यो गवां दोहोऽगोपेने 'त्यत्र हि आश्चर्यं प्रतिपाद्यं, तच्च यद्यशिक्षितो दोग्धा दुर्दोहा गावश्च दोग्धव्यास्तदैव निर्वहति न त्वन्यथा। अतः कर्तृकर्मणोर्विशिष्योपादानादस्तूभ्यप्राप्तिः, इह तु 'शब्दानामिदमनुशासनं, न त्वर्थाना 'मित्यर्थनिवृत्तिपरं वाक्यं, न तु कर्तृविशेषनिवृत्तिपरमतो नास्त्युभयप्राप्तिः। अस्तु वा यथाकथंचिदुभयप्राप्तिः, तथापि न क्षतिः, 'उभयप्राप्तौ' इति सूत्रे 'अविशेषेण विभाषे 'ति पक्षस्यापि विद्यमानतया नियमाऽप्रवृतिपक्षे 'आचार्यस्य शब्दानुशासनमिति प्रयोगसम्भवात्। यदि वा शेषलक्षणा षष्ठीति व्याख्यायते, तदा सु समासनिषेधशङ्कवात्र नास्तीति। तृजकाभ्याम्। इह 'कर्तृषष्ठ्या तृजकाभ्या मिति वृत्तिकारव्याख्यानमयुक्तमिति ध्वनयन्नाहकर्बर्थतृजकाभ्यामिति। 'कर्तृ 'ग्रहणं तृजकयोरेव विशेषणमिति युक्तं, तयोः श्रुतत्वात्, न तु षष्ठ्या इति भावः। यद्यपि 'कर्तरी 'ति तृचो न विशेषणमव्यभिचारात्, तथाप्यकस्य विशेषणत्वेन तदावश्यकमित्याह- इक्षुभक्षिकेति। 'पर्यायाहणे 'ति भावे ण्वुच् । कर्मणि षष्ठ्या समासः। ननु 'वज्रस्य भर्ते' त्युदाहरणमयुक्तम्, भर्तृशब्दस्य याजकादित्वेन
समासाऽवश्यम्भावादित्याशङ्कयाह-पत्यर्थभर्तृशब्दस्येति। यद्यपि कादिष्वर्थविशेषविशिष्टतया भर्तृशब्दो न पठितः, तथापि रूढेर्बलीयस्त्वात्पतिपर्यायस्यैव तत्र ग्रहणम्, न तु यौगिकस्येति भावः। शेषषष्ठ्येति। न्यासकारस्तु तृन्नन्तमेतत्, 'न लोके 'ति निषेधस्त्वनित्यः, 'त्रकाभ्या'मिति वक्तव्ये तृचः सानुबन्धग्रहणाज्ज्ञापकादित्याह । केचित्तु-'जनिकर्तुः', 'तत्प्रयोजको हेतुश्चे'ति निर्देशादनित्योऽयं समासनिषेध इत्याहुः । तन्मन्दम्। शेषषष्ठीसमासेनोक्तनिर्देशोपपत्तेः। नेह तृजिति। न चोत्तरार्थत्वं शङ्कयम्। तृच्क्रीडाजीविकयोर्नास्तीति जयादित्येनोक्तत्वादिति भावः। वामनस्तु- 'अके जीविकार्थे' इत्यत्र 'अके' इति किम् ? 'रमणीयकत'ति प्रत्युदाहरञ्जीविकायां तृचमिच्छति। नित्यंकी। भावे ण्वुलिति। भञ्जनं भञ्जिका। 'पुष्पाणा'मिति कर्मणि षष्ठी। 'भावे' इत्युपलक्षणम्, अधिकरणे ण्वुल्यपि बाधकाभावादिति मत्वा 'संज्ञाया'मिति सूत्रे कृदन्ते मनोरमायामुक्तम्-'उद्दालकः श्लेष्मातकस्तस्य पुष्पाणि भज्यन्ते यस्यां क्रीडायां सा उद्दालकपुष्पभञ्जिके 'ति। पूर्वापर। 'एकदेश'शब्दोऽवयवे रूढः। अतएव तस्य कर्मधारयत्वेऽपि ततो मत्वर्थीयः। 'कृष्णसर्पवा नित्यत्रेव 'न कर्मधारयान्मत्वर्थीयः' इति निषेधस्य रूढेष्वप्रवृत्तेः। यद्यपीह 'एकगोपूर्वादि'ति ठञ् प्राप्तः, तथाप्यत एव निर्देशादिनिः। तदेतदाह-अवयविनेति। नन्विदं सूत्रं व्यर्थं, 'पूर्वकाय' इत्यादिप्रयोगाणां कर्मधारयेणैव सिद्धेः, 'ऊर्ध्वकाय' इतिवत्, 'समुदाये हि वृत्ताः शब्दा अवयवेष्वपि प्रवर्तन्ते' इति न्यायादत आह-षष्ठीसमासापवाद इति। तथा च कायपूर्व' इत्याद्यनिष्टप्रयोगनिवृत्तये सूत्रमिति भावः । पूर्वे कायस्येति। यद्यपि 'अन्यारा 'दिति सूत्रे 'दिशि दृष्टः शब्दो दिक्शब्द' इति व्याख्यानेन संप्रत्यदिग्वृत्तिनापियोगे पञ्चमी स्वीकृतेति षष्ठीह दुर्लभा, तथापि 'तस्य परमामेडित'मिति लिङ्गात् 'अवयववाचिदिक्शब्दयोगे पञ्चमी ने'त्युक्तत्वात्षष्ठ्येव भवतीति भावः। पूर्वे नाभेरिति। नाभेर्यः पूर्वो भागः स कायस्यावयव इत्यर्थः। 'नाभे 'रिति दिग्योगलक्षणा पञ्चमी। तेनाऽत्र पूर्वस्य भागस्य नाभिरवधिः, न त्वेकदेशिनीति नाभ्या सह समासो नेत्यर्थः। कायेन तु स्यादेव 'पूर्वकायो नाभेः' इति। पूर्वशब्दस्य नित्यसापेक्षत्वात्प्रधानत्वाच्च। पूर्वछात्राण्यामिति। नासौ निर्धारणे षष्ठी, किं तु समुदायसमुदायिसंबन्धे। बहुवचनं तूद्भूतावयवभेदसमुदाविवक्षया। ततश्छात्राणामेकदेशित्वे सत्यप्येकत्ववैशिष्ट्याऽभावान्न समासः। सर्वोऽपीति। पूर्वादिभिन्नोऽपीत्यर्थः। ज्ञापकादिति। अन्यथा अह्नस्य सायपूर्वत्वं न स्यादिति भावः। , मध्याह्न इति। 'राजाहःसखिभ्यः' इति टच्। 'अह्नोह्न' इत्यह्णादेशः। अयं चादेशोमध्याह्नसायाह्नशब्दयोरूर्ध्वकायवत्कर्मधारयेण न निर्वहति, तस्यैकदेशिसमासप्रयुक्तत्वात्, अतोऽत्र ज्ञापकाश्रयणं युक्तमेवेति बोध्यम्। इत्याहुरिति। न चैवं 'दिनमध्यो' 'रात्रिमध्य' इत्यादि न सिध्येदिति वाच्यम्। ज्ञापकसिद्धस्याऽसार्वत्रि कत्वात्। अर्धे नपुंसकम्। खण्डवाच्यर्द्धशब्दो न नित्यनपुंसकः, ग्रामा॰ नगरार्द्ध इति यथा। समांशवाची तु नित्यनपुंसकः। स एवेह गृह्यते, 'पूर्वापरे'ति पूर्वसूत्र

एवार्द्धशब्दे पठनीये 'अर्ध'मिति योगविभागेन निर्देशान्नपुंसकत्वे लब्धे, पुनर्नपुंसकग्रहणादित्याशयेन व्याचष्टे-नित्यं क्लीबे स इति। यो नित्यनपुंसकलिङ्गः स इत्यर्थः। प्राग्वदिति। एकत्वविशिष्टेनावयविना समस्यत इत्यर्थः। अन्ये तु व्याचख्युः- 'अर्ध 'मिति निर्देशादेव नपुंसकत्वे सिद्धे नपुंसकग्रहणं 'सूत्रेषु लिङ्गनिर्देशो न विवक्षितः' इतिज्ञापयितुम्। 'तेन तस्येद 'मित्यादि लिङ्गत्रयेऽपि भवतीति। 'अर्धपिप्पली'त्यत्र 'एकविभक्ति चापूर्वनिपाते' इत्युपसर्जनसंज्ञायां 'गोस्त्रियो 'रिति ह्रस्वः स्यादित्याशङ्कय समाधत्ते-अषठ्यन्तवचनमिति। तेन पिप्पलीशब्दस्याऽनुपसर्जनत्वान्न दोष इति भावः । नन्वेवं पञ्चानां खट्वानां समाहारः पञ्चखट्वीति न सिद्ध्येत, उपसर्जनसंज्ञानिषेधेन खट्वेत्याकारे ह्रस्वाप्रवृत्तेरदन्तत्वाभावेन 'द्विगोः' इति ङीपोऽप्रवृत्तेरत आहएकदेशिसमासविषयकोऽयमिति। 'पञ्चखट्वी'ति भाष्योदाहरणमेव 'अषठ्यन्ते'त्यस्य संकोचे लिङ्गमिति भावः। अर्धपिप्पलीति। परवल्लिङ्ग'मिति लिङ्गातिदेशेऽपि वचनातिदेशाऽभावाच्चेति भावः। 'अर्धपिपल्यः' इति प्रयोगस्तु 'अर्धानि पिप्पलीना'मिति विग्रहे असाधुश्चेदपि खण्डसमुच्चये साधुरेव, अर्धं पिप्पल्या अर्धपिप्पली, अर्धपिप्पली च अर्धपिप्पली चेत्यादिविग्रहात्। एकदेशिना किम् ? अर्धं पशोर्देवदत्तस्य। अत्र देवदत्तः स्वामी, न त्वषयवीति न तेन समासः। इदं सूत्रं 'पदवल्लिङ्ग'मित्यत्र भाष्ये प्रत्याख्यातम्। तद्यथा- अर्धपिप्पलीति हि कर्मधारयेण सिद्धम्। 'समुदाये दृष्टः शब्दा अवयवेष्वपि वर्तन्ते' इति न्यायात्। समप्रविभागादन्यत्र तवाप्येषैव गतिः, 'अर्धाहारः' अर्धोक्तम्' 'अर्धविलोकितम्' इत्यादिप्रयोगदर्शनात् । न च समप्रविभागे षष्ठीसमासं बाधितुमिदं सूत्रमिति वाच्यम्, षष्ठीसमासस्यापीष्टत्वात् । अतएव कालिदासः प्रायुक्त- 'प्रेम्णा शरीरार्धहरां हरस्ये 'ति। द्वितीयतृतीय। षष्ठीसमासापवादोऽयं योग इति वृत्तिकृतोक्तमयुक्तमिति ध्वनयन्नाह- निषेधं बाधित्वेति। प्राप्तजीविक इति। 'गोस्त्रियो'रित्युपसर्जनह्रस्वः। 'द्विगुप्राप्तापन्ने 'ति वक्ष्यमाणेन परवल्लिङ्गनिषेधः। न चेदं बहुव्रीहिणा गतार्थमिति शङ्कयम्, स्वरेविशेषात्। 'प्राप्तसुख' इत्यादौ निष्टान्तस्य 'जातिकालसुखादिभ्यः' इति परनिपातापत्तेश्च। 'प्राप्तापन्ने चे'ति चकारेण विधेयसमुच्चयार्थेनाकारप्रश्लेषानुमानात्, प्राप्तापन्ने समस्येते, अ च, अत्वं च तयोः स्यादिति भाष्ये स्थितम्। तत्र चकारात्पूर्वमेवाऽकारं छित्वा सौत्रत्वात्प्रकृतिभावो नेति प्राञ्चः। इमं क्लेशं परिहरन्नाहद्वितीयया अ इति। प्राप्ता स्त्रीति। एकादेशस्य पूर्वान्तत्वेन ग्रहणाल्लिङ्गविशिष्टपरिभाषया वा टाबन्तयोरपि प्राप्तापन्नयोः समासः। कालाः परिमाणिना। परिमीयते परिच्छिद्यते येन तत्परिमाणं-परिच्छेदक, तद्वान्परिमाणी, तदाहपरिच्छेद्यवाचिनेति।

काला इति। कालविशेषवाचका इत्यर्थः। सूत्रे बहुवचननिर्देशात्कालसामान्यस्याऽपरिच्छेदकत्वाच्च। मासो जातस्येति। षष्ठीसमासे प्राप्ते वचनम्। ननु जातः पुरुषस्तस्य तु हस्तवितस्त्यादिकं परिच्छेदकं, न तु कालः, तस्य क्रियामात्रपरिच्छेदकत्वादिति चेत् । अत्राहुः- साक्षात्क्रियां परिच्छिन्दन्नपि कालस्तद्द्वारा देवदत्तं परिच्छिनत्ति । यस्य हि जननादूर्ध्वं मासो गतः स 'मासजात' इति व्यवह्रियते । तत्र व्यवहारकालजननक्षणयोरन्तरालभावी मासो जननद्वारा जातमपि परिच्छिनत्त्येवेति । इह विग्रहे षष्ठीनिर्दिष्टस्यापि वृत्तौ प्राधान्यं द्योतयितुं 'यस्य (सः') इत्युक्तम् । अलौकिके तु प्रक्रियावाक्ये नास्य प्रवेशः। एवं बहुव्रीहावपीति बोध्यम्। ननु 'जातस्य मासः' इति विग्रहे वृत्तौ मासशब्दस्य पूर्वनिपातार्थमेतत्सूत्रारम्भस्यावश्यकत्वेऽपि मासविशेष्यकबोध एवात्रोचित इति किमनेने 'जातस्य यस्य सः' इति कथनेनेति चेत् । अत्राहुः- 'मासजातो मृतः' इत्यादिप्रयोगानुरोधेन विग्रहे 'यस्य सः' इति स्वीक्रियतइति। मासजात इति। यद्यपि मासोजातो यस्येति बहुव्रीहिणापीदं सिध्यति, 'जातिकालसुखादिभ्यः परा निष्ठा वाच्ये 'ति वचनात् । न च स्वरे विशेषः। 'वा जाते' इत्यन्तोदात्तत्वस्यापि सिद्धेः, तथापि षष्ठीसमासा-पवादार्थमिदमारम्भणीयमेव। किं च मासो जातवतो यस्य स मासजातवानित्येतदर्थमपीदमवश्यारम्भणीयमिति। उत्तरपदेनेति। परिमाण्युत्तरपदहेतुकद्विगुसिद्धये त्रिपदतत्पुरुषो वक्तव्य इत्यर्थः । 'सुप्सुपे'त्येकत्वस्य विवक्षिततत्वादप्राप्ते वचनम्। अस्मादेव वार्तिकारम्भात् 'सुप्सुपे'त्येकत्वं विवक्षितमिति ज्ञायते। अह्नादेश इति। त्रिपदतत्पुरुषे सत्युत्तरपदे परतः 'तद्धितार्थ' इत्यवान्तरद्विगौ सतीति भावः। पूर्वत्रेति। द्व्यहजात इत्यत्रेत्यर्थः। सप्तमी शौण्डैः। बहुवचननिर्देशाद्गणपाठसामर्थ्याच्च आद्यर्थावगतिरित्यभिप्रेत्याहशौण्डादिभिरिति। अक्षशौण्ड इति। शौण्डः = प्रवीणः। इह आसक्तिरूपा क्रिया वृत्तावन्तर्भवतीति, तदद्वारकं च सामर्थ्यम्। यथा दध्योदनगुडधानादौ उपसेचनमिश्रीकरणादिद्वारा सामर्थ्यम् । तेन 'कारकाणां क्रिययैव संबन्ध' इति नियमस्य न व्यभिचारः। अधिशब्द इति। 'आधेयप्रधान'इति शेषः। अधिकरणप्रधानस्य त्वव्ययीभाव एव। अधिहरीति यथा। ख इति। 'नित्य मिति शेषः। 'विभाषाञ्चेः' इति विभाषाग्रहणसामर्थ्यादिति वक्ष्यमाणत्वात्। अन्तःशब्दोऽत्र पठ्यते, स चाधिकरणप्रधानः। मध्ये इत्यर्थात्। तद्योगेऽवयविन आधारत्वविवक्षायां सप्तमी, यथा 'वृक्षे शाखे 'ति। वने अन्तर्वनान्तर्वसति। यस्त्वधिकरणत्वमात्रवृत्तिरन्तःशब्दस्तस्य तु 'विभक्त्यर्थे' इति नित्यमव्ययीभावः। 'प्रनिरन्तःशरे' इति णत्वम्। वने इति अन्तर्वणम् ।

यत्तु तत्पुरुषस्य वैकल्पिकत्वात्पक्षे अव्ययीभाव इति हरदत्तेनोक्तम्। तच्चिन्त्यम्।तत्पुरुषस्य वैकल्पिकत्वेऽप्यव्ययीभावस्य नित्यत्वाद्वने अन्तरिति तदुक्तस्वपदविग्रहस्याऽयोगात्। किं च विभक्त्यर्थमात्रवृत्तेरव्ययीभाव:, वचनग्रहणसामर्थ्यात्। अन्यथा वृक्षस्योपरीत्यादावतिप्रसङ्ग: स्यात् । ततश्च मध्यवाचिन: प्रसङ्ग एव नास्तीति दिक्। शौण्ड। धूर्त। कितव। व्याड। प्रवीण। संवीत। अन्तर् । अधि। पटु। पण्डित। कुशल। चपल। निपुण। वृत्। कृत्यै:। यत्प्रत्ययान्तेनैव समास इष्यते। 'अल्पश:' इत्यनुवृत्ते:। बहुवचनं तु प्रकृतिभेदाभिप्रायम्। तथैवोदाहरतिमासेदेयमिति। तत्पुरुषे कृती'त्यलुक्। नेह-मासे दातव्यम् । नियोगोपलक्षणार्थमिति। नियोगो-निर्धारणम्। आवश्यकोपलक्षणार्थमित्यर्थ:। नित्यसमासोऽयमिति। अतएव 'पुरुषेषूत्तम:' इति रवपदविग्रहोऽसङ्गत इत्यवोचाम। अवतसे इति। नकुलेन स्थितं नकुलस्थितम्। 'कर्तृकरणे कृते'ति समास:। कृद्ग्रहणपरिभाषया नकुलस्थितशब्दोऽपि क्तान्त इति तेन सह सप्तम्यन्तस्य समास:! 'तत्पुरुषे कृती'ति सप्तम्या अलुक्। अव्यवस्थिततत्वप्रतिपत्त्याऽत्र निन्दाव गम्यते। पात्रेसमितादयश्च। संपूर्वादिण: क्त:। गेहेनर्दीति। 'नर्द शब्दे' इत्यस्मात् 'सुप्यजाता'इति णिनि:। घटकतया प्रवेशो नेति। 'परमा: पात्रेसमिता:' इति वाक्यमेव भवति, न तु 'सन्मह'दित्यादिना समासान्तरमिति भाव:। एतच्च शब्दकौस्तुभे स्थितम्। अन्ये त 'केवला: पात्रेसमिता:' इति वाक्यमेव, न तु 'पूर्वकालैके 'त्यादिना समासान्तरमित्याहु:।

लघुशब्देन्दुशेखरे अस्य व्याख्यानं प्रतिसूत्रम् इत्थम् कं वर्तते। श्रितादीनां सुबन्तत्वाऽसम्भवात् श्रितादिप्रकृतिकैरित्यर्थलाभ:। 'येन विधि:' इति सूत्रस्थभाष्यप्रामाण्येन संबुद्धि-स्त्रीलिङ्गप्रथमान्तभिन्नेऽपि प्रवृत्तेरावश्यकत्वादितिभाव:। समर्थविशेषणत्वाच्छ्रितादीनां प्राप्तोऽपि तदन्तविधि: 'समासप्रतययविधौ' इति निषेधान्न भवति। तदन्तविधौ हि श्रितायन्तसमर्थप्रकृतिकैरित्यर्थे 'कष्टं परमश्रित:' इत्यादावपि समासापत्ति:। कष्टं श्रित इति। 'न लोका' इति षष्ठीनिषेध:। पतितशब्दे तनिपतिदरिद्रातिभ्य: सनो वेट्कत्वेन 'यस्य विभाषा' इतीनिषेधप्राप्तावपि अत एव निर्देशादिड् बोद्धय अयोग्यत्वादिति। 'स्वय'मित्यात्मनेत्यर्थकं कर्तृशक्तिप्रधानमित्यर्थ:। स्वायंकृतिरिति। असमासे 'कार्ति:' इति स्यादिति भाव:। ऐकस्वर्यमपि समासफलम्। खट्वा। अस्य तत्प्रकृतिके लक्षणया 'द्वितीया' इत्यनेन सामानाधिकरण्यम्। जाल्म इति। तेन केवलरुढत्वं तस्य सूचयति। एतेन प्रकारणादिसहकृतवाक्येन निन्दाप्रतीतिसम्भवात् 'न हि निन्दा'इत्ययुक्तमित्यपास्तय। योगरूढे तत्सम्भवेऽपि केवलरूढे तदभावात्। न हि निन्देत्यस्य च विवक्षिता निन्देत्यर्थ:। सामि इत्यर्थे। काला इति। कालवाचिन इत्यर्थ:। बहुवचनात्। ननु क्तेनेत्यस्य निवृत्त्या क्तान्ताऽक्तान्तसाधारणोत्तरसूत्रेण सिद्धे योगविभागो व्यर्थोऽत आहत्यन्तेति। परिच्छेत्तुमिति। रमौगे 'शकधृषे 'ति तुमुन्। अत्यन्त। अत्यन्तसंयोगानत्यन्तसंयोगसाधारणेन पूर्वेण सिद्ध इदं किमर्थमत आहअक्तान्तार्थमिति। 'क्तेन'इति अत्र नानुवर्तत इति भाव:। तृतीया। इदं सूत्रं कृतद्वारक एव सामर्थ्य प्रवर्त्तते, न साक्षात्परस्परान्वये। उत्तरसूत्रेण निपुण,लक्षणाभ्यां समासविधानात्। तद्योगे हि हेतौ तृतीया। तत्कृतेत्युक्तेव। स्पष्टश्चैतद्भाष्ये। गुणेत्यस्य 'तत्कृत' इत्येतत्सापेक्षत्वेऽपि सौत्रत्वात्समास:। खण्डशब्दश्च खण्डगुणवत्त्वेन शकलबोधक इति शङ्कुलाखण्ड इत्यत्र कृतद्वारकमेव सामर्थ्यम्। शङ्कलाकृतखण्डगुणवानित्यर्थ:। वचनग्रहणन्तु गुणोपसर्जनद्रव्यवचनेनैव समासार्थम् । तेन 'कुसुम्भेन कृतं रूप'मित्यादौ न, 'घृतेन पाटव'मित्यादौ च न। स्पष्टचेदं भाष्ये। यद्यपि जातिसञ्ज्ञाकृदन्ततद्धितान्तसमस्तसर्वनामसंख्याशब्दभिन्नशब्दानामेव गुणवचनसञ्ज्ञा, तथाऽपि प्रकृते व्याख्यानाच्छुद्धयौगिक एव गुणवचनशब्द इति बोद्ध्यम्। तृतीयान्तार्थेन कृतो यो गुणस्तद्वचनेन समास इत्यर्थात्, 'तत्कृत' इत्यस्य गुणपदेनैवान्वयेन सन्ज्ञाऽनुपादानाच्च, 'गुणेन 'इतीयता सिद्धे वचनग्रहणाद्गुणमुक्तवतेत्यर्थ

इति भाष्याच्च गुणपदेन धर्ममाश्रमत्र। तेन खण्डशब्दस्य क्रियावचनत्वेऽपि न दोष:।_ धान्येनेति। अथशब्दो धनपर:, हेतुतृतीयेति बोध्यम्।

प्रादिसमास-गतिसमसयोभेदविचार:

"कुगतिप्रादय:[151]

समासप्रकरणे इदं नवतितमं सूत्रमस्ति। शब्दकौस्तुभकार: भट्टोजिदीक्षित: सूत्रस्यास्यार्थं करोति - कुशब्दो गतिसंज्ञा: प्रादयश्च समर्थेन नित्यं समस्यन्ते। कु: पापार्थे कुपुरुष:। नित्यसमासविषयस्याप्यस्य पूर्वपदप्रकृतिस्वरार्थमव्ययत्वमिष्यते। तथा च वार्तिकम् - "अव्यये नकुनिपातानाम्'' (का.वा.) इति। तस्मादयं स्वादिषु बोद्धव्य:। स एव चेह गृह्यते, न तु पृथिवीवृत्ति: गत्यादिसाहचर्यात् ।

गतिः-ऊरीकृत्य। प्रादिग्रहणमगत्यर्थम्। तद्विषयविभागार्थानि तु बहूनि वार्त्तिकानि। तथाहि, दुर्निन्दायाम् - दुःपुरुषः। स्वतीपूजायाम् - सुपुरुषः, अतिपुरुषः। आङीषदर्थे- आपिङ्गलः।

प्रायिकं चैतदुपाधिवचनम्। अन्यथा "ईषदर्थे च''[152]इति कोः कादेशविधानमनुपपन्नं स्यात्। कोष्णम्। दुष्कृतम्। दुरत्र कृच्छ्रार्थे। अनभिधानात्तु भूते खल् न भवति । सुष्टुतम्। सुशुद्धोऽतिशये न तु पूजायाम्। अत एवोपसर्गनिबन्धनं षत्वम्। अतिस्तुतम्। (प्रादयो गताद्यर्थे प्रथमया)। वृत्तिविषये गताद्यर्थवृत्तयः प्रादयो गतित्वाभावेऽपि प्रादिग्रहणेन समस्यन्ते इत्यर्थः। प्रगत आचार्यः प्राचार्यः। प्रान्तेवासी। (अत्यादयः क्रान्ताद्यर्थे द्वितीयया)। अतिक्रान्तः मालाम् अतिमालः। (अवादयः क्रुष्टाद्यर्थे तृतीयया)। अवक्रुष्टः कोकिलया अवकोकिलः। (पर्यादयोग्लानाद्यर्थे चतुर्थ्या) परिग्लानोऽध्ययनाय पर्यध्ययनः। अलं कुमार्यै अलंकुमारि। नित्यसमासत्वेऽपि चतुर्थीविधानसामर्थ्यात्पक्षे वाक्यमिति रक्षितः। एतेन "एकविभक्ति चापूर्वनिपाते'[153] इति सूत्रे 'अलंकुमारिः' इति भाष्यं "पर्यादयोग्लानाद्यर्थ इति समासः" इति कैयटवचनं च व्याख्यातम्। तदेव भाष्यम्-नित्यतायां ज्ञापकमिति वास्तु। वस्तुतस्तु नेहानेन समासः, अलमोऽप्रादित्वात्। प्रादिसमासस्य त्वंय प्रपञ्च इत्याकरः। किन्तु "द्विगुप्राप्तापन्नालम्पूर्व" (का.वा.) इत्यनेन ज्ञाप्यमानोऽलंपूर्वस्तत्पुरुषः पृथग्गतिग्रहणात्पर्याप्त्यर्थेनापि भवन्नभिधानानुरोधाच्चतुर्थ्यन्तेनैव भवति। तस्य चानित्यसमासत्वं निर्बाधमेवेत्यवधेयम्। (निरादयः क्रान्ताद्यर्थे पञ्चम्या)। निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः। प्रादिग्रहणस्य अगत्यर्थत्वादतिप्रसङ्गे प्राप्ते कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः। वृक्षम्प्रति विद्योतते विद्युत्। एवं 'सुस्तुतम्' 'अतिस्तुतम्' इति षत्वाभावेऽपि समास उदाहृतः। "स्वती पूजायाम्' (का. वा.) इति वचनाद्वा

तत्सिद्धिः।

कुगति 'कु'शब्दोऽत्राव्ययं गृह्यते, तु न पृथिवीवाचको, गत्यादिसाहचर्यात् । ऊर्यादिच्विडाचश्च। 'उपसर्गाः क्रियायोगे' इत्यतोऽनुवर्तनादाह- क्रियायोग इति। विडाचौ कृभ्वस्तियोगे विहितौ, तत्साहचर्यादूर्यादीनामपि तत्रैव गतिसंज्ञा। तेनेह नऊरी पक्त्वा। माधवादिग्रन्थे तु आविःप्रादुःशब्दौ मुक्त्वा अन्येषां करोतिनैव योगे गतिसंज्ञे 'ति स्थितम्। तथैवोदाहरति-ऊरीकृत्येति। एतच्च मनोरमानुसारेणोक्तम्। वस्तुतस्तु 'ऊरीभूयेति भाष्योदाहरणाद्दिङ्भात्रमुदाहरति, ऊरीकृत्ये'त्यवतरितुं युक्तम्। संज्ञाफलं समासः, तत्फलं च ल्यबिति बोध्यम्। ऊरी उररी-एतावङ्गीकारे। आविःशब्दस्य तु साक्षात्प्रभृतिषु पाठात्कृञो योगे गतिसंज्ञाधिकल्पः, कृभ्वस्तियोगे त्वनेन नित्यमिति बोध्यम्। कथं तर्हि 'वारूणीमदविशङ्कमथाविश्चक्षुषो भवदसाविव । रागः' इति माघ इति चेत् ? अत्राहुः- 'ते प्राग्धातोः' इति सूत्रस्य प्रयोग नियमार्थत्वपक्षे प्रकृतेऽनुपपत्तावपि संज्ञानियमार्थत्वपक्षे दोषलेशोऽपि नास्तीति। शुक्लीति। 'कृभ्वस्तियोगे संपद्य कर्तरि चिः। 'अस्य च्वौ' इतीकारः। पटपटाकृत्येति। 'डाचि बहुलं द्वे भवतः' इति पटच्छब्दस्य द्वित्वम्। 'अव्यक्तानुकरणाद्व्यजवरार्द्धादि'ति डाचि टिलोपः। 'नित्यमानेडिते डाची'ति तकारपकारयोः पकार एकादेशः निपातसंज्ञायाः समावेशार्थः (सूत्रे) चकारः। तेन ऊरीकृतमित्यत्र 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरे क्रियमाणे निपातप्रयुक्तमायुदात्तत्वं भवति। कारिकेति। भावे 'पर्यायार्हणे 'ति ण्वुच्। तदाह-क्रियेति। क्रियायोगे' इत्यनेन कारिकाशब्दस्य विशेषणाच्छलोकवाची कारिकाशब्दोऽत्र न गृह्यत इति भावः। क्रियाशब्दस्याऽत्र मर्यादास्थितिरर्थः। यत्न इत्यन्ये। अनुकरणं चा। 'ते प्राग्धातोः'इत्यस्य संज्ञानियमपक्षेऽनितीति व्यर्थमिति मत्वा पृच्छति- अनितिपरं किमिति। इतरस्तु प्रयोगनियमपक्षे खाडित्यनुकरणस्येतिशब्दे परे गतिसंज्ञानिवारणायाऽनितिपरमित्यावश्यकमिति प्रत्युदाहरति-खाडिति कृत्वेति। सत्यां संज्ञायामेष प्रयोगो नैव स्यात्किंतु 'इति खाटकृत्ये 'त्येव स्यादिति भावः। न च 'इति खाटकृत्ये 'ति न भवति, इतेः परस्यानुकरणस्य गतिसंज्ञानिषेधादिति वाच्यम्, 'अनितिपर'मित्यत्र इतिः परो यस्मात्तदितिपरं, न इतिपरमनितिपरमिति बहुव्रीहिघटितनञ्तत्पुरुषाश्रयणात् । स्यादेतत्अनुकरणस्येतिशब्दपरत्वे क्रियायोगाऽभावाद्गतिसंज्ञा नास्तीति खाडिति कृत्वेति रूपं निर्बाधं, किमनेनाऽनितिपरग्रहणेनेति चेत्, अत्राहुः- इतिकृत्वेति समुदाय एवंकृत्वेत्यर्थे वर्तते। तथा च इतिशब्दः क्रियाविशेषक इति तद्घटितसमुदायस्य क्रियावाचकत्वादस्त्येव क्रियायोग इति। हतं परिगृह्यति। हत्वा गमनं द्विधा; हतं त्यक्त्वा परिगृह्य चेति। आद्यमुदाहरणं, द्वितीयं तु प्रत्युदाहरणम्। 'अपरिग्रहे' इति च प्रयोगोपाधिः, नतु वाच्यकोटिनिविष्टमिति भावः। कणेहत्येति। अत्यन्तमभिलष्य तन्निवृत्तिपर्यन्तं पिबतीत्यर्थः। तथा च श्रद्धाया अपगमात्तत्प्रतीघातो गम्यते । प्रत्युदाहरण तु कणे हत्वा गतः। सूक्ष्मस्तण्डुलावयवः कणः। तस्मिन् हत्वेत्यर्थः। पुरस्कृत्येति। 'पूर्वाधरावराणा'मित्यसिप्रत्यययान्तोऽयमव्ययम्। 'नमस्पुरसो 'रिति विसर्गस्य सः। 'अमुं पुरः पश्यसी'त्यत्र तु 'स्थित मित्यघ्याहारेण दृशि प्रत्यगतित्वात्सत्वाऽभावः। अव्ययं किम् ? पुरं पुरौ पुरः कृत्वा

गतः। अस्तं च। अव्ययमिति किम् ? अस्तं कृत्वा काण्डं गतः। क्षिप्तमित्यर्थः। अच्छमिति। सत्यां हि गतिसंज्ञायां निपातसंज्ञावत्त्वेनाव्ययत्वात्सुब्लुक् स्यादिति भावः। अदःकृत्येति। यदा स्वयमेवपर्यालोचयति तदेदमुदाहरणम्। अदःकृतमिति। 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वम्। प्रत्युदाहरणमिति। अदः कृत्वा अदः कुर्वित्यादीत्यर्थः। तिरोऽन्तौ । अन्तर्धौ किम् ? तिरोभूत्वा स्थितः। पार्श्वतो भूत्वेत्यर्थः। विभाषा कृजि। तिरः कृत्वेति। गतित्वाऽभावपक्षे 'तिरसोऽन्यतरस्या 'मितिसत्वमपि न भवति, तद्विधौ गतिग्रहणानुवृत्तेः। माधवस्तुपराभवे 'तिरस्कार'इति प्रयोगदमनात्सत्वविधौ गतिग्रहणानुवृत्तिं केचिन्नेच्छन्तीत्याह। उपाजेऽन्वाजे। एतौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्तेते। तदाहदुर्बलस्येति। साक्षात्प्रभृतीनि। साक्षात्। मिथ्या। आम्। अद्धा। लवणम्। उष्णम्। शीतम्। उदकम्। आर्द्रम्। गतिसंज्ञासंनियोगेन लवणादीनां पञ्चानां मकारान्तत्वं निपात्यते। प्रादुस्। नमस्। आविस् इत्यादि। आकृतिगणोऽयम्। साक्षात्कृत्येति। असाक्षाद्भूतं यथा साक्षाद्भवति तथा कृत्वेत्यर्थः। च्वयन्तेषु तु पूर्वविप्रतिषेधात् 'ऊर्यादिच्चिडाचश्वे 'ति नित्यैव गतिसंज्ञा । तेन लवणीकृत्येत्यत्र मान्तत्वं न भवति। तद्धि पाक्षिकं। गतिसंज्ञा संनियोगेनेह गणे निपातनात्। भाष्यकृता 'लवणशब्दस्य लवणीशब्दस्य वा विकल्पेन लवणशब्द आदिश्यते तस्य च संज्ञाविकल्प' इत्युक्तम्। उभयथापि त्रैरूप्यं निर्बाधम्। अनत्या। उरसिमनसी विभक्तिप्रतिरूपकौ। मध्ये पदे। 'विभाषा 'कृजी'ति वर्तते, चकाराद 'नत्याधाने' इति च। एषामनत्याधानरूपार्थविशेषे एदन्तत्वमविशेषेण निपात्यते, न तु गतिसंज्ञासंनियोगेन। अनत्याधाने किम् ? पदे कृत्वा शिरो नमति। वाचं नियम्येति। निवचनं हि वचनाऽभावः। अर्थाऽभावेऽव्ययीभावः। नित्यं हस्ते। उपयमनरूपार्थ एवैतयोरेदन्तत्वमौदन्तत्वं च निपात्यते ।कुगति प्रा। कुशब्दः पापार्थोऽव्ययमेवाऽत्र, गत्यादिसाहचर्यात् । तेनाव्ययपूर्वपदप्रकृतिस्वरः। समर्थेनेति। समर्थपदं तृतीयया विपरिणम्यत इति भावः। ऊर्यादि। क्रियायोग इति। 'उपसर्गाः' इत्यतस्तदनुवर्त्तते। अत एव सञ्ज्ञाविधावपि विडाजंशे तदन्तविधिः। ऊर्यादयो निपाता भवन्ति, निपाताः सन्तः क्रियायोगे गतिसञ्ज्ञा इत्यर्थः। कारिका क्रियेति। मर्यादास्थितियत्नरूपेत्यर्थः। धात्वर्थनिर्देशे ण्वुल्। दासीलोकवाचिनस्तु न ग्रहणं, व्याख्यानादिति भावः। अनितिपरं किमिति। 'ते प्राग्धातोः' इत्यस्य सञ्ज्ञानियमार्थत्वे व्यर्थमिति प्रश्नः । प्रयोगनियमार्थत्वाऽभिप्रायेणोत्तरम्। भाष्यकृता तु सञ्ज्ञानियमार्थत्वमाश्रित्येदं, 'छन्दसि परेऽपि' 'व्यवहिताश्च' इति सूत्रद्वयश्च प्रत्याख्यातम्। अत एव 'सुकटङ्कराणि' 'स्वाट्यम्भव'मित्यादिभाष्यप्रयोगाः सङ्गच्छन्ते। 'कटं सुकराणी'त्यादि त्वनभिधानेन वारणीयमत्र पक्षे। खाडितीति। एतद्विशेषणाऽभावे प्रयोगनियमशास्त्रादेवं प्रयोगोच्छेद एव स्यादिति भावः। अनितिपरमिति चात्र बहुव्रीहिः। अनिताविति वक्तव्ये परग्रहणन्तु अनुकरणाकृतावनिति परत्वविवक्षार्थम्। तेन 'श्रौषड्वौषडिति कृत्वा' इतयादौ व्यवहितेऽपि निषेधसिद्धिरेतद्बलादेव। 'ते प्रा'गित्यादावपि गत्याकृतिनिर्देशः। एतत्प्रकरणे आकृतिपरतायां तस्य तात्पर्यग्राहकत्वात्। अत एव 'अभ्युद्धरति' इत्यादावुभयोः पूर्वप्रयोग इति दिक्। आदराना। अनादर इति बहुव्रीहिः। अतः 'पाखण्डिनमसत्कृत्ये 'त्यादि सिद्धम्। तत्पुरुषे हि यत्रादरप्रसक्तिस्तदीयाऽनादर एव स्याद्गुरुमसत्कृत्येत्यादौ। कणेमनसी। 'शब्दस्वरूपे' इति विशेष्यम्। कणेहत्येति। 'परावरयोगे च' इति क्त्वा। पुरोऽव्ययम्। 'पुरोभूय' 'पुरोगत्य' इत्यप्युदाहरणम्।

कृञोयोगे एवेति नियममेमानाऽभावात्। अव्ययपदमनुवर्त्तते इत्याशयेनाहमान्तमव्ययमिति। तेन काण्डमस्तं कृत्वेत्यत्र न। अस्तं = क्षिप्तम् । जलमच्छङ्गच्छतीति। 'प्राग्रीश्वरात्' इत्यधिकारान्निपातत्वेऽव्ययत्वे च विभक्तिलुक् स्यादिति भावः। सप्तमीनिर्देशेऽपि 'तस्मिन्' इति परिभाषा न प्रवर्त्तते, क्रियायोग इत्यनुवृत्तेः। एतेनाऽनुस्वारव्यवधानात्कथमत्र प्राप्तिरित्यपास्तम्। उपाजेऽन्वाजेशब्दौ एदन्तौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य बलाधाने वर्तते । च्व्यर्थे इति। च्व्यन्ते तु पूर्वविप्रतिषेधेन नित्यैव सञ्ज्ञेति भाष्ये स्पष्टम्। इदं प्रायिकम्। अत एव 'नमस्करोति' इत्यादौ च्व्यर्थाऽभावेऽप्यनेन गतित्वमाहुः। अन्ये तु स ऊर्यादौ स्वरादौ चेति विकल्पफलसिद्धिमाहुः। मान्तत्वमिति। गतिसञ्ज्ञासन्नियोगेन 'लवणम्-उष्णं-शीतम्उदकम्-आर्द्रम्' इति पञ्चनामित्यर्थः। 'उरसि' 'मनसि' इति विभक्तिप्रतिरूपकौ निपातौ। मध्ये पदे। 'विभाषा कृजि' इति, 'अनत्याधान' इति चानुवर्तते। तत्रचैषामेदन्तत्वं निपात्यते। सप्तमी तु न, मध्यं पदं कृत्वा, वाचं नियन्येति च प्रत्ययेन तस्या अनन्वितत्वात् । अनत्येति किम् ? हस्तिनः पदे कृत्वा शिरः शेते। नित्यं हस्ते। उदाहरणे 'तत्पुरुषे कृति'इत्यलुक्। उपयमने किम् ? हस्ते कृत्वा कार्षापणं गतः। प्राध्वम्। इदं मान्तमव्ययं बन्धनेनाऽऽनुकूल्ये वर्त्तते। कृजीत्येव। जीविका = जीवनोपायः। सुपुरुष इति। क्रियायोगाऽभावादगतित्वम्। अत्रेति। अव्यवस्थया समासप्राप्तौ व्यवस्थाऽर्थानीति भावः। कर्मप्रवचनीयानामिति। सा सञ्ज्ञा तु प्रतिस्तवनमित्यादौ षत्वाऽभावाद्यर्थेति बोध्यम्। भाष्ये तु 'कर्मप्रवचनीयानां प्रतिषेधःवृक्षं प्रति विद्योतते। व्यवहितानाच्च प्रतिषेधो वक्तव्यः। आ मन्द्रैरिन्द्र हरिभिर्यादिइत्युक्त्वा 'सिद्धन्तु क्वाङ्सुदुर्गतयः प्रादयः क्तार्थे'

इत्यनेनेदं वचनद्वयमपि प्रत्याख्यातम्। "एतदेव सौनागैर्विस्तरतरकेण पठितम्। 'स्वती पूजायां, दुनिन्दायाम्, आङीषदर्थे, कुः पापार्थे, प्रादयो गताद्यर्थे ' इत्याद्युक्तम्। एवञ्चैषामावश्यकत्वेन कर्मप्रवचनीये प्राप्ति नेति तदाशयः।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह- नित्यमिति वर्त्तते । कुशब्दोऽव्ययं गृह्यते, गत्यादिसाहचर्यात्, न द्रव्यवचनः। कुगतिप्रादयः समर्थेन शब्दान्तरेण सह नित्यं समस्यन्ते, तत्पुरुषश्च समासो भवति। कुः पापार्थे- कुपुरुषः। गति- उररीकृतम्, यदूरीकरोति। प्रादयः - दुर्निन्दायाम् - दुष्पुरुषः। स्वती पूजायाम् - सुपुरुषः, अतिपुरुषः। आङीषदर्थे- आपिङ्गलः। प्रायिकं चैतदुपाधिवचनम्, अन्यत्रापि हि समासो दृश्यते - कोष्णम्, कदुष्णम्, कवोष्णम्, दुष्कृतम्, सुष्टुतम्, अतिस्तुतम्, आबद्धम् इति। (प्रादयो गताद्यर्थे प्रथमया)। प्रगतः आचार्यः प्राचार्यः। प्रान्तेवासी। (अत्यादयः क्रान्ताद्यर्थे द्वितीयया) अतिक्रान्तः खट्वाम् अतिखट्वः। अतिमालः। (अवादयः क्रुष्टाद्यर्थे तृतीयया)। अवक्रुष्टः कोकिलया अवकोकिलः। (पर्यादयो ग्लानाद्यर्थे चतुर्थ्या)। परिग्लानोऽध्ययनायः पर्यध्ययनः। अलं कुमार्यै अलंकुमारिः। (निरादयः क्रान्ताद्यर्थे पञ्चम्या)। निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः। निर्वाराणसिः। (इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्) । वाससी इव। (प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः) वृक्षं प्रति विद्योतते विद्युत् । साधुर्देवदत्तो मातरं प्रति। यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेण अर्थं विवृणोति, येन सूत्रार्थावगमने सौकर्यं भवति तथा प्रतिपदं स्पष्टंभवति। काशिकाकारस्तु अस्य सूत्रस्यार्थं शब्दकौस्तुभमाधारीकृत्य एव साररूपेण करोति, येन सूत्रार्थावगमने कण्ठस्थीकरणे च सौकर्यं जायते। काशिकावृत्ति शब्दकौस्तुभस्य अनुकरणं सरलीकरणं संक्षिप्तीकरणञ्चास्ति। काशिकाकारस्तु भाष्योक्तं सर्वं पक्षम् उपस्थाय प्रतिपदम् अर्थं व्याख्याति ।

नञ्तत्पुरुषः -

तत्पुरुषस्य एकः अन्योपि भेदः। स च नञ्तत्पुरुषः। नञ्तत्पुरुषे नञ् इति अव्ययपदं सूबन्तेन सह समस्यते। यथा- न ब्राह्मणः, अब्राह्मणः। यदि उत्तरपदस्यआदिमोवर्णः स्वरः भिन्नः स्यात् तदा नअव्ययस्य अकारस्य लोपो भवति । तथा हि सूत्रं न लोपो नञः। परञ्च यदि आदिमः वर्णः स्वरः स्यात् तदा तस्य नुडागमो भवति । तथा हि सूत्रं तस्मान्नुडचि।

तदुक्तं सिद्धान्तकौमुद्याः तत्त्वबोधिन्यां नञ्। इह 'नलोपो नञः' इत्यत्र विशेषणार्थे अकारः। तत्फलं च नैकधेत्यत्राऽलोपः। 'अव्यये नकुनिपाताना 'मित्यव्ययपूर्वपदप्रकृतिस्वरार्थ अकारोच्चारणमित्यन्ये। सुपा सह समस्यत इति। उत्तरपदार्थप्रधानोऽयं समासः। तथाहि आरोपितत्वं ना द्योत्यते । तथा च अब्राह्मणशब्दादारोपितो ब्राह्मण इति बोधे अर्थाद्ब्रह्मणभिन्न इति पर्यवस्यति । अतएवाऽनुपसर्जनत्वादतस्मिन्नस इत्यादौ सर्वनामकार्यं सिध्यति। तत्पुरुषस्यौत्सर्गिकमुत्तरपदार्थप्राधान्यमप्येवं सति निर्बाधम्। 'एतत्तदो'रिति सूत्रेऽनञ्समासग्रहणं चेह लिङ्गमित्यादि मनोरमायामनुसन्धेयम्। नलोपो नञः। 'नजोऽशि'ति वक्तव्येनलोपवचनं साकच्कार्थं, तेन नञोऽकचि 'अकब्राह्मणः' 'अकब्राह्मणः' 'अकनश्व' इत्यादि सिद्धमित्याहुः। उत्तरपदे इति। अलुगुत्तरपदे' इत्यधिकारादिति भावः । उत्तरपदे किम् ? घटो नास्ति। पटो नास्ति। नन्वेवमपि 'स्त्रैणाऽर्थः' इत्यत्र नलोपः स्यादिति चेदत्राहुः- उत्तरपदाक्षिप्तपूर्वपदेन नजं विशिष्य 'पूर्वपदभूतस्य नञः' इति व्याख्यानान्न भवति। 'स्त्रीपुंसाभ्या 'मिति विहितस्य नञ्प्रत्ययस्याऽपूर्वपदत्वात्। अतएव चाऽत्र 'प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव ग्रहण'मिति परिभाषा नोपतिष्ठते । न च प्रत्ययग्रहणे तदन्तग्रहणान्न प्रत्ययान्तस्य पूर्वपदत्वं संभवत्येवेति 'प्रत्ययाऽप्रत्यययो' रित्येतदुपतिष्ठत एवेति वाच्यं, 'हृदयस्य हल्लेखे 'ति सूत्रेऽण्ग्रहणात्पृथग्लेखग्रहणेन 'उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञापनात्। यद्वा 'अमूर्धमस्तकान्' 'विभक्तावप्रथमाया'मित्यादिज्ञापकात् 'नलोपो नञः' इत्यत्राऽव्ययमेव नञ् गृह्यते, न तु प्रत्यय इति। तस्मान्नुडचि। 'ङः सि धुडि'त्यत्रेवाऽचीति सप्तम्याः षष्ठी प्रकल्प्यत इत्याह- अजादेरिति। अचा उत्तरपदविशेषणात् 'यस्मिन्विधि'रिति तदादिविधिर्लभ्यत इति भावः। अनश्व इति। नुटः परादित्वेनाऽपदान्तत्वान्ङमो ह्रस्वादिति ङमुण्न भवति। ननु विघ्नानामभावोऽविघ्नमित्यत्रापि परत्वात्तत्पुरुषः स्यात्, अव्ययीभावस्य निर्मक्षिकादौ सावकाशत्वात्। अन्यथा 'अनुपलब्धिः' 'अविवाद' इति न सिद्ध्येदित्याशङ्कयाहअर्थाभावेऽव्ययीभावेन सहेत्यादि। अविघ्नमित्यादीति। यद्यप्यविद्यमाना विघ्ना यस्मिन्निति बहुव्रीहिणा. 'अविघ्नं कर्मे 'त्यादिप्रयोगः सिद्ध्यति, तथापि 'उत्तरेकर्मण्यविघ्नमस्तु' इत्यादिप्रयोगा अव्ययीभावं विना स्वरसतो न सिद्ध्यन्तीति भावः। नजो नलोप इति। तिङन्तेन समासाऽभावादप्राप्ते वचनम्। अपचसीति।

कुत्सितं पचसीत्यर्थः। नशब्देनेति। नत्रा समासे त्वनेकधेत्येव स्यादिति भावः।नभ्राट्। सत्सु साधवः सत्याः। 'तत्र साधुः' इति यत्। न सत्या असत्याः। न असत्यानासत्याः। इह बहुवचनमविवक्षितम्। तेन 'नासत्यावश्विनौ दस्रौ' इति सिद्धम्।नमुचिरिति। 'सर्वधातुभ्य इन्'। 'इगुपधात्किदि'ति किन्त्वान्न गुणः। क्षरतेः क्षीयतेर्वेति। 'क्षर सञ्चलने' भ्वादिः। 'क्षि निवासगत्योः' तुदादिः।

लघुशब्देन्दुशेखरे नागेशभट्टः अपि नञ् इति सूत्रं व्याख्यातवान् - नञ्। अकारो निषेधार्थकनशब्देन समासे तत्पुरुषत्वाऽभावाय। तेन नैकधेत्यादौ पूर्वपदप्रकृतिस्वरो न। अत्रैव नलोपं वारयितुं लोपविधायके जकारोच्चारणम्। प्रसिद्धतरत्वान्नबत्राऽव्ययं, न तु स्त्रीपुंसाभ्यां नञ्। ये तु नेत्यव्ययं नेच्छन्ति, अत एव 'न लोपो नञः' इति सूत्रे नञः सानुबन्धकस्य ग्रहणं व्यर्थे, नस्येत्येव सिद्धम्। न च प्रश्नपुत्रे दोषः, सानुबन्धकत्वात् । अव्ययेष्वपि नेत्येव पाठ्यमित्याशयः। 'वामनपुत्र' इत्येतद्धारणार्थे तु सानुबन्धकः पठित इति भाष्योक्तं सङ्गच्छत इति वदन्ति च, तेषामुभयत्रापि जकारः स्पष्टार्थः। नैकधेत्यादि, नान्तरीयकमिति च पृषोदरादित्वात्साधुः। न लोपो। 'नञोऽशि'ति सिद्धे लोपवचनं साकच्कार्थम्। तेनाऽकब्राह्मण इत्यादि सिद्धमित्येके। ननेत्यादौ द्वित्वे बहुव्रीहिवद्भावेऽपि नाऽन्तेन लोपः, उत्तरपदशब्दस्य मुख्यसमासचरमावयव एव रूढेरित्याहुः। तस्मान्नुट्। नञो नुडभावाय, नाकनासत्ययोनलोपाऽभावे तद्वारणाय च 'तस्मा दिति। ततो व्याख्यानाच्चाऽचीति सप्तमी षष्ठ्यर्थे, सप्तमीनिर्देशस्तु 'यस्मिन्विधिः' इति परिभाषाप्रवृत्तये। तदाह- अजादेरिति। नुक् तु न कृतः, ङमुट्प्रसङ्गात्। अनश्च इति। आरोपितोऽश्व इति बोधः। नञ् तु द्योतकः। तत्रतादात्म्यारोपस्य भेदसादृश्ययोः सतोरेव सत्त्वेन संसर्गारोपस्य तदभाव एव सत्त्वेनाऽऽरोपितत्वबोधे सादृश्याऽभावादीनामर्थतो बोध इति नाऽब्राह्मणपदाल्लोष्टादिप्रतीतिरित्यन्यत्र विस्तरः। अर्थाऽभावे इति। तत्राप्योरोपितो घट इत्येव बोधः। भेदेन तदारोपबोधेऽत्यन्ताभावबोधः, तादात्म्येन तदारोपबोधे भेदबोधः। अत्र च प्रकरणादिकं नियामकमिति बोध्यम्। विकल्प्यत इति। पूर्वपदार्थप्राधान्येऽव्ययीभाव, उत्तरपदार्थप्राधान्येऽयमित्यादिरीत्येति भावः। न्यायसिद्धेऽर्थे लिङ्गमप्याह- रक्षोहेति। 'असन्देह' इत्यस्य आरोपितः सन्देह इत्यर्थः। सन्देहाऽभावः प्रयोजनमिति यावत् । अव्ययीभावेन द्वन्द्वे हि परवल्लिङ्गेनाऽसन्देहा इत्यनुपपन्नमिति भावः। इदं पस्पशायां भाष्ये। असंहितमिति संहितासञ्ज्ञासूत्रे भाष्ये वार्त्तिकम्। द्रुताभिन्नायां मध्याविलम्बितावृत्तौ संहिताभाव इति तदर्थः। परे तु- भाष्ये नञ्तत्पुरुषोऽन्यपदार्थप्रधानः, उत्तरपदस्य धर्मपरतया न विद्यते ब्राह्मण्यं यस्मिन्सोऽब्राह्मणः। बहुव्रीहिस्तु तस्य धर्मिपरत्वे चरितार्थः। अत एव 'नोऽस्त्यर्थानामुत्तरपदलोपश्च' इति 'अनेक मिति सूत्रस्थं वार्त्ति सङ्गच्छते। एतेन तत्त्वेऽपवादत्वादयं बहुव्रीहेर्बाधकः स्यादिति कैयटोक्तमपास्तम्। 'असः' इत्यादौ सर्वादिकार्यं तु 'एतत्तदोः सुलोपोऽकोरनञ्समासे' इति ज्ञापकात्सिद्धम्। अत्र पक्षे 'अवर्षा हेमन्तः' इत्यादौ विशेष्यगतलिङ्गवचनापत्तिर्दोष उक्तः। तत्र यद्यपि लिङ्गदोषो 'लिङ्गमशिष्यं लोकाश्रयत्वात्' इति परिहर्तुं शक्यते तथापि वचनदोषः स्थितः। ततः 'पूर्वपदार्थप्रधानस्तर्हि भविष्यति'। तत्रापि पक्षे 'असः' इत्यादिसिद्धिः प्राग्वदेव। न च पूर्वपदस्याऽव्ययत्वेन तदर्थप्रधानस्य लिङ्गसङ्ख्याभ्यां कथं योग इति वाच्यम् ?

शब्दशक्तिस्वभावाद्वाक्ये नोऽसत्त्वभूतार्थाभिधायित्वेऽपि समासे सत्त्वरूपार्थाऽभिधायित्वेन तद्योगसम्भवात्। यद्वा गुणवचनाना माश्रयतो लिङ्गादिवत्समासाऽर्थः प्रतियोगितया यद्द्रव्य श्रितस्तत्स्थलिङ्गादि समासस्य भविष्यति। एतेनात्र पक्षे 'अवर्षा हेमन्तः' इत्यादौ हेमन्ताद्याश्रयगतलिङ्गसङ्ख्याप्रसङ्ग इति कैयटोक्तमपास्तम्। अभावेन प्रतियोगिनोऽपि स्वज्ञानाद्याश्रयणेन तस्याप्याश्रयत्वात् । स्वघटितसमासघटकेनोपस्थित्या च तस्यैवाश्रयस्य ग्रहणौचित्यात्। अन्यथा तद्दोषदूषितपक्षोर्ध्वमाश्रितेऽपि पक्षे तदोषानुवृत्तौ भाष्यस्य निर्दलतापत्तिः। एतत्समकक्षतया 'अथ वा पुनरस्तूत्तरपदार्थप्रधानः' इत्युक्तेरसङ्गतिश्च। त्वद्रीत्या हि 'अस्तु तर्जुत्तरपदार्थ' इति वक्तमुचितम्। एतत्पक्षद्वयेऽप्येनकमित्यादावेकवचनाऽसिद्धिं वक्ष्यमाणां मनसि निधायोत्तरपदार्थप्रधानत्वं सिद्धान्तितम्। तत्पुरुषस्योत्सर्गतस्तत्प्रधानत्वाच्च। अत्र पूर्वपदार्थप्रधानत्वपक्षेऽपवादत्वेनाऽव्ययीभावस्य बाधनान्नाऽव्ययीभावाऽभावोऽवश्यं स्वीकार्यः। अन्यथाऽव्ययीभावाऽसिद्धिरूपदूषणानुपन्यासेन भाष्यस्य न्यूनतापत्तिः। तस्मादत्यन्ताऽभावार्थकनञः क्रियादिप्रतियोगिकाऽभावबोधकत्वेनोत्तरपदार्थेनाऽनन्वयादसामर्थ्येन नाऽव्ययीभावः'अमाक्षिक 'मित्यादौ। न सन्देह इत्यादौ सन्देहस्य गुणत्वेन भवत्येव तदभावबोधो ना। एतदेवाभिप्रेत्य भाष्येक उक्तम्- 'प्रसज्यायं क्रियागुणौ ततः प्रतिषेधति' इति। 'असन्देह' इत्यादौ चाऽऽरोपितः सन्देह इति भेदेनारोपज्ञानात्तदत्यन्ताऽभावप्रतीतिः। किञ्चाऽर्थाभावशब्दे नञो घटकतयाऽस्य सूत्रगृहीताऽव्ययतयाऽनेन नाऽव्ययीभावः। सूत्रगृहीताऽव्ययेन 'अव्यय 'मिति समासाऽभावस्य तत्र सूत्रे उपपादितत्वात्। अत्र चेदंभाष्यमपि मानम्। 'असंहित 'मित्यत्र सन्धानं संहितनिति भावे क्तः। आरोपितं सन्धानम्। आरोपितः परः सन्निकर्ष इत्यर्थे तदभावात्संहितासञ्ज्ञा न प्राप्नोतीत्यर्थ

इति न तदसङ्गतिः। संहितशब्दः 'परः सन्निकर्षः इति सूत्रबलात्स्त्रीलिङ्गो, वार्त्तिकप्रामाण्यात् क्लीबोऽपि। अत एव 'संहितव'दित्यादिप्रातिशाख्यतद्भाष्ययोः प्रयुक्तम्। अत एव 'परः सन्निकर्षः संहिता चेदद्रुतायामसहितमि'ति वार्तिकं 'परः सन्निकर्षः संहिता चेदद्रुतायां वृत्तौ हि संहितासञ्ज्ञा न प्राप्नोती'ति शेषपूरणेन व्याख्याय 'द्रुतायामेव हि परः सन्निकर्षो नाऽद्रुताया 'मित्यनेनासंहितमित्यंशोऽर्थतो हेतुत्वेन व्याख्यातो भाष्ये। 'न प्राप्नोती'त्यंशस्य तद्व्याख्यानत्वे हि असामर्थ्यात्समासानापत्तिः। त्वद्रीत्या संहितासज्ञाऽभावः प्राप्नोतीत्येवं वदेत्, वार्त्तिककृतो हेत्वकथनेन न्यूनता चेत्याहुः।

उपपदसमासः

"उपपदमतिङ्'[154]

समासप्रकरणे इदम् एकनवतितमं सूत्रमस्ति। शब्दकौस्तुभकारः सूत्रस्यास्याथ करोति - उपपदं सुबन्तं समर्थेन नित्यं समस्यते। अतिङन्तश्च समासः। कुम्भं करोतीति कुम्भकारः। अतिङ् किम्? मा भवान् भूत्। "माङि लुङ्'[155] दृन्ति सप्तमीनिर्देशात् माङपपदम्। ननु सुपेत्यधिकारात्तिङन्तेन न भविष्यति? सत्यम्, तन्निवृत्तिरनेन ज्ञाप्यते। तत्फलं त्वनुपदमेव स्फुटीकरिष्यामः। प्रथमान्तं तु सुप्ग्रहणमिहानुवर्तते एव।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह नित्यमिति वर्तते ।उपपदमतिङन्तं समर्थेन शब्दान्तरेण सह समस्यते नित्यम्, ततपुरुषश्च समासो भवति । कुम्भकारः। नगरकारः। अतिङिति किम्? एधानाहारको व्रजति । ननु च "सुप् सुपा' इति वर्त्तते, तत्र कुतस्तिङन्तेन सह समासप्रसङ्गः? एवं तर्हि ज्ञापयति - एतयोर्योगयोः सुप् सुपेति न सम्बध्यत इति। 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इत्येतदुपपन्नं भवति- अश्वक्रीती, धनक्रीती। 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इत्यस्मिन् विषये शब्दकौस्तुभकारः भट्टोजिदीक्षितः विवेचयन्नाह- गतीनां कारकाणामुपपदानां च कृद्भिः सह यः समासः स उत्तरपदात्सुबुत्पत्तेः प्रागेव कार्य इत्यर्थः। पूर्वपदन्तु सुबन्तमेवेत्युक्तम् । गतीनां तावत् - व्याजिघ्रतीति व्याघ्री। कारकाणाम् - अश्वैः क्रीता अश्वक्रीती। उपपदानाम्-कच्छेनपिबति कच्छपी।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृततया सूत्रस्यार्थं करोति, तस्य काशिकाकारः शब्दकौस्तुभमाधारीकृत्य एव साररूपेण विवेचयति, येन सूत्रार्थविगमने सौकर्यं भवति।

लघुशब्देन्दुशेखेर उपपदमतिङ् इति सूत्रस्य व्याख्यानम् इत्थं कृतम् - तत्रोप। अयमधिकारः। अत एवाऽमैव तुल्यविधानमित्यादि सङ्गच्छते। येनाऽमेव विधीयते तेन यस्योपपदसञ्ज्ञा विधीयत इति तदर्थात्। 'कर्मण्यण्' इत्यादौ 'कर्मणी'त्यादिः सौत्री प्रथमार्थे सप्तमी। 'धातोरण भवति, चोपपदसञ्ज्ञ 'मिति तदर्थः। अत्र सूत्रे सप्तमीपदं तदन्तपरम्। तत्स्थं = तद्वाच्यम्। तदाह- सप्तम्यन्ते पदे इति। महासङ्घया, प्रथमार्थेसप्तमीबलेन च लब्धमर्थमाह- तद्वाचकं पदमिति। पदमत्र विभक्त्यन्तम्, स्तम्बकर्णयोः' इत्यादौ 'सुपी'त्यधिकारात्। तत्प्रकृतिके सुबन्तेलक्षणा। अन्यथोपपदमितिमहासङ्घकसुबन्ताऽभावात् 'स्तम्बेरमः' इत्यादौ समासाऽनापत्तिः। समासविधायके उपपदप्रकृतिकसुबन्तग्रहणे 'सुप्यजातौ'इति णिनौ 'राजदर्शी'त्यादौ समासाऽनापत्तिः। तत्र हि सुबन्तमेवोपपदं न तु तत्प्रकृतिकम्। आवृत्त्याऽर्थद्वयपरत्वे गौरवं, महासज्ञाविरोधश्च। सुप्यजातावित्यादिविषये सुबन्तस्य सप्तम्यन्तपदवाच्यत्वरूपन्तत्स्थत्वमादायोपपदत्वं बोध्यम्। 'विभाषाऽग्रेप्रथमे'त्यादौ सुपीत्यधिकाराऽभावेऽपि महासंज्ञाबलात्तेषां तत्प्रकृतिकसुबन्ते लक्षणा बोद्ध्या। अत एव 'उपपदम्' इति सूत्रे 'अतिङ्ग्रहणादनयोर्योगयोः सुप्सुपेति निवृत्तमिति भाष्ये उक्तम्। उप = समीपे उच्चारितं पदमुपपदम्। सामीप्यञ्च सप्तम्यन्तपदघटितसूत्रविधेयप्रत्ययप्रकृत्यर्थेऽन्वयित्वमेव, न त्वानुपूर्व्यव्यवधानम्। कर्मण्यसूत्रे 'उष्ट्रप्रणाय' इति भाष्योदाहरणात्, 'आतोऽनुपसर्गे' इत्यत्रानुपसर्गग्रहणाच्च। 'गुरुं नमस्करोति' 'कन्यामलङ्करोती'त्यादौ हि भवन्तं शृणोतीत्यादाविवाऽनभिधानान्नाऽण् । 'अभिधानलक्षणाः कृत्तद्धितसमासा' इति 'अकर्तरि चेति सूत्रे भाष्योक्तेः। नन्वेवं 'तत्र'ग्रहणं व्यर्थं, प्रकृतधात्वधिकारविषयता त्वधिकारेणैव सिद्धेत्यत आहतस्मिश्चेति। अनेनोपपदसञ्ज्ञासन्नियोगशिष्टत्वं प्रत्ययविधेबोधयति। अन्यथाऽन्वाचयशिष्टत्वं सम्भाव्येत। प्रातिपदिकार्थे सप्तम्यामेवाऽस्य प्रवृत्त्या, भुवो 'भावे' इत्यादौ न प्रवृत्तिः। तद्व्यवस्था त्वनुनासिकत्वादिवल्लक्ष्यानुरोधेनैवेति बोद्ध्यम् । उपपदम्। 'सुबन्त'मिति महासञ्ज्ञाबललब्धम्। अत एव 'राजयुध्वे'त्यादौ नलोपः।

'एधानाहारको व्रजती'त्यत्र तु अतिङिति बहुव्रीहिणा 'तिङन्ताऽघटित: समास' इत्यर्थेन तदप्रवृत्ते:, तदाह- अतिङन्तश्च समास इति। कथमपि तिङन्ताऽघटित इत्यर्थ:। समास इति। तत्सझक: समुदाय इत्यर्थ:। कुम्भ असिति। ननु 'अन्तरङ्गानपि' इति न्यायेनेत्सझालोपयोर्लुका बाधादिदमयुक्तमिति चेन्न, इत्त्वलोपबाधाऽबाधयो: फले विशेषाऽभावेन 'अन्तरङ्गानपि' इत्यस्याऽप्रवृत्ते:। 'अलौकिकं प्रक्रियावाक्य'मित्यस्य समासप्रवृत्तियोग्यं लोके प्रयोगाऽनर्हमित्यर्थ:। हरि ङीत्यत्रापीत्सञ्ज्ञाद्युत्तरमेव समास:, लोके प्रयोगानर्हत्वस्योभयत्रापि सत्त्वेनाऽविशेषादकृतेत्संज्ञालोपमेवोच्चारितमित्यलम्। कृद्योगलक्षणा चात्र षष्ठी। न चान्तरङ्गा द्वितीया, प्रकल्प्यापवादविषयमुत्सर्गप्रवृत्ते:। अत्र षष्ठीसमासो न, उत्तरपदे विभक्त्युत्पत्ते: पूर्वमेवास्य प्रवृत्त्याऽन्तरङ्गत्वात्। कारकषष्ठीत्वेन षष्ठीसमासस्यापि तत: पूर्वे प्रवृत्तौ तु अस्तु स:। अस्य नित्यत्वेन तत्कृततत्पुरुषसञ्ज्ञाप्रयुक्तैकार्थीभावाऽभावेप्येतत्कृततत्सझाप्रयुक्तस्यतस्यानपगमेनाऽदोषात्। एकस्या एव सझाया उभाभ्यामपि प्रवृत्त्याऽविरोधेन युगपदेवोभाभ्यां सा। स्पष्टञ्चेदमत्र भाष्ये। एवञ्च 'द्वितीया श्रिते'त्यादिसमासोऽप्युत्तरपदे सुबुत्पत्ते: प्रागेव। अत एव कारकेति सामान्यत एवोक्तम्। भाष्यकृता च तदंशे प्रमाणं नोपन्यस्तम्। 'परिभाषा न कर्त्तव्ये 'ति प्रकृतसूत्रभाष्यं तु विशिष्टाया अकर्त्तव्यत्वपरम्। अत एव भाष्ये प्रत्याख्यानोत्तरमपि 'गतिकारकेति समासवचनात्' इत्युक्तम्। तेन कारकांशे वचनत्वमेव बोधितमिति दिक् । मा भवानिति। समासे सति व्यवहितप्रयोगो न स्यादिति सूचचितुं 'भवा'निति। इदमुपलक्षणम्- 'कारको व्रजती'त्यादेर्भाष्योक्तस्य। किञ्च माङ उपपदत्वे महासञ्ज्ञाकरणबलात् 'मा कदाचिदवर्णं भूत्' इति 'एच' इतिसूत्रस्थे भाष्यप्रयोगे 'मा कदाचिदप्यवृत्तिर्भूत्' इति 'तद्धितार्थ' इति सूत्रस्थभाष्यप्रयोगे च द्वित्रिपदव्यवधाने प्रयोगो न स्यात्, यथा 'कर्तुं' देवदत्तो घटं ग्रामं व्रजती'ति न प्रयोग:। किञ्च माङो नोपपदत्वम्। लुविधौ माङीति सप्तम्या: प्रथमार्थत्वे मानाऽभावात्। तस्योपपदसञ्ज्ञायां फलाऽभावाच्च। तुमुन्विधौ तु "क्रियार्थोपपदस्ये 'त्यर्थमुपपदसञ्ज्ञाऽऽवयिकेति दिक् ।

अतिङ्ग्रहणमिति। न च 'कारको गत' इत्यत्र सुबन्तोपपदस्य समासव्यावृत्तये तिङन्तार्थक्रियाबोधकाऽघटित इत्यर्थकं तदिति वाच्यम्, तस्य द्रव्यवाचितया तिङन्तार्थत्वाऽभावेन तेन तद्वारणस्याऽशक्यत्वात्। किञ्च गतादेव्यवाचितया क्रियावाचकोपपदत्वाऽभावेन ण्वुल एव तत्राऽप्राप्ते:। क्रियावाचकशब्दग्रहणे क्रियाया: साध्यमात्रावस्थाया एव ग्रहणस्य 'गतिकारकोपपदात्' इति सूत्रे प्रकृतसूत्रे च भाष्ये ध्वनितत्वात्। प्रकृतसूत्रे 'उपपदमक्रिये'ति न्यासेऽक्रियेत्यस्येदं प्रत्युदाहरणमाशङ्कयाऽस्य क्रियावाचित्वाऽभावादूषितम्। तत्र क्रियावाचित्वाऽभावादत्र प्रत्युदाहरणत्वं न, तुमुन् (न, ण्वुल् तु) भवतीत्यस्याऽन्याय्यत्वात्। न च धाता: क्रियावाचित्वेन तन्निबन्धनस्तुमुन् स्यादेवेति वाच्यम्, उपपदमिति महासञ्ज्ञया तुमुन्विधावपि पदत्वपर्यन्तं निवेशात्। तस्मात्तत्र तुमुन्ण्वुलोरसाधुत्वे एव भाष्यतात्पर्यम्। अर्थमात्रग्रहणे तु गुणीभूतादेरपि ग्रहणमिति गतपाकादियोगेऽपि कारकविभक्तिकृत्वसुच्क्त्वादीनां साधुत्वं भवत्येबेति भाष्यप्रदीपोड्योते विस्तर:। 'कारको व्रजतितरा 'मित्यादेस्त्वनभिधानमेवेति भाव:। सुपेत्येतदिति। 'सु'बित्यस्याप्युलक्षणमिदम्। किञ्च कारको व्रजतीत्यस्यैव भाष्ये प्रत्युदाहतत्वेनतव्यावृत्ते: सुबिति प्रथमान्तानुवृत्त्यैव सिद्ध्या तद्वैयर्थ्यमिति प्रथमान्तनिवृत्तिरेव तेन बोधयितुं युक्ता। परिभाषाऽकरणलाघवानुरोधेन तु भाष्ये सामान्यापेक्षज्ञापकमाश्रित्योभयोनिवृत्तिरुक्ता। पूर्वसूत्रेऽपीति। तत्र गत्यंशेऽतिङिङित्यस्य सम्बन्धे फलाऽभावेन तिङन्ताऽघटित: समास इत्येवं समासविशेषणतैव। अत एव 'प्रपचतितरा 'मित्यादौ न गतिसमास:। किं तु 'उदात्तवता गतिमता च तिङा' इति वार्त्तिकेनसमास:। तत्र 'तिङे 'त्यस्य तिङ्घटितेनेत्यर्थ:। 'सहे'ति योगविभागेन वा। तत्राऽर्थाधिकारानुरोधेनात्राऽपि अतिङन्त: समास इति व्याख्यातम्। अत एव 'अनक्क्लृप्त्यमर्षयो:' इति सूत्रे किंवृत्तस्याधिकारादकिंवृत्तग्रहणानर्थक्यमित्युक्त्वा सामर्थ्यादुपपदसञ्ज्ञार्थन्तीत्याशङ्कयाऽतिङितिप्रतिषेधात्सञ्ज्ञाऽऽनर्थक्यमित्युक्तं सङ्गच्छते। अतिङित्यस्योपपदविशेषणत्वे तदसङ्गतिज: स्पष्टैव। उपपद, मतिङन्तेनेति तु नार्थ:, 'अतिङिति ज्ञापयति- अनयोर्योगयोर्निवृत्तं सुप्सुपेति। केनेदानीं सह समास:? समर्थेन' इति भाष्याऽसङ्गते:, लुप्ततृतीयान्तत्वकल्पने मानाऽभावाच्च, भाष्यरीत्या प्रत्युदाहरणाऽभावाच्च। न चैवं तरबन्ते तद्वारणाय तत्र तस्य चारितार्थ्ये कथं तत्र सुपेत्यस्याऽसम्बन्धे तस्य ज्ञापकत्वमिति वाच्यम्, उपपदमिति सूत्रसम्बद्धेनैवाऽनेन तिङन्तव्यावर्त्तकेन प्राचीनपठितपरिभाषानुरोधेन सूत्रद्वयेऽपि सुप्सुपेत्येतदयात्रा ज्ञापनात्। तदुक्तं भाष्ये- 'अतिङ्ग्रहणं ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपे'ति। तत्र पूर्वसूत्रे गत्यंशे एव तदसम्बन्ध: परिभाषानुरोधादेव। तदाह- तथा चेति। कारकांशेऽप्येकदेशानुमत्येष्ट इति गम्यते। भाष्याच्च 'कर्तृकरणे' इति सूत्रविहितसमासो बहुलग्रहणात् क्वचित्सुबुत्पत्त्यनन्तरमपि। यथा- 'सा हि तस्य धनक्रीते' त्यादौ ।

प्राक्सुबुत्पत्तेरिति। 'स्त्रीप्रत्ययोत्पत्तेः प्रा'गित्यपि बोद्ध्यम्। अश्वक्रीतीति। अश्वेन क्रीतेति करणस्य कृतासमासः। 'क्रीतात्करणपूर्वात्' इति ङीष् । सुबन्तेन समासे पूर्व टाप्यदन्तत्वाऽभावात्स न स्यादिति भावः। व्याघ्यामपि आडो ध्रशब्देन वेराघ्रशब्देन गतिसमासः। कच्छपीत्यत्रापि सुपीति योगविभागात्केकच्छे पिबतीत्यर्थे उपपदसमासः ।

"अमैवाव्ययेन'[156]

समासप्रकरणे इदं द्वानवतितमं सूत्रमस्ति। शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति – अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते। स्वादुङ्कारं भुङ्क्ते। सम्पन्नङ्कारम्। लवणङ्कारम्। “स्वादुमि णमुल्'[157] स्वादुमीत्यत एव निपातनात्पूर्वपदस्य मान्तत्वम्। येन वाक्येनामेव केवलो विधीयते न तु प्रत्ययान्तरसहितः, तस्मिन् वाक्ये सप्तमीनिर्देशबलेन यस्योपपदसंज्ञा तदमैव तुल्यविधानमित्युच्यते। अमैव च यत्तुल्यविधानं यस्य प्रत्ययान्तरं प्रति उपपदत्वमेव नास्तीति अव्ययान्तरेण स समासो नाशङ्कनीयः। सूत्रस्य प्रयोजनन्तु “कालसमयवेलासु तुमुन्'[158]'कालः समयो वेला वा मा तुम्' इत्यत्र समासनिवृत्तिः। अमैवेति किम्? अग्रेभोजम्, अग्रेभुक्त्वा ।

अव्ययेनेति किम्? कु(1)म्भकारः। अमति ह्यव्ययग्रहणे अमैव यत्तुल्यविधानं तदेव समस्यते। अमन्तेनोपपदस्य यस्समासः सोऽमैव तुल्यविधानस्यति। तथा च 'अग्रेभोजम्' इत्यत्र मा भूत्। 'अग्रेभुक्त्वा कालो भोक्तुम्' इत्यत्र तु स्यादेव।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– पूर्वेणैव समासे सिद्धे नियमार्थं वचनम्। अव्ययेनोपपदस्य यः समासः सोऽमैव भवति, नान्येन। स्वादुङ्कारं भुङ्क्ते। सम्पन्नङ्कारं भुङ्क्ते । लवणङ्कारं भुङ्क्ते । अमैवेति किम्? "कालसमयवेलासुतुमुन्' – कालो भोक्तुम्। एवकारकरणमुपपदविशेषणार्थम्। अमैव (2) । यत्तुल्यविधानमुपपदं तस्य समासो यथा स्यात्, अमा चान्येन च यत्तुल्यविधानं तस्य मा भूत् – अग्रे भुक्त्वा, अग्रेभोजम्।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेण सूत्रस्यार्थं प्रतिपादयति, तस्य काशिकाकारः सम्यक् पर्यालोचनं कृत्वा सूत्रस्यार्थं विवेचयति, येन . सूत्रार्थावगमने सौकर्यं भवति। शब्दकौस्तुभे यत् प्रतिपादितं तत्सर्वं पक्षं काशिकायांप्रस्तौति काशिकाकारः।

विशेषः –

1. अत्र समासो न स्यादिति भावः।[159]
2. तुल्यविधानमिति – येन वाक्येनामेव प्रत्ययोविधीयते न तु प्रत्ययान्तरं तेन यदुपपदं निर्दिश्यते तदमेव तुल्यविधानम्।[160]

"तृतीयाप्रभृतीन्यन्यतरस्याम्'[161]

समासप्रकरणे इदं त्रयोनवतितमं सूत्रं विद्यते । शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं करोति – "उपदंशस्तृतीयायाम्'[162]इत्यादीन्युपपदान्यमन्तेनाव्ययेन सह वा समस्यन्ते। उभयत्र विभाषेयम्। यदमैव तुल्यविधानं तस्यप्राप्ते यथा"उपदंशस्तृतीयायाम्' इति। यत्पुनरमा चान्येन च तुल्यविधानं तस्याप्राप्ते, यथा "अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ''[163] इति। मूलकोपदंशम्भुङ्क्ते, मूलकेनोपदंशम्। उच्चैः कारमाचष्टे। इह समासपक्षे कृदुत्तरपदप्रकृतिस्वरः "आदिर्णमुल्यन्तरस्याम्'[164] इत्याधुदात्तत्वम्। असमासपक्षे तु उच्चैरित्यन्तोदात्तम्, स्वरादिषु तथापाठात्। कारमित्याधुदात्तम्। अमेत्येव। "पर्याप्तिवचनेष्वलमर्थेषु'[165] पर्याप्तो भोक्तुम्। काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– अमैवेत्यनुवर्त्तते । "उपदंशस्तृतीयाम्" इत्यतः प्रभृति यान्युपपदानि तान्यमैवाव्ययेन सहान्यतरस्यांसमस्यन्ते, ततपुरुषश्च समासो भवति। उभयत्र विभाषेयम्। यदमैव तुल्यविधानमुपपदं तस्य प्राप्ते यथा – "उपदंशस्तृतीयायाम्' इति। यत्पुनरमा चान्येन च तुल्यविधानंतस्याप्राप्ते यथा– "अव्यये यथाभिप्रेताख्याने कृञः कृत्वाणमुलौ" इति। मूलकोपदंशं भुङ्क्ते, मूलकेनोपदंशं भुङ्क्ते। उच्चैः कारमाचष्टे, उच्चः (1) कारम् । अमैवेत्येव"पर्याप्तिवचनेष्वलमर्थेषु" – पर्याप्तो भोक्तुम्, प्रभुर्भोक्तुम् ।

यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृतरूपेण सूत्रस्यार्थं व्याख्याति, तस्य काशिकाकारः अनुकरणं कृत्वा साररूपेण सूत्रस्यार्थं विवेचयति, येन सूत्रार्थावगमने कण्ठस्थीकरणे च सौकर्यं भवति।

विशेषः –

1. उच्चैः कारमिति – यदा समासस्तदा कृदुत्तरपदप्रकृतिस्वरः, आदिर्णमुलन्यतरस्यामित्याधुदात्तत्वम्। यदा तु न समासस्तदोच्चैरित्यन्तोदात्तम्, स्वरादिषु तथा पाठात्। कारकामित्याद्युदात्तम् इति पदमञ्ज• स्पष्टम् ।

क्त्वाच[166]

समासप्रकरणे इदं चतुर्णवतितमं सूत्रं वर्तते । शब्दकौस्तुभकारः भट्टोजिदीक्षितः सूत्रस्यास्यार्थं व्याख्याति – क्त्वाप्रत्ययेन सह तृतीयाप्रभृतीन्युपपदानि वा समस्यन्ते। "अव्ययेऽयथाभिप्रेताख्यानेकृत्रः क्त्वाणमुलौ''[167] इति क्त्वाप्रत्ययः। समासपक्षे ल्यप् । उच्चैः कृत्य। उच्चैः कृत्वा। तृतीयाप्रभृतीनीत्येव। अलङ्कृत्वा । खलुकृत्वा।

काशिकाकारस्तु अस्य सूत्रस्यार्थं विवेचयन्नाह– अमैवेति पूर्वयोगेऽनुवृत्तम्, तेनान्यत्र न प्राप्नोतीति वचनमारभ्यते। क्त्वाप्रत्ययेन सह तृतीयाप्रभृतीन्युपपदानि अन्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति। उच्चैः कृत्य। उच्चैः कृत्वा । "अव्ययेऽयथाभिप्रेताख्याने कृत्रः क्त्वाणमुलौ" इति क्त्वाप्रत्ययः। समासपक्षे ल्यबेव। तृतीयाप्रभृतीनीत्येव – अलं कृत्वा। खलुकृत्वा। यत्र विषयेऽस्मिन् शब्दकौस्तुभकारः भट्टोजिदीक्षितः विस्तृततया सूत्रस्यार्थं व्याख्याति, तस्यानुकरणमेव करोति काशिकाकारः। विषयप्रतिपादने द्वयोर्ग्रन्थयोर्मध्ये कोऽपि भेदः नास्ति।

सन्दर्भग्रन्था:

1. 'अष्टा.सू.2-1-22
2. 'अष्टा.सू.2-1-23
3. 'अष्टा.सू.5-4-91
4. 'अष्टा.सू.2-1-24
5. 'अष्टा.सू.2-1-25
6. 'अष्टा.सू.8-1-55
7. 'अष्टा.सू.2-1-26
8. 'अष्टा.सू.2-1-27
9. 'अष्टा.सू.2-1-28
10. अष्टा.सू.2-1-29
11. 'अष्टा.सू.2-3-5 3
12. अष्टा.सू.2-1-30
13. 'अष्टा.सू.02-01-32